145 (1) 145

॥ श्रीः ॥

वातुल, वातुलोत्तर, पारमेश्वर, चन्द्रज्ञान –
पटलाः ॥

स्वस्ति । श्रीगणाधिपतये नमः । निर्विघ्नमस्तु ।

श्री लक्ष्मीनारायणाय नमः । लक्षहोम विधिरुच्यते ॥

देवदेव महादेव सर्वज्ञ करुणानिधे
अचिन्त्य गुण (गुण) रूपाढ्य शिव (शव) सर्वजगत्प्रभो ॥ १ ॥
सप्तकोटिषु मन्त्रेषु प्रतिष्ठाद्युत्सवेषु च ।
वह्निहोम विधिः प्रोक्तस्त्वया गुह्यः सदाशिव ॥ २ ॥
पृथग्विधानं वह्नेश्च हवनं च कथं वद ।
किंनिमित्तं कथं होमः कं च द्रव्यं च तत्फलम् ॥
त्व [त्व] न्मुखान्छ्रोतुमिच्छामि विस्तरेण वद प्रभो ।
ईश्वर उवाच । ४ ?
साधु पृष्टं त्वया देवि गुह्याद्गुह्यतमं महत् ।
अग्निकार्यं सुरश्रेष्ठं सर्वकामफलप्रदम् ॥ ५ ॥
मम तेजोमयो वह्निस्तव रूपं न संशयः ।
जिह्वारूपेण नौ देवि तत्र द्रव्यं हि भुज्यते ॥ ६ ॥
अन्यच्च (अण्वच्च) भुज्यते देवि मुक्तिदं च द्विजन्मनाम् ।
द्रव्यदत्तस्मात्तु भुञ्जीत यदि चोक्षं द्विजोत्तमः ॥ ७ ॥
शूद्रत्वं कर्महीनत्वं पतितत्वं न संशयः ।
सायं प्रातः नित्यहोमं प्रकुर्वीत द्विजोत्तमः ॥ ८ ॥
इहापि सुखमाप्नोति अन्ते सायुज्यमीश्वरि ।
लक्षहोमाद्कोटिहवनं काम्यकर्माणि कारयेत् ॥ ९ ॥
होमाद्दशांशकं मन्त्रं जपसंख्या महेश्वरि ।

शतांशं तर्पणं कुर्यात् सहस्रं कुम्भपूजनम्।
अयुतं भोजयेद्विप्रान् प्रदक्षिणनमस्कृतिम्।
दानानि विविधं दत्वा गोभूम्यादि विशेषतः॥ ११॥
इत्थं कुर्याद्विधानज्ञः सर्वमृत्युनिवारणम्।
सर्वशान्तिकरं चैव शत्रूणां नाशकारणम्॥ १२॥
आयुरारोग्यदं देहे तेजोबलविवर्धनम्।
लक्ष्मीप्रदं विशेषेण सन्तानादिविवर्धनम्॥ १३॥
तुष्टिदं पुष्टिदं राज्ञां राजकोशविवर्धनम्।
गजाश्वसैन्यदुर्गादिवृद्धिदं कीर्तिदं तथा॥ १४॥
दिव्यन्तरिक्षाद्युत्पात दुःस्वप्नादिविनाशनम्।
ग्रहभूतपिशाचादिविनाशनकरं परम्॥ १५॥
भुक्तिदं मुक्तिदं चैव सर्ववाञ्छाफलप्रदम्।
अनेन होमविधिना बहुप्रीतिर्भवेन्मम॥ १६॥
कामाख्या मयि संतुष्टे तुष्टा देवा न संशयः।
इत्थं प्रोक्तं होमकर्म कलौ सिद्धिप्रदायकम्॥ १७॥
तस्मात्सर्वप्रयत्नेन कारयेद्धोममर्थवान्।
तद्विधानं प्रवक्ष्यामि लक्षहोमविधौ पृथक्॥ १८॥
तत्काले तत्स्थलं कुण्डमण्टपादि सलक्षणम्।
दिनसंख्यां च तत्कर्म आचार्यादींश्च ऋत्विजः॥ १९॥
होमद्रव्यं तत्फलं च विस्तरेण शृणु प्रिये।
कार्तिके मासि कुर्वीत पौर्णम्यां इन्दुवासरे॥ २०॥
माघमासे कृष्णपक्षे चतुर्दश्यां महेश्वरि।
फाल्गुणे मासि कुर्वीत अष्टमी दशमीदिने॥ २१॥
चैत्रमासत्रयोदश्यां सेका[द]श्यामथापि वा।

वैशाखे तृतीयायां ज्येष्ठे मासि शुभे दिने ॥ २२ ॥
अन्यत्पुण्यतिथौ मन्त्री ग्रहणे रविसोमयोः ।
अमौढ्य नाधिमासे च चन्द्रतारानुकूलके ॥ २३ ॥
शुभलग्ने शुभयुते दुष्टग्रहविवर्जिते ।
कर्तुश्चैवानुकूलस्थे शुभग्रहनिरीक्षिते ॥
एवं गुणयुते काले लक्षहोमं च कारयेत् ।
साम्बलिङ्गशिवक्षेत्रे आरामे पर्वते तटे ॥ २५ ॥
उद्याने श्रोत्रियागारे संगमे च नदीतटे ।
अन्यत्पुण्यस्थले देवी होमं कुर्यान्नृपोत्तमः ॥ २६ ॥
तत्स्थलं च समावीक्ष्य पूर्वे वह्नौ तथैशके ।
खननादि प्रकुर्वीत शोधयेद्दुष्टवर्जिते ॥ २७ ॥
चतुरश्रं समं कृत्वा त्रिंशद्धस्तमात्रकम् ।
एकविंशतिहस्तं वा सप्तोत्तरदशप्रिये ॥ २८ ॥
तावन्मण्टपविस्तारं यावत्कुण्डमितिर्भवेत् ।
रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम् ॥ २९ ॥
नवभागैकभागेन मण्टपस्य महेश्वरि ।
कुण्डानि रचयेन्मन्त्री नवपञ्चैकमेव वा ॥ ३० ॥
पूर्वे च चतुरश्रं स्यादाग्नेये तु भगाकृतिः ।
अर्धचन्द्रं तु याम्यायां नैरृत्यां तु त्रिकोणकम् ॥ ३१ ॥
वारुणे वर्तुलं कुण्डं वायव्यां च षडश्रकम् ।
उत्तरे पद्मकुण्डं तु ऐशान्यामष्टकोणकम् ॥ ३२ ॥
ऐन्द्रेशानकयोर्मध्ये वृत्तकुण्डं तु कारयेत् ।
चतुर्दिक्षु च चत्वारि चतुरश्रं तु कारयेत् ॥ ३३ ॥
वृत्तकुण्डं तथैशान्यां पञ्चकुण्डरचना शिवे ।

कुण्डमेकं च कुर्वीत वृत्तं वा चतुरश्रकम्॥ ३४॥
ईशाने पूर्वभागे वा कल्पयेत्सुमहेश्वरि।
चतुर्हस्तं चैककुण्डं त्रिहस्तं पञ्चकुण्डकम्॥ ३५॥
द्विहस्तं नवकुण्डं च तावत्पात(खा?)प्रमाणकम्।
विस्तारं तावदूर्ध्वं स्यादूर्ध्वं मेखलया सह॥ ३६॥
कुण्डस्य यादृशं रूपं तादृशी मेखला भवेत्।
त्रिमेखलं च युक्तं स्याद्दृष्टवद्चतुरङ्गुलैः॥ ३७॥
षड्भिश्चतुर्भिश्च तथा द्विकरत्निकरस्य तु।
मेखलोपरि मध्ये तु योनि पिप्पलपत्रवत्॥ ३८॥
षडङ्गुलस्य विस्तारे विस्तारार्धं [त] * दूर्ध्वतः।
मुखैरेवं तथाग्रे षां मङ्गुलाङ्गुलवर्धनात्॥ ३९॥
एकाङ्गुलसमुत्सेधा मष्टाङ्गुलसविस्तरा।
प्रणीतार्थस्थानमेतद्धि ब्रह्मस्थानं तथा भवेत्॥ ४०॥
चतुरश्रां प्रणीतायां ब्रह्मणे पद्ममेव च।
इत्थं कुण्डं प्रकल्प्याथ लक्षणेन महेश्वरि। ४१॥ ७ ?
स्थण्डिले च न कर्तव्यं देवताशापदं भवेत्।
अलक्षणकृतं कुण्डं कुलक्षयकरं भवेत्॥ ४२॥
पूर्वोक्तेन विधानेन कुण्डं कुर्याद्विचक्षणः।
तन्मध्ये वेदिका कुर्याद्धस्तमात्रां तदूर्ध्वतः॥ ४३॥
चतुःस्तम्भं च तन्मध्ये परितो द्वादश क्रमात्।
तद्बहिर्विंशतिस्तम्भाः उन्नतिं चाष्ट[ष्ट] पदक्रमैः॥ ४४॥
तद्बहिः पञ्चहस्तं स्यात् स्थापयेत्पीतिकादिभिः।
एकभौमं त्रिभौमं वा कारयेन्मण्डपं शिवे॥ ४५॥
चतुर्द्वारं समायुक्तं चतुस्तोरणभूषितम्।

प्राग्द्वारे पीतवर्णं च दक्षिणे कृष्णवर्णकम् ।
पश्चिमे रक्तवर्णं च उत्तरे श्वेतवर्णकम् ॥
चक्रं त्रिशूल डमरु पद्मं नन्दीव चिह्नितम् । ४७ ॥
एवं द्वारं प्रकुर्वीत पूर्वतः क्रमतः प्रिये ।
चतुर्दिक्षु ध्वजं कुर्यात् पताकाः स्युर्दिशि स्थिताः ॥ ४८ ॥
दशहस्तो ध्वजे दण्डः चतुरस्रो चतुर्वर्तकः ।
सप्तहस्ताः पताकाः स्युः दीर्घदण्डप्रमाणतः ॥ ४९ ॥
२९ सप्तहस्तं ध्वजपटः वास[सा] नूतनेन च ।
तत्र वाहनचिह्नानि लेखयेच्चित्रलिपिना गुरुः ॥ ५० ॥
विंशत्यङ्गुलविस्ताराः पताकाः स्युर्महेश्वरि ।
लोकपालानुवर्णेन वाहनायुधलाञ्छनैः ॥ ५१ ॥
दिग्विदिक्षु प्रकुर्वीत स्थापयेद्विधिना गुरुः ।
वस्त्रैराच्छादयेत्स्तम्भान् वितान[न] फलशोभितान् ॥ ५२ ॥
द्वारे द्वारे च कुम्भौ द्वौ कुम्भौ तोरणमूलगौ ।
चूतपल्लवशोभाढ्यौ प्रत्येकं कण्ठवाससौ ॥ ५३ ॥
कदलीस्तम्भविन्यासैः स्रग्दामाचूतपल्लवैः ।
लोभयित्वा बहिः पश्च दर्भदाम्ना च वेष्टयेत् ॥ ५४ ॥
एवं मण्डपकुण्डानि कुर्वीत विधिना प्रिये ।
नवाहं सप्तरात्रं वा पञ्च त्र्येकाहमेव वा ॥ ५५ ॥
लक्षहोमं प्रकुर्वीतमुत्तमं मध्यमं भवेत् ।
अधमं च न कुर्वीत दिनसंख्याविधौ शिवे ॥ ५६ ॥
वपनं स्नानं मौनं च शुक्लाम्बरधरः शुचिः ।
क्षीरेण भोजनं नित्यं दुःसङ्गादिविवर्जितः ॥ ५७ ॥
ब्रह्मचर्यव्रतं कुर्यात् ऋत्विग्भिः सह देशिकः ।

इत्थं दीक्षा प्रकर्तव्या नवरात्रे महेश्वरि ॥ ५८॥
त्रिरात्रे चैकरात्रे च दीक्षा[क]र्म न कारयेत्।
यागद्रव्याणि संपाद्य होतृभिर्जापकान्द्विजान् ॥ ५९॥
दीक्षावान्कर्मतत्त्वज्ञः सत्यवादी जितेन्द्रियः।
सपत्नीकान्द्विजश्रेष्ठान् आहूय यजमानकः ॥ ६०॥
तैलाभ्यङ्गादिकं कृत्वा साचार्यः ऋत्विक्समन्वितः।
सुतिथौ च सुनिश्चित्य पूर्वोक्तेन महेश्वरि ॥ ६१॥
सन्ध्याकर्म प्रकुर्वीत नित्यकर्म समाप्य च।
मृत्तिकास्नानपूर्वं च कुशाग्रोदकवारिणा ॥ 62
सर्वौषधसमायुक्तं तत्तन्मन्त्रेण लेपयेत्।
नानामङ्गलवाद्यैश्च वेदघोषैश्च सूक्तकैः ॥ 63
स्नानं कृत्वा ततो मन्त्री होमार्थं च द्विजोत्तमैः।
धौतवस्त्राम्बरच्छन्न विभूत्याद्यैरलंकृतः ॥ ६५॥ ?
देवर्षितर्पणं कृत्वा नमस्कृत्वा दिवाकरम्
ततो देवालयं कृत्वा फलपुष्पसुवर्णकैः ॥ ६६॥
ममाग्रे विन्यसेद्देवि यजमानः सुभक्तितः।
3a पञ्चोपचारैरभ्यर्च्य प्रार्थयेत्तु कृताञ्जलिः ॥ ६७॥
शिवादिसर्वदेवानां सत्यस्तुष्टिकरं भवेत्
लक्षहोमं करोमीति स्वामि विज्ञापनं चरेत् ॥ ६८॥
इति विज्ञाप्य देवेशं प्रविशेद्यागमण्टपम्।
प्रक्षाल्य पाणिपादौ च पूर्वे वा चैशकोणके ॥ ६९॥
पञ्चपीठं च संस्थाप्य नववस्त्रोपरि न्यसेत्।
तस्योपरि न्यसेद्दर्भान् आसनेषूपविश्य च ॥
गुरुवन्दनपूर्वादि प्राणायामं समाचरेत्।

दिनमुद्दिश्य संकल्प्य यथाविभवविस्तरम्॥ ७१॥
विघ्नेशमर्च्य नान्द्यादि पुण्याहं पञ्चगव्यकम्।
मधुपर्कं विधायाथ वरयेद्देशिकादिकान्॥ ७२॥
आचार्यं धर्मदं देवि ब्रह्माणांश्च सदस्यकम्।
भवादिमूर्तिपानष्टौ होतृभिश्च यथाक्रमवत्॥ ७३।
दिनसंख्यामितान्ज्ञात्वा वरयेच्च पृथक्पृथक्।
जपार्थं तु शतार्धं स्यात् वेदपारायणं शिवे॥ ७४॥
षोडश ब्राह्मणान् कुर्यात् तर्पणार्थं दश द्विजान्।
कुम्भार्चने चैकमेव नमस्कारप्रदक्षिणे॥ ७५॥
दशविप्रांश्च वरयेदर्चार्थं द्वादश द्विजान्।
आचार्यादीन्स्वशाखादि प्रवरप्रोच्चकम्? ॥ ७६॥
शर्मार्यं वृणुयात्कर्ता श्लोकैरेभिश्च तान्क्रमात्।
सर्वकर्मधुरीणस्त्वं शिवतत्त्वे द्विजोत्तम॥ ७७।
त्वामहं गुरुमाचार्यमस्मिन्होमविधौ वृणे।
कर्तुः प्रतिनिधित्वे तु द्विजमन्यं तदार्थया॥ ७८॥
आचार्यो वृणुयादत्र श्लोकेनैव ततो मुने।
कर्तुः प्रतिनिधित्वेन कर्म कारयितुं द्विज॥ ७९॥
त्वामहं यजमानार्थमस्मिन्होमविधौ वृणे।
यथा चतुर्मुखो ब्रह्मा स्वर्गलोकपितामहः॥
ब्रह्माणं त्वामहं सार्धमस्मिन्होमविधौ वृणे।
मन्त्रतन्त्रादिलोपांश्च द्रष्टुं त्वं स्युर्यथा तथा॥
अस्मिन्होमविधौ विप्र सदस्यं त्वामहं वृणे॥ ८२॥?
होमार्थं मूलमन्त्रांश्च तत्तन्मन्त्रां शिवस्य तु।
ऋत्विजेऽस्मिन् होमविधौ द्विजा युष्मानहं वृणे॥ ८२॥

तर्पणार्थं तु पूजार्थं कलशस्य महेश्वरि।
मूलमन्त्रजपार्थाय वेदपारायणार्थकम्॥ ८४।
प्रदक्षिणप्रणामार्थं द्विजा युष्मानहं वृणे।
3-6 इत्येवं वरणं कृत्वा तेभ्यः पाद्यादिकं ददेत्॥ ८५॥
पाद्यमर्घ्यं तथाचामं मधुपर्कं तथैव च
[विविधानपि]
कुण्डमे[ले]चाङ्गुलीयादि भूषणांश्च विधामपि ॥ ८६॥
रुद्राक्षमकुटाद्यैश्च स्वर्णयज्ञोपवीतकैः।
दुकूलपादुके देवि छत्रव्यजनचामरैः॥ ८७॥
आचमं जलपात्राणि यागोपकरणानि च
फलं स्वर्णं च ताम्बूलं दापयेन्मनुना शिवे॥ ८८॥
मूलेन मम गायत्र्या पञ्चब्रह्मभिस्तथा।
आचार्याय प्रदत्वाथ गन्धाद्यैस्तं समर्चयेत्॥
एवं कुम्भसदस्यादीन् तथैवान्यान् द्विजान्क्रमात्
यथा यथोचितं वस्त्रभूषणाद्यैश्च तोषयेत्॥ ९०॥
अङ्कुरार्पणपूर्वं च मृत्तिकामाहरेत्ततः।
सद्योऽङ्कुरं वा कुर्वीत दिनसंख्यामितं शिवे॥ ९१॥
ध्वजस्थापनपूर्वोक्तं पताकास्थापयेत्प्रिये।
वृषयागं ततः कुर्यात् पताकाध्वजदेवताः। ९२॥
संपूज्य विधिवन्मन्त्री तत्तन्मन्त्रेण पार्वति।
पञ्चगव्यं हुनेदन्ते गणेशं च नवग्रहान्॥ ९३।
तत्तन्मूलेन होतव्यं तत्तद्द्रव्यं पृथक्पृथक्।
एतत्कर्म दिवाकाले गुरुः कुर्यान्महेश्वरि॥ ९४॥
सायंसन्ध्यामुपास्याथ शुचिर्भूत्वा गुरूत्तमः।
प्रक्षाल्य पाणिपादौ च मूर्तिपाद्यैर्द्विजोत्तमैः॥ ९५॥

प्रविश्य पश्चिमे द्वारं यागगेहं महेश्वरि।
अस्त्रदृष्ट्या विलोक्याथ दिक्पतीन्प्रणीयतान्॥ ९५॥
नैर्ऋत्यां दिशमासाद्य मुपविश्यासने गुरुः।
गुरुवन्दनपूर्वादि दद्याद्दिग्बन्धनं शिवे॥ ९६॥
भूतशुद्धिं न्यासजालान् संकल्पं च विधाय च।
गणेशस्थण्डिले पूज्य सुगन्धकुसुमादिभिः॥ ९७॥
स्थापयेत्कलशं देवि योजयेत्पञ्चगव्यकैः।
एकांशकं तु गोमूत्रं गोमयं च तदर्धकम्॥ ९९॥
सप्तांशकं तु गोक्षीरं त्र्यंशकं तु दधि स्मृतम्।
आज्यमेकांशमित्येवं सद्योजातादिपञ्चकैः॥ १००॥
५a अस्त्रमन्त्रेण संस्पृष्ट्वा शतमष्टोत्तरं जपेत्।
पुण्याहं वाचयेत्पश्चात् ऋत्विग्भिः सहितो गुरुः॥ १०१
मण्टपं मार्जयेद्देवि वायुमन्त्रेण देशिकः।
पालाशपल्लवैर्दर्भैः वह्न्यादिशावसानकम्॥ १०२॥
मम गायत्रिमन्त्रेण प्रोक्षयेद्धेमयाम्भसा।
अस्त्रमन्त्रशतावृत्या ततो राजीश्च देशिकः॥
विकीर्य मार्जयेन्मुष्ट्या मण्टपे मनुवित्तमः।
प्रक्षाल्य हस्तेन देवेशि पुष्पाणि दद्याद्दिशु च॥ १०४॥
निक्षिप्य मम गायत्र्या चक्रमुद्रां प्रदर्शयेत्।
ससूत्रदर्भमालां च ऊर्ध्वं बोधिद्रुपल्लवैः॥ १०५॥
अस्त्रमन्त्रशतं जप्त्वा वेष्टयेन्मण्टपं शिवे।
अभ्युक्ष्य
~~प्रोक्ष्य~~ पञ्चगव्येन मम मन्त्रेण देशिकः॥ १०६॥
विकीर्य मार्जनं मन्त्री पुनः पूर्वोक्तमन्त्रतः।
गन्धतोयेन संप्रोक्ष्य गुरुरापः पुनस्त्विति॥ १०७॥

द्वारपूजां ततः पश्चात् अक्षतैः कुसुमादिभिः।
अस्त्रतोयेन संप्रोक्ष्य पूर्वादिक्रमतः शिवे ॥ १०८॥
शान्तिभूति बलारोग्य संज्ञाभिस्तोरणान्यसेत्।
भूर्भुवादिक लोकांश्च सोमभौमादिकान् ग्रहान् ॥ १०९॥
शान्तिर्विद्या निवृत्तिश्च प्रतिष्ठा द्वारमूर्धनि।
गणेशं भारतीं लक्ष्मीं सर्वद्वारोपरि न्यसेत् ॥ ११०॥
पूर्वद्वारं समारभ्य शाखयोर्दक्षवामयोः।
नन्द्यादिद्वारपालांश्च गङ्गादिसहितांस्तथा ॥ १११॥
संपूज्य तांश्चतुर्थ्यन्तान् शिवाज्ञां श्रावयेदथ।
यज्ञस्य रक्षणार्थेन स्थातव्यं महदादरैः ॥ ११२॥
वज्रादीनि पताकासु कुमुदादिध्वजेषु च।
पूर्वोक्तान्विन्यसेद्देवि सर्वविघ्नभयंकरान् ॥ ११३॥
द्वारतोरणसंपूज्य प्रार्थयेनमुना गुरुः।
मण्टपं स्तम्भपूजां च प्रारभेत ततः प्रिये ॥ ११४॥
अन्तःस्तम्भप्रदीपेषु आधारादि यथाक्रमम्।
प्रणवादिनमोन्तश्च धर्मादिषु समर्चयेत् ॥ ११५॥
निर्ऋत्यादिघटेष्वेषु द्वारतोरणकुम्भकान्।
यागेश्वरं च दिक्पालान् स्थापयेधुर्जयं प्रिये ॥ ११६॥
लिङ्गं लिङ्गार्धहेमं वा प्रतिमां विन्यसेद्गुरुः।
सुवस्त्रं सुफलं न्यस्त्वा प्रार्थयेद्देशिकोत्तमः ॥ ११७॥
भो भो शक्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
सावधानेन यागान्ते स्थातव्यं तु शिवाज्ञया ॥ ११८॥
सर्वेषां लोकपालानां अनेकक्रमयोगतः।
इति विज्ञाप्य दिक्पालान् यागेशं प्रार्थयेत्ततः ॥ ११९॥

46 शंकराय नमस्तुभ्यं विश्वरूपधराय च ।
मया प्रवर्तितश्चायं लक्षहोमकृते तव ॥१२०॥
लक्षणीय् त्वयैतर्हि समाप्तिं यावदस्य हि ।
इति संप्रार्थ्य यागेशं मन्त्रजैरवकीर्य च ॥
[ततः] संपूज्य वास्तुं च राक्षोघ्नं वास्तुहोमकम् ।
बलिं च दिकिदिके देवि स्वस्वमन्त्रैर्गुरूत्तमः ॥१२२॥
ततः प्रतिसरं बद्धा यागार्थं च यथोक्तवत् ।
आचार्यं यजमानं च ब्राह्मणं च सदस्यकम् ॥
मूर्तिपान् तर्पणं देवि यागेशं प्रतिमादिषु
बध्नीयुरूर्णासूत्रैश्च तन्मन्त्रैश्च पुरोक्तवत् ॥१२४॥
ऊर्णासूत्रेण बध्नीयात्तन्मन्त्रं च पुरोक्तवत् ।
वह्निसाधनकं पश्चात् होतृभिः सह देशिकः ॥१२५॥
सूर्यकान्तोद्भवः श्रेष्ठः काष्ठजो मध्यमं भवेत् ।
श्रोत्रियागारजो वह्निरधमः परिकीर्तितः ॥
सूर्यकान्तशिलाया वा बोधिवृक्षादि वा शिवे ।
आदाय मन्त्रः सारणि कृत्वामरणिकाद्वयम् ॥१२६॥
संयोगः क्रमतः कुर्याच्छिल्पिशास्त्रोक्तमार्गतः ।
त्रिहस्तरज्जुमावेष्ट्य सुदृढं त्रिगुणीकृतम् ॥
गोमयालेपितां भूमिं शतपत्रं सुकर्णिकम् ।
लिखेत्संपूर्णयेच्चूर्णं पञ्चवर्णादिभेदितः ॥
शालिसंपूरयेत्पीठे द्रोणमात्रं महेश्वरि ।
अरणीं विन्यसेत्पीठे दर्भदाम्ना च वेष्टयेत् ॥१३०॥
गन्धपुष्पैः समभ्यर्च्य माचार्यो ऋत्विजैः सह ।
आवयोश्च समावाह्य नैवेद्यान्तं महेश्वरि ॥

मूलमन्त्रजपं कुर्यात्पश्चाद् ब्रह्मादिसूक्तकैः।
मथित्वा प्रणवेनाग्निं तुषकार्पासकादिभिः॥ १३२॥
करीषं च समायोज्य मग्निजालकणादिकैः।
ज्वलयेत्ततो मन्त्री ताम्रपात्रे शरावके॥
अग्निबीजेन चैतन्यं हृद्या संहारमुद्रया।
आदाय योजयेद्विम्बो पूरकेण ततो हृदि॥ १३३?॥
स्थापयेन्मनुना देवि मग्निश्चित्ति मन्त्रतः।
केतुं रूपमहं वह्नि साक्षाद्ब्रह्मस्वरूपकम्।
एवं ध्यात्वा ततो मन्त्री संपूज्य च हुताशनम्।
स्थापयेद्गुरुणा पश्चाद्यजमानं च भ[क्तितः] ॥ १३५॥
5a देवस्य त्वेति मन्त्रेण ऋत्विजां च ततो वदेत्।
रक्षणीयं द्विजश्रेष्ठाः होमार्थं च महेश्वरि॥ १३६॥
इत्युक्त्वा यजमानाय कृताञ्जलिपुटस्थितः।
आचार्यं पूजयेद्भक्त्या शय्यावाहनभूषणैः।
धेनुश्च ऋत्विजां दद्यात् अथ वासांसि ददेत्।
इत्थं दत्वा तु देवेशि वह्निः सुप्रीतको भवेत्॥ १३८॥
ततो जागरणं पश्चाद्वेदपाठ द्विजोत्तमैः।
इत्थं कृत्वा तु देवेशि पुनः सूर्योदयान्तके॥ १३९॥ श्रीः

इति श्री वातुलोत्तरे काम्यखण्डे उमामहेश्वरसंवादे
लक्षहोममण्टपादिविधिर्नाम पञ्च-
चत्वारिंशत्पटलः॥

अथातः संप्रवक्ष्यामि करणानां च लक्षणम्।
कुण्डशोधनपूर्वं च वह्नेर्जननकर्म च॥ १॥

पात्राणां साधनविधिं क्रमेण शृणु पार्वति।
आचार्यस्तु शुचिर्भूत्वा कृत्वा चैवाह्निकक्रियाम्॥ २॥
ऋत्विग्भिः सह देवेशि यागगेहं प्रविश्य च।
संपूज्याद्यौ गणेशानां कलाद्यैस्तोषयेत्ततः॥ ३॥
पुण्याहवाचनं कुर्यान्मूर्तिपैश्च द्विजोत्तमैः।
गत्वा कुण्डान्तिकं मन्त्री विष्टरे पूर्वदिङ्मुखः॥ ४॥
उपविश्य समानीय साधनान्युचितानि वै।
गुरुवन्दनपूर्वादि आत्मशुद्धिं समाचरेत्॥ ५॥
ततो ब्रह्माङ्गमनुना न्यासजालं विधाय च।
तत्र संपूजयेन्मूर्ध्नि स्वगुरून्देशिकोत्तमः॥ ६॥
हृत्पद्मे पूजयेद्देवं गणेशानमथार्चयेत्।
कुण्डशुद्धिं प्रकुर्वीत वक्ष्यमाणेन वर्त्मना॥
मूलमन्त्रं जपन्मन्त्री तत्कुण्डं च समीक्षयेत्।
अस्त्रमन्त्रेण संताड्य दशदिग्बन्धनं ततः॥
संप्रोक्ष्य वर्मणा मन्त्री तारेण खननं शिवे।
मृत्तिके हृन्मन्त्रेण मन्ध् [मुद्ध] रेन्मृत्तिकां ततः॥ ९॥
पूरयेच्च हृदा मन्त्री समीकृत दृशाणुना।
सेचयेदमुना कुर्यात् कुट्टयेदस्त्रमन्त्रतः॥ १०॥
मार्जयेत्कवचेनाम लेपनं हेतिनाणुना।
कलात्मकं कलाभिस्तु सूत्रीकरणं शिवे॥ ११॥
कवचेनार्चयेन्मन्त्री हृन्मन्त्रेण च पार्वति।
अस्त्रेण वज्रीकरणं हृन्मन्त्रेण कुशैस्ततः॥ १२॥
चतुष्पथं तनुत्रेण तनुया दक्षिपाटनम्।
इत्येते कुण्डसंस्कारास्त्वष्टादश महेश्वरि॥ १३॥

चतुरस्रां पुरा कृत्वा कुण्डमध्ये च वालुकैः।
देवस्य त्वेति मन्त्रेण हाग्रकेण शलाकया॥ १४॥
आदाय च लिखेद्रेखां पूर्वाग्रो चोत्तराग्रके।
5b 15b. तिस्रः पूर्वमुखास्तेषां रेखा[स्तिस्रः सौम्यमुखास्तथा॥ १५॥?
ब्रह्मा वैवस्वतः सोमो मध्ये दक्षिणवामयोः It seems the bracketed part may be deleted.
रुद्रो विष्णुश्च शक्तिश्च मध्ये पश्चिमपूर्वयोः॥१६॥]
[Fol. 5b is blank except for one line i.e. slokas 15-16].

Fol. 6a
स्तिस्रः सौम्यमुखास्तथा॥ १५॥
ब्रह्मा वैवस्वतः सोमो मध्ये दक्षिणवामयोः।
रुद्रो विष्णुश्च शक्तिश्च मध्ये पश्चिमपूर्वयोः॥ १६॥
ब्रह्मजज्ञानमन्त्रेण नाके मनुयया क्रमम्।
षड्रेखां च लिखेन्मन्त्री भूर्भुवःस्वश्च महेश्वरि॥ १७॥
गन्धपुष्पादिभिश्चैव ततो नाम्नैव पूजयेत्
ततो मन्त्रं समुद्धृत्य पूर्वाग्रो चो[त्त]राग्रके॥ १८।
भवत्येकोनपञ्चाशत्पदान्यत्र तथा स्फुटम्।
वह्नीशानकोष्ठादि तन्मध्ये च महेश्वरि॥ १९॥
मातृकावर्णसंलेख्य दक्षिणे तु देशिकः।
तन्मध्येऽष्टदलं पद्मं कर्णिकाकेसरैर्युतम्॥ २०॥
विष्टरार्थं सुकूर्चं तु विंशद्दर्भकृतं ततः।
पीठपूजां च तत्रैव मावाह्य पुरुषं परम्॥
ततः पार्श्वे महादेव्या चिन्तयेत् गुरुप्रिये।
द्विनेत्रां द्विभुजां रम्यां पीनोन्नतपयोधराम्॥
मुक्ताभरणसंयुक्तां पद्महस्तां सुलोचनाम्
शुद्धस्फटिकसंकाशां रत्नवासोभिभूषिताम्। (सोवि)

ऋतुस्नातां सुकुचस्थां वागीशस्य च वामके ॥ २४ ॥
कारणं जगतां देवं सर्वज्ञं सर्वसाक्षिणम् ।
अनादिनिधनं रुद्रं साक्षाद्ब्रह्मस्वरूपिणम् ॥ २५ ॥
एवं ध्यात्वा ततो मन्त्री समभ्यर्च्य च महेश्वरि ।
देवदेव्यौ च संपूज्य मूलमन्त्रेण पार्वति ॥ २६ ॥
पाद्यमर्घ्यादिकं दद्यात् कुङ्कुमं रक्तचन्दनम् ।
रक्तपद्मानि संपूज्य धूपदीपादिकं प्रिये ॥ २७ ॥
शिवबीजेन तारादिनमोऽन्तेन ततः परम् ।
तदेकतां समापन्नां भावयेत्तां विचिन्तयेत् ॥ २८ ॥
दर्शयेद्योनिमुद्रां च लिङ्गमुद्रां तया सह ।
इत्येवं मनसा भाव्य क्रीडार्थं च प्रदर्शयेत् ॥ २९ ॥
तदा रतिस्तयोर्यावत् तावदग्निमयो गुरुः ।
पाणिना स्वाम्भसा योनिं संमृज्यादस्त्रमन्त्रतः ॥ ३० ॥
पश्चाद्देवस्य देव्याश्च दद्यादाचमनीयकम् ।
बध्नीयाद् गर्भरक्षार्थं दर्भकङ्कणवत्करे ॥
प्रतिकृत्यचत्र राभ्रेण बध्नीयान्मूलमन्त्रतः ।
साधितं च ततो वह्निं भस्मधूमादिवर्जितम् ।
गुरुपत्न्या च ऋत्विग्भिः आदाय च महेश्वरि ।
66 कुण्डयोनौ प्रविन्यस्य वैष्णवैः मन्त्रतः ॥
वह्निबीजं जपन्मन्त्री क्रव्यादांशं परित्यजेत् ।
अस्त्रमन्त्रेण संप्रोक्ष्य दर्भं कुशादिविचक्षणैः ॥ ३४ ॥
शोधयेदुत्प्लावनानि तत्तन्मन्त्रेण पार्वति ।
अङ्कुञ्चनं ततो दीप्तं वह्निः पिङ्गलया गुरुः ॥ ३५ ॥
यवर्गस्य द्वितीया तु बिन्दुना भूषितं च यत् ।

वह्निबीजमिदं प्रोक्तं बिन्दुं च समुच्चरेत् ॥ ३६॥
विभाव्य निर्गतं तत्र योजयेदानलाननम्।
स्पृष्ट्वा दर्भद्वयेनैव जप्त्वा तारेण चाष्टशः ॥ ३७॥
धेनुमुद्रां प्रदर्श्याथ रक्षयेदस्त्रमन्त्रतः।
अवकुण्ठ्य तनुत्रेण मूलमन्त्रेण पार्वति ॥ ३८॥
पञ्चोपचारैरभ्यर्च्य जानुयुग्मं महीतले।
कुण्डोर्ध्वं त्रिः परिभ्राम्य मूलमन्त्रमनुस्मरन् ॥ ३९॥
तन्मध्ये विन्यसेदग्निमात्मनोऽभिमुखं गुरुः।
संप्रोक्ष्य काष्ठं शिरसा निक्षिपेच्च महेश्वरि ॥ ४०॥
चित्पिङ्गलं च मनुना ज्वलयेदनलं शनैः।
व्यजनं धमनी वापि प्रणवेनमन्त्रवित्तमः ॥ ४१॥
अग्निं प्रज्वलितं वन्दे मनुनानेन प्राञ्जलिः।
प्रार्थयित्वा मुपस्थाय गुरुस्तन्मुपसीदति ॥ ४२॥
गुरुवन्दनपूर्वं च दद्यादिग्बन्धनं ततः।
ततो न्यासं विधायाथ कृशानो मन्त्रभिन्न्यसेत्॥
जिह्वाङ्गमूर्तिमनुभिः हिरण्यादि यथा क्रमम्।
लिङ्गे पादे [दे] तथा मूर्ध्नि वदने च गुरूत्तमः ॥ ४४॥
नासिकानयनद्वन्द्वे सर्वाङ्गेषु च विन्यसेत् ४ आदि ?
मङ्गविन्यासं हृदयादिन्यसे गुरुः ॥ ४५॥
जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः।
धूम्रावृतये पदान्ताश्च ओं नमोऽन्ताः क्रमादमून् ॥ ४६॥
मूर्ध्नि सपार्श्व कट्यादि प्रदक्षिण वशा हृदः।
इत्थं न्यासं विधायाथ प्राणायामं समाचरेत् ॥ ४७॥
पञ्च संख्य समिद्भिश्च साधयेच्च महेश्वरि।

ततः संकल्पमुच्चार्य जुहुयाच्च पृथक्पृथक् ॥ ४८॥
सद्योजातादिभिर्मन्त्रैः समिद्भिश्च यथाक्रमम् ।
7a इध्मबन्धनरज्जुश्च नद्धा चैकीकृतं प्रिये ॥ ४९॥
अष्टादश कुमन्तिस्रो कृष्णमान समुच्छ्रितः ।
अष्टोत्तरसहस्रं वा परिस्तरणदर्भकैः ॥ ५०॥
षडङ्गुलसुविस्तारं मुष्टिदर्भं शतं गुरुः ।
रज्जू द्वे तत्र संख्येन प्रोक्षणी सप्तदर्भकैः ॥ ५१॥
प्रणीता नवदर्भैश्च द्वादशैर्बर्हिकूर्चकम् ।
स्रुक्स्रुवौ मार्जनं सप्त ह्याज्यसंस्कारके कुशैः ॥ ५२।
द्वे दर्भे चरुशुद्धिः स्यात् पात्राणां साधनार्थके ।
शतार्धं च तदर्धं वा कुशकूर्चिः विधीयते ॥ ५३॥
स्वर्णं वा राजतं वापि ताम्रं वाथ शरावकम् ।
कुडिप्रस्थमेकं वा तन्न्यूनं च न कारयेत् ॥ ५४।
स्रुक्स्रुवौ हस्तमात्रौ च शुक्तिमात्राप्रपूरितम् ।
एतत्पात्राणि संपाद्य काष्ठभिन्नानि वर्जयेत् ॥ ५५॥
ततः परिसमूह्याग्निं जुहोद इति मन्त्रतः ।
परिषिच्य जलेनाथ मूलमन्त्रेण देशिकः ॥ ५६।
दिक्षु परिस्तरणं कुर्यात् देवस्य त्वेति मन्त्रतः ।
दक्षिणानुत्तरां देवि नुत्तरानधरान्गुरुः ॥ ५७॥
मेखलोपरि मध्ये तु विन्यसेच्च यथाक्रमम् ।
पात्राणां साधयेत्पश्चात् कुण्डस्योत्तरपार्श्वगे ॥
भूतले कुशानास्तीर्य प्रणीतां प्रोक्षणीं तथा ।
आज्यपात्रं चरुस्थालीं स्रुक्स्रुवौ कुशमुष्टिकम् ॥ ५८।
इध्म प्रवृश्चनं देवि साधयेद्देशिकोत्तमः ।

इन्दुरूपेण हस्ताभ्यां मन्त्रेणाम्भिश्चामृतम् ॥ ६० ॥
अर्घ्योदकेन संप्रोक्ष्य दर्शयेदस्त्रमुद्रिकाम्
प्रोक्षणीमुन्मुखं कृत्वा सुकूर्चं विन्यसेत्ततः ॥ ६१ ॥
जलेनापः पुनर्न्वेति पूरयेद्धेनुमुद्रया।
कराभ्यां तत्रिरुत्पूयात्तज्जलैः प्रोक्ष्य शास्त्रतः ॥ ६२ ॥
इध्मं विसृज्य ग्रन्थिं च वर्मणा च महेश्वरि।
पात्राण्येतानि तभ्युक्ष्य मुन्मुखीकृत्य प्रोक्षयेत् ॥ ६३ ॥
दक्षिणे पद्मपीठं च दर्भकूर्चं न्यसेत्ततः।
आवाह्य च द्विजश्रेष्ठं भूपते तव मन्त्रतः ॥ ६४ ॥
अग्रावसोः समावाह्य गन्धपुष्पैः समर्चयेत्
तत्पुरस्तात्प्रणीतानां निधायाद्भिः प्रपूरयेत् ॥ ६५ ॥
ब्रह्मबीजेन मन्त्रेण सिदमग्नेन्त्रपात् ?
आवाह्य वरुणं पश्चात् वरुणं च समर्चयेत् ॥ ६६ ॥
7b दौ कुश्यां नासान्तमुद्धृत्य ब्राह्मणस्याप्यनुज्ञया।
धनेश्वरतयोर्मध्ये पूर्व(पी)ठ कुशोपरि ॥ ६७ ॥
निधाय दर्भमाच्छाद्य मत्स्यवारं जपेद्गुरुः।
घृतस्थालीं समादाय प्रोक्षयेदस्त्रमन्त्रतः ॥ ६८ ॥
तत्र गोघृतमापूर्य नेत्रमन्त्रेण वीक्षयेत्।
वायव्यां दिशि मास्थाप्य मेखलस्य समीपतः ॥ ६९ ॥
अग्नावुपरि तान्यस्य हृन्मन्त्रेण प्रतापयेत्
दर्भद्वये(न) संदीप्य तदग्नौ च विनिक्षिपेत् ॥ ७० ॥
पुनर्दर्भद्वये देवि तदग्राणि विनिक्षिपेत्
तन्मन्त्रेण च नीराज्यं तदग्नौ निक्षिपेद्गुरुः ॥
पुनर्दर्भद्वयान्मन्त्र मस्त्रमन्त्रेण पावनि।

~~कुन्दमध्य~~ निवारं दर्शयित्वा तु समुमाग्नौ विनिक्षिपेत्॥ ७२॥
आदाय योनौ निम्नस्य अङ्गारान्सह योजयेत्।
दर्भौ प्रादेशमात्रेण मध्ये ग्रन्थियुतेन च॥ ७३॥
शुक्रमस्येति मन्त्रेण वह्निमध्ये च निक्षिपेत्।
चरुं च श्रावयेत्पश्चात् निर्वपामीति मन्त्रतः॥ ७४॥
अग्नये वोच जुष्टन्व प्रोक्षये अग्नये तथा।
वो जुष्टं निर्वपामीति देवतं च प्रधानकम्॥ ७५॥
निवारमिति मुक्त्वार्य दर्भौ संदर्शमामयेत्।
अभिघार्यो नरेन्यस्य जननाग्निर्न कर्म च॥ ७६॥
स्रुक्स्रुवौ शोधयेत्पश्चात् दक्षणामकरद्वयं।
अग्रमध्ये च मूलेषु कुशयुग्मस्य शोधयेत्॥ ७७॥
अग्नौ निक्षिप्य संमृज्य मूलमन्त्रेण वै शिवः।
एवमेव स्रुचं शोध्य न्यसेन्नैव तान्पुनः॥ ७८॥
परिधिं समिधं न्यस्य कवचेन हृद्ये गुरुः।
अनुयाजसमित्रग प्रणीतोर्ध्वे न्यसेद्गुरुः॥ ७९॥
पावकं गन्धपुष्पाद्यैः जिह्वादि परिपूजयेत्।
लोकपालादिकान्पूज्य कुण्डमेखलदेवताः॥ ८०॥
ब्राह्मी वज्री तथा चैन्द्री धन्वी रक्षी महेश्वरी।
शबला च तथा वेगा क्रमात्कुण्डादि देवताः॥ ८१॥
परिधिं परिस्तरं देवि ब्रह्माणं च यथाक्रमम्।
वाणीं लक्ष्मीं पार्वतीं च क्रमादावाह्य पूजयेत्॥ ८२॥
४a समिधं च ततो हुत्वा परिषेचनमारभेत्।
अदितेत्यादि मन्त्रेण परितश्च यथाक्रमम्॥ ८३॥
अग्नये जातवेदाश्च अर्चयेदुपसर्गतः।

गाग्रे पञ्चदशी होमं तु गन्धपुष्पैः समर्चयेत्॥ ८४॥
प्रणीतायामिमं रज्जुं न्यसेद्गुलयवन्तला।
समित्समूह मार्जनं सम्मृगाग्र्याग्य देशिकः॥ ८५॥
त्रिशीर्षं चैकहृदयं चतुःश्रोत्रं त्रिनासिकम्।
षडास्ये [आस्यः] द्वयं च षण्णेत्रं पिङ्गलं सप्तहस्तकम्॥ ८६॥
त्रिमेखलं त्रिपदं च सप्तजिह्वाभिरावृतम्।
चतुःशृङ्गं वृषारूढं बालादित्यसमप्रभम्॥ ८७।
उपवीतसमायुक्तं जटामकुटमण्डितम्।
सव्यभागे चतुर्हस्तं त्रिहस्तमपसव्यके। ८८॥
स्रुक्स्रुवौ चाक्षमालां च शक्तिं दक्षिणहस्तके।
तोमरं व्यजनं चैव घृतपात्रं तु वामके॥ ८९॥
एवं ध्यात्वा ततो मन्त्री ब्रह्मणोत्तुर्या गुरा।
इध्महोमं ततः पश्चात् स्रुवेणाज्यं हृदाणुना॥ ९०॥
नाडीसन्धौ तु विज्ञेया वक्त्रोद्घाटनमादरात्।
दक्षनेत्रेऽग्नये स्वाहेत्युच्चरन् जुहुयाद्गुरुः॥ ९०
वामतस्त्वाज्यमादाय वह्नेर्वामविलोचने।
हृदा जुहोत् सोमाय स्वाहेति च गुरुः प्रिये॥
मध्यनेत्रे ततो वह्नेर्गृहीत्वा मध्यतो घृतम्।
अग्नीषोमाभ्यां स्वाहेति स्रुवमन्त्रेण नेत्रतः॥ ९४॥?
घृतमादाय देवेशि दक्षभागाद्धृताणुना।
वह्निवक्त्रेऽग्नये स्विष्टकृते स्वाहेति होमयेत्॥ ९५॥
वह्निमन्त्रे ततो हुत गत्वा षडाहुतिभिस्तिथः।
जुहुयाज्जन्मूर्ति मनुभिर्जुहुयाच्च यथाक्रमम्॥ ९६॥
ऋषिविज्ञुम मन्त्राणि संजल्पेच गुरुः प्रिये।

आद्यौ मूलेन संपूज्य मुपचारैश्च देशिकः॥ ९८।
जुहुयात्समिधः पश्चात्तन्मूल मनुवित्तमः।
अष्टाष्टाज्याहुतीर्हुत्वा क्रमेण च पृथक्पृथक्॥ ९८॥
गर्भाधानादिका कार्या विवाहान्ताः क्रियाः क्रमात्।
गर्भाधानं पुंसवनं सीमन्तं बलजातके॥ ९९
स्यान्नामकरणं पश्चा दुप निष्क्रामणं ततः।
अन्नप्राशनकं चौडं मुपनीतं ततो गुरुः॥
चत्वारि वेदप्रथित व्रतानि स्नानकर्म च।
विवाहान्तमिति प्रोक्तं गर्भाधानादिकर्मणाम्॥
पश्चात्कर्म करोमीति प्रत्येकं समिधं हुनेत्।
आज्येन होमयेदन्ते वह्नौ पूर्णाहुतिं हुनेत्। १००॥?
ततः सूतकशुद्ध्यर्थं जातकर्मविधौ कृते।
8-6 तत्परिस्तरणादीनि साधनानि परित्यजेत्॥ १०१॥
संप्रोक्ष्य गोमयजलैः तत्कुण्डं च महेश्वरि।
पूर्ववत्साधनं कुर्या यथावदनुदेशिकः॥ १०२॥
जिह्वामन्त्रैर्मूर्तिमन्त्रैः दशभेदविभेदितैः।
महागणपतेर्मन्त्रैः पूर्वपूर्वापि तैर्हुनेत्॥ १०३।
पीठ पूजाय तद्वह्नौ देवं ध्यात्वा ततो गुरुः।
उद्दिश्य देवतारूपं यजेत्सावरणादिकैः॥ १०४॥
संमुखीकरणार्थं च पञ्चविंशाहुतीर्हुनेत्।
देवतात्म्यात्मना मैक्यं भावयेन्मूलमन्त्रतः॥ १०५॥
एकादशाहुतीर्नाडीसंधानाय हुनेत्ततः।
एकैकमाहुतीनां च देवताभ्यां घृताहुतीः॥ १०६॥
इत्येवं च गुरुः कुर्याद्वह्नेर्जननकर्मणि।

न कुर्याच्च हुनेद्धोमं तद्धोमं निष्फलं भवेत्

इति श्रीवातुलागमे उमामहेश्वरसंवादे कर्मखण्डे
अग्निजननविधानं नाम पञ्च-
चत्वा
चात्वारिंशत्पटलः ॥ श्रीः ।

*

अतः परं प्रवक्ष्यामि मूर्तिपैः सहितो गुरुः ।
द्रव्यहोमादिपूर्णान्तं तर्पणं शुभपूजनम् ॥
अन्तर्जपं तत्फलं च क्रमेण शृणु पार्वति ।
मण्टपे तत्र कुण्डेषु मूर्तिपांश्चोपविश्य च ॥ २ ॥
आसनादिविशुद्धिं च न्यासं कुर्यान्महेश्वरि ।
कुण्डशुद्धिं प्रकुर्वीत सद्योजातादिपञ्चकैः ॥ ३ ।
शोधनं खननं चैव शोषणं प्लावनं तथा ।
अभ्युक्षणं च पञ्चैतं स्वन्यकुण्डेषु संस्मरेः ॥ ४ ।
आचार्यकुण्डा(ण्ड)दनलं पूर्वादि विहरेत्ततः ।
अग्निमीळेति मन्त्रेण पूर्वोपस्थाय चानलम् ॥ ५ ॥
इषेत्वोर्जेति मन्त्रेण । आग्नेय्यां च न्यसेत्ततः ।
दक्षिणे च त्वमग्नेति सुपत्वाग्ने च नैर्ऋते ॥
वारुणे जातवेदादि वायव्ये व्याहृतं प्रिये ।
अग्निं दूतं चोत्तरे च अग्निमग्नीति चैशके ॥
9a विहृतेदनले पश्चात् प्राणायामं समाचरेत्
जिह्वाङ्गमूर्तिन्यासादि ततः संकल्पपूर्वकम् ॥
हुत्वा द्रव्याणि संख्याभि देवतानां समाचरेत् ।
अन्वाधानादि देवेभ्यो गुरुमूर्तिधराः पृथक् ॥ ६ ॥
स्वस्वकुण्डे च तैः सर्वैस्तत्वा श्रावयेत्क्रमात् ।

चरुं विना न कर्तव्यं प्रणीता कुशपञ्चकम् ॥ १० ॥
परिधिं च महेशानि मूर्तिपेऽस्य न कारयेत्
भवाद्यं मूर्तिनामाद्यं पूजयेत्पीठमन्त्रकैः ॥ ११ ॥
शाक्तिकाश्च जुहुयुः जिह्वादिमनुभिस्तथा ।
ऋत्विजो देशिकाश्चैव कपृच्छन्ध्रांसि मूलतः ॥
पक्वाहुतिं च जुहुयुः पञ्चभिश्चाग्घृताहुतिम्
द्रव्याणामाहुतिं पश्चात् जुहुयुर्देशिकादिकाः ॥
हृदये वंशमन्यं च मूर्द्धे वृष्टिना शतम्
कटौ तु स्थानवाशं च जानुमुच्चाटनं भवेत् ॥ १४ ॥
मरणं पादमूले तु जिह्वायां सर्वकामदम्
तस्मादग्नेर्विशेषेण जिह्वायां होममाचरेत् ॥ १५ ॥
हुत्वा मुद्रां च देवेशि वृषि हंसी च सूकरी ।
मयूरी कुक्कुटी चैव होमद्रव्य ग्रहे प्रिये ॥ १६ ॥
मुद्राहीनस्तु यो होमः स सर्वो निष्फलं भवेत्
आज्यं समिद्धनिश्चैव गोधूमं सर्षपं शिवे ॥ १७ ॥
तिलं च तुटिकं लाजान् सक्तुं क्षीरं दश क्रमात्
द्विसहस्रं गोघृतं च कुडुपं च महेश्वरि ॥ १८ ॥
पालाशी खादिरी वाथ षडङ्गुलसुविस्तृता ।
अनाद्रा वक्रहीना च शोभिता च समिद्भवेत् ॥ १९ ॥
शाल्युद्भवैस्तण्डुलैश्च प्रस्थपञ्चशतं भवेत्
हरिद्रासंयुतं पक्वं क्लिष्टदोषादिवर्जितम् ॥ २० ॥
गोधूमादि द्रव्यमहन्तद्रव्यं दर्धं परिकीर्तितम्
क्षालितं शोधितं पात्रे पूरयेन्मूलमन्त्रतः ॥ २१ ॥
उद्दिश्य देवतामन्त्रं प्रणवादियथाक्रमम् ।

मूलमन्त्रं च जुहुयात् क्रममूर्तिधराः पृथक् ॥ २२ ॥
सहस्रोत्तरं पञ्चशतं चाष्टमूर्तिगुरुं प्रिये।
प्रधानकुण्डे जुहुयाद्देशत्यागपूर्वकम् ॥
होमयेन्मूर्तिपास्तेषु पृथक्कुण्डाष्टके पुनः।
सहस्रं त्रिशतं देवि दशसप्तचतुस्तथा ॥ २४ ॥
मूर्तिपाङ्गं पृथग्घोमो दिनं प्रति दिनं प्रति।
१८ पृथग्द्रव्यं लक्षमितं पूर्वाज्यं च परान्यकम् ॥ २५ ॥
उत्तमं च हुनेद्धोममुद्दिश्य दिवसात्मकम्।
दश द्रव्याणि वा देवि हुनेल्लक्षं गुरूत्तमः ॥ २६ ॥
द्रव्यान्ते होमयेदाज्यं मध्यमं च महेश्वरि।
सर्वद्रव्यं हुनेल्लक्षं मधमं परिकीर्तितम् ॥ २७ ॥
ततो वै देवदिकामध्ये पञ्चविंशोत्तरं शतम्।
पदं पूर्वोक्तवत्कुर्यात् पद्ममालिख्य देशिकः ॥ २८ ॥
पञ्चवर्णकचूर्णैश्च पूरयेत्तु पृथक्पृथक्।
शालितण्डुलमापूर्य द्रोणार्धं च तदर्धकम् ॥ २९ ॥
प्रस्थप्रस्थं च सर्वेषां प्रधानादि यथाक्रमम्।
स्वर्णादिकुम्भं संगृह्य पञ्चविंशोत्तरं शतम् ॥ ३० ॥
द्रोणवारिघृतकुम्भं तदर्धं च तदर्धकम्।
अन्येषां पूरितं प्रस्थं छिद्रभिन्नादिवर्जितम् ॥ ३१ ॥
क्षालितान्कलशान्देवि अस्त्रमन्त्रेण देशिकः।
वर्मणा तन्तुना वेष्ट्य धूपैः संधूप्य मूलतः ॥ ३२ ॥
स्थापयेत्कलशं पश्चात् कवचेन महेश्वरि।
अधोमुखं च कुम्भं च पूजयेत्तु कलात्मकम् ॥ ३३ ॥
अस्त्रमन्त्रेण संप्रोक्ष्य कुम्भमुद्धृत्य चोन्मुखम्।

षट्त्रिंशद्दर्भकूर्चं च पञ्चविंशतकूर्चकम् ।
सप्तविंशतिकूर्चं च पञ्च पञ्च यथाक्रमम् ।
दर्भकूर्चं च विन्यस्य पयसा पूरयेद्घटम् ॥ ३५ ॥
शालिनाभ्यष्टगन्धं च पञ्चगव्यं कुशोदकम् ।
पञ्चामृतं कषायं च पूरयेन्निर्मलोदकम् ॥ ३६ ॥
नवरत्नं पञ्चरत्नं विन्यसेन्मातृकादिकान् ।
दशनिष्कं सुनिष्ककम् ॥ ?
निष्केण प्रतिमां हैम्नां बहिरावरणे न्यसेत् ॥ ३८ ॥
पर्णेन हेम्ना प्रतिमामन्येषु कलशेषु च ।
विन्यसेत्प्राणमन्त्रेण औषधानि विनिक्षिपेत् ।
चूतपल्लवमेतेषु विन्यसेन्नेत्रमन्त्रतः ।
नालिकेरफलं न्यस्त्वा कवचेन महेश्वरि ॥ ४०
दुकूलवाससाच्छाद्य मस्त्रमन्त्रेण पार्वति ।
विचित्रैर्नववासोभिः श्वेतवस्त्रैर्यथाक्रमम् ॥ ४१ ॥
सर्वकुम्भान्समाच्छाद्य कूर्चं शिरसि मन्त्रकम् ।
10a प्राणायामादिविन्यासं पीठपूजां समाचरेत् ॥
कुम्भेष्वावाह्य देवेशान् विघ्नेशादि यथाक्रमम् ।
सर्वान्देवान्समावाह्य प्रथमावरणादिकान् ॥ ४२ ॥
पञ्चविंशोत्तरशतमावाह्याभ्यर्च्य तान्त्रिकः ।
कलान्संपूज्य देवेशि षट्त्रिंशत्तत्त्वमन्त्रतः ।
पञ्चब्रह्मषडङ्गाद्युपचारैः समर्चयेत् ।
दशविप्रांश्च परितो जपेयुर्मूलमन्त्रतः ॥ ४५ ॥
सहस्रं पञ्चविंशत्या ऋष्यादिन्यासपूर्वकम् ।
चतुरस्रा चतुर्दिक्षु गणेशं क्षेत्रपालकम् ॥ ४६ ॥

दुर्गामन्त्रं च वाणीं च प्रसादं च त्रियम्बकम्।
भुवनेशीं च वास्तुं च रक्षोघ्नं च नवग्रहान्। ४७॥
श्रीरुद्रं पावमानं च श्रीसूक्तं विष्णुसूक्तकम्।
भूसूक्तं हरिसूक्तं च घृतसूक्तमनुं ततः॥ ४८॥
जपेत्सप्तशतीं देवि वक्तिच यथाक्रमम्।
चतुर्द्वारे चतुर्वेदान् वदेयुश्चसुरोत्तमान्॥ ४९॥
तर्पयेत्सौम्यदिग्भागे दशांशश्च पयोम्बुभिः।
दशविप्रांश्चोपविश्य पद्मसालिख्य मण्डले॥ ५०॥
शालितण्डुलमापूर्य तत्रपात्राणि विन्यसेत्।
पयसा वारिणापूर्य गन्धपुष्पं च निक्षिपेत्॥ ५१॥
आवाह्य पूजयेद्देवं तर्पयेत्तिलतण्डुलैः।
सहस्रं द्विशतं सार्धमाज्ञो मूलाणुना पुनः। ५२॥ [३?]
यावद्धोमावसानान्तं तावं कुर्यान्महेश्वरि।
होमान्ते स्विष्टिकृद्धोमो यदस्यत्येणुना गुरुः॥ ५२॥
कृत्वानुयाजसमिधं रज्जुं हुत्वा ततः परम्।
जयादींश्च ततो हुत्वा प्रायश्चित्ताहुतिं ततः॥ ५४॥
ततो महाव्याहृतीभिरेकैकां सर्पिषाहुतिः।
ततः पूर्णाहुतिं देवि कल्याणं च विसृज्य च॥ ५५॥
होमं समापयेदन्ते बलिदानं समाचरेत्।
नवपिण्डान्प्रकुर्वीत साज्येन हविषा ततः॥
गुरुकुण्डादिमाभ्यर्च्य काष्ठे दीपान्प्रदाय च।
वेदिकुम्भान्यजेत्पश्चात् आचार्यो यजमानकः॥ ५६।
शिष्यमाहूय तत्कुम्भं प्रधानं च महेश्वरि।
शिरसा धारयेद्धि वेदमङ्गलनिःस्वनैः॥ ५७।

सर्वान्कुम्भान्समादाय मूर्तिपादिद्विजोत्तमैः।
प्रदक्षिणवशान्मन्त्री धरमन्त्रः प्रवेशयेत्। ५९॥
लिङ्गं संपूज्य मूलेन प्रधानादि यथाक्रमम्।
तस्यां सूक्तेन संसिच्येन्मूलमन्त्रेण पार्वति॥ ६०॥
महापूजा प्रकर्तव्या प्रागुक्तेन महेश्वरि।
10B सर्वेभ्यश्च बलिं दत्वा तत्सर्वं च समर्पयेत्॥ ६१॥
सहस्रद्वितानं सार्धं भूसुरान्भोजयेत्प्रिये।
शाल्यान्नं सघृतं क्षीरं सूपशाकसमन्वितम्। ६२॥
भक्ष्यं पायससुक्षीरं शर्करामधुसंयुतम्।
भुक्तेषु तेषु देवेशि ताम्बूलं च प्रदापयेत्॥ ६३॥
मन्त्राशीर्वचनं ग्राह्यं यजमानेन भक्तितः।
एवमेव समुद्दिश्य दिनान्तं च दिने दिने॥ ६४॥
पूर्णाहुतिस्तदन्ते तु कृत्वा यावपूर्यक्रियाम्।
विसृज्य कङ्कणं पश्चाच्छुद्धस्नानं समाचरेत्। ६५॥
यागगेहं प्रविश्याथ गुरुकुण्डसमीपतः।
भूसुरेभ्यश्चोपविश्य यजमानो गुरुः प्रिये॥ ६६॥
गोभूम्यादीनि दानानि छागं च महिषं तथा।
स्वर्णं च तिलतैलं च स्वनड्वाहं च दापयेत्॥ ६७॥
पुष्पं फलं च ताम्बूलं पानीयं शयनादिकम्।
दध्योदनं यज्ञसूत्रं कन्यादानं महेश्वरि। ६८॥
व्यजनं पादुकं छत्रं चामरं स्वर्णकुम्भकम्।
तदन्ते गुप्तदानं च कृष्णं दद्यान्महेश्वरि॥ ६९॥
भूसुराणां देशिकादि दक्षिणां विविधं पुनः।
पञ्चविंशतिनिष्कं च व्यजनं वाहनं तथा॥ ७०॥

छत्रं च चामरं चैव तत्रोपकरणैः सह।
गृहदानं च दासं च दैशिकाय प्रदापयेत्।
तदुक्तं तान्त्रिकायाथ दद्याद्विभवविस्तरम्।
सप्तं च दशनिष्कं च पर्यङ्कं शय्ययावृतम्।
सर्वं गृहं महेशानि आचार्याय प्रदापयेत्॥
दशनिष्कं सुवर्णं च ब्रह्मणे दापयेत्प्रिये॥७२। ३?
सप्तनिष्कं पादुकं च सदस्याय प्रदापयेत्।
मूर्तीशानां पञ्चनिष्कं पृथग्दद्यात्तु कुण्डलम्॥७४॥
सार्धं निष्कं द्विजातिभ्यः तर्पकेभ्यः पृथक्पृथक्।
सार्धनिष्कं द्वियं वेदघोषकाणां ~~पृथक्पृथक्~~ प्रदापयेत्॥७५॥
जापकानां सार्धनिष्कं मूलमन्त्रस्य पार्वती।
अन्येषां जापकादीनां चाराणां निष्कमुच्यते॥
पादक्षिणकृतां चैव पूजकानां तथैव च।
दीनान्धबधिरादीनां यथाशक्त्या च दक्षिणाम्॥७६॥
इति दत्वा क्रमेणैव संपूर्णं फलमश्नुते।
उक्तार्धे च फलार्धः स्यादुक्तांशे च फलांशकम्॥७८।
ज्ञात्वा धर्ममिति प्राज्ञो स्वयंशास्याभिवृद्धये।
॥९ लक्षहोममिमं देवि यः कुर्याच्च नृपोत्तमः॥
ब्रह्महत्यादिपापं च सर्वमृत्युनिवारणम्।
सर्वदुःखोपशमनं सर्वदा मङ्गलप्रदम्॥८०॥
सर्वशान्तिकरं ज्ञेयं पुत्रपौत्राभिवृद्धिदम्।
तुष्टिपुष्टिप्रदं देवि कीर्तिदं कान्तिवृद्धिदम्॥८१॥
आयुर्वृद्धिकरं सौख्यं सर्वत्र विजयी भवेत्।
भूमिदानेन यत्पुण्यं तत्फलं बहुभिर्मखैः॥

देहान्ते मम सायुज्यं त्रिसप्तकुलसंयुतः।
कामितार्थफलं शीघ्रं सत्यं सत्यं मयोदितम्॥ ७२॥

इति श्रीवातुलागमे महेश्वरसंवादे काम्यखण्डे
लक्षकर्मविधिविवरविधानं नाम
सप्तचत्वारिंशत्पटलः॥

✕

यस्मिन्देवे भवेद्देवि नित्यकार्ये बलिद्वयम्।
तथा नैमित्तिके मन्त्री त्रिकालं बलिमाहरेत्॥ १।
नित्ये वा वर्तमाने तु त्रिकालं बलिकर्मणि।
तथा नैमित्तिकं कुर्यान्नित्यबल्या सहैव तु॥ २।
अथवान्यप्रकारेण भवेन्नैमित्तिको बलिः।
प्रातरेव विनिर्वर्त्य बलिं नित्यं महेश्वरि॥ ३।
मध्याह्ने चैव सायाह्ने (चैव सन्ध्या) बलिं नैमित्तिकं भवेत्।
नित्यमात्रे विनिर्वर्त्य बलिं नाडीद्वयात्परम्॥ ४।
नैमित्तिकबलिं मन्त्री प्रकुर्यादेवमेव वा।
काम्ये बलिविधौ देवि विशेषं किञ्चिदिष्यते॥ ५॥
मध्याह्ने वाथ सायाह्ने कुर्यान्नह्निस्त्रयेऽपि वा।
नित्यबल्या सहैवाथ पृथग्वा पूर्ववद्बलिम्॥ ६।
एवं नित्यादिके देवि बलिमेव इतीरिताः।
परिवारामराश्चैव संतृप्तिनित्यकर्मणाम्॥ ७।
परिपूर्णफलावाप्तिर्देवस्य च भवेद्यतः।
सुखं च सर्वजन्तूनां तस्मान्नित्यं चरेद्बलिम्॥ ८।
ब्रह्मलोकादिलोकेषु संस्थिता ये सुरादिकाः।
तेषां प्रीतिर्भवेत्येन भूपतेः सर्वसंपदः॥ ९।

शिवस्यातिप्रियः कुर्यात्तस्मान्नैमित्तिकं बलिम्।
कर्तुः काम्यफलावाप्तिः सर्वशत्रुनिवारणम्॥ १०॥
सर्वशान्तिर्भवे . . . काम्यबलिं चरेत्।
पूर्वाह्णे ब्रह्मणः प्रीति विष्णोर्मध्यं दिने भवेत्॥११॥
सायाह्ने शंकरस्यैव बलिदानं हि पार्वति।
॥८ . . . . . इन तस्मात्काम्यबलिं चरेत्।
(पूर्वाह्णे ब्रह्मणः ~~प्री~~ प्रीतिः विष्णोर्मध्यं दिने भवेत्॥११॥
सायाह्ने शंकरस्यैव बलिदानं हि पार्वति।) repeated in the original itself
सृष्ट्यादिभेदतः कल्प्य बलिकालत्रयं त्रिधा॥ १२।
अत्राधिदेवा विज्ञेया ब्रह्मा विष्णुः शिवस्तथा।
द्विवारं च त्रिवारं च चतुर्वारं पृथक्पृथक्॥ १३॥
नित्ये नैमित्तिके काम्ये देवताभ्यो बलिं हरेत्।
✓ अतः परं प्रवक्ष्यामि कालभेदेन सांप्रतम्॥
शिवादीनां च देवानां क्रमेण शृणु पार्वति। १॥
नित्या[दि]कर्मभेदेषु बलिदानविनिर्णयम्॥
बलिभुग्देवताश्चापि बलिद्रव्यं तथैव च॥ २॥
बलिमन्त्रांश्च बल्युक्तवारानि त्रिविधानि च।
इन्द्रादितालगानानां सामान्यञ्च वदाम्यहम्॥ ३॥
तृप्त्यर्थं सर्वदेवानां सुखार्थं सर्वदेहिनाम्।
राज्ञां विजयराज्यश्रीपुत्रायुरादिवृद्धये॥ ४॥
सर्वारिष्टनिवृत्त्यै च सर्वलोकहिताय च।
बलिदानं प्रकर्तव्यं तस्माद्देवि प्रयत्नतः॥ ५॥
प्रातःकाले च मध्याह्ने सायाह्ने च क्रमेण वै।
बलिदानं प्रकुर्वीत नित्ये नैमित्तिके तथा॥ ६॥

काम्ये चापि निशौ मध्ये यथाविधि महेश्वरि।

मध्यंदिने च सायाह्ने नित्यकर्मणि चायजा ॥ ७ ॥

बलिं दद्यान्महोत्पाते महास्नपनकर्मणि।

प्रायश्चित्ते गुरौ चैव प्रतिष्ठायां विशेषतः ॥ ८ ॥

महोत्सवादिकालेषु त्रिकालं बलिमाहरेत्।

शैवे शाक्तरि चैवं स्याद्बलिदानविधिक्रमः ॥ ९ ॥

दुर्गायां गणनाथे तु बलिं नित्यादिकर्मसु।

129 मध्याह्ने चैव सायाह्ने कुर्याच्चोत्सवादिषु ॥ १० ॥

कालत्रये च विष्णौ तु षण्मुखे शंकरेऽच्युते।

द्विकालं वा त्रिकालं वा नित्यादिषु बलिं हरेत् ॥ ११ ॥

एवं शिवादिदेवानां नित्यनैमित्तिकादिषु।

बलिकालविभेदोक्तो बलिदेवाञ्छृणु प्रिये ॥ १२ ॥

शैवबलिविधि ॥

नन्दिं चैव महाकालो गणेशो वृषभेश्वरः।

शूलपाणिं परशुपाणिं दिक्पालाः ससुराधिपाः।

ततः परं महानन्दी वीरभद्रो विनायकः।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।

वाराही च तथेन्द्राणी चामुण्डाः सप्तमातरः।

मातरश्च तथा लोका मातरः सप्तमातरः ॥ १५ ॥

सर्वमातृगणा लक्ष्मीं भूचारी खेचरी तथा।

शास्ता दुर्गा गुह श्रीदश्चण्डनाथस्तथैव च ॥ १६ ॥

नीलदंशो मृगाङ्कौ च गोपुरद्वारपालकौ

भृङ्गी चैव महाकालो भूतनाथो महीधरः ॥ १७ ॥

पर्वतेशो गुहेशश्च कालपाशः कपालिनौ।

तदन्ते क्षेत्रपालश्च महापीठे तु तत्परम् ॥ १८ ॥
भूतिदो दुर्निरीक्ष्यश्च भीमरूपः सुलोचनः ।
सुमुखश्च सुबाहुश्च कालपाशकपालिनौ ॥ १९ ॥
अधः पिङ्गलकेशश्च हरसेनस्तदूर्ध्वतः ।
दाते बलिभुजो नित्ये देवाः शैवे समीरिताः ॥ २० ॥ शि ॥
चण्डः प्रचण्डो शङ्खो ऽनन्तो विघ्नेश्वरः शिवः ।
दिक्पाला वीरभद्रैकदन्तौ ब्राह्मयादिकास्तथा ॥ १ ॥
शास्ता दुर्गा च धनदो विष्वक्सेनोऽथ गोपुरे ।
चक्रपाणिः शङ्खपाणिः श्रीभूमिः पठितो बहिः ॥ २ ॥
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ॥ ३ ॥
क्षेत्रे शान्त्ये चाथ बलीपीठे किष्किन्धपूर्वकाः ।
किष्किन्धः शंकरो भैमो भीमश्च सुकुमारकः ॥ ४ ॥
ततो बाहुलकश्चैव विजयोऽनन्तविक्रमः ।
12-6 पुनः पिङ्गलकेशाख्यो चण्डिका चाम्बिका सह ॥
दक्षिणे गणपेश्वरौ ?
दिक्पा वीरेश विघ्नेश मातृकाद्याः पुरोदिताः ॥ १ ॥
शास्ता दुर्गा च धनदो मुण्डिनी गोपुरे ततः ।
ह्लादिनी मोहिनी द्वारि विजयन्ती ततः परम् ॥ २ ॥
कात्यायिनी बहिरयां कालपाशा बलिदेवताः ।
काली करालीविरजा मन्दरा विन्ध्यवासिनी ॥ ३ ॥
सुप्रभा सिंहवक्त्रा च दैत्यमर्दिन्यतः परम्
क्षेत्रेशो बलिपीठे तु ब्रह्मघोष्यादि देवताः ॥ ४ ॥
ब्रह्मघोषी सुघोषी च यक्षे हि सुरसरागिणी ।

सुमुखी सुभगा दिक्षु प्रमोदिन्यथ चामनि॥ ७॥
कौंक्षी मध्ये चैव मुक्ता दुर्गाया बलिदेवता॥ श्रीः॥
वज्रपाणिः शक्तिपाणिः सुकुमारा ह्वयस्ततः।
भद्रसेनः शिखी भासु[न्य?] दाक्षिणामूर्तिलोकपाः॥ १॥
मातृशास्तं बिका स्कन्दौ धनदो धूर्तसेनकः।
अग्निकेतुः सूर्यकेतुः गोपुरद्वारिक बहिः॥ २॥
देवसेनापतिश्चाग्नि नेत्रो दग्धोऽसिधार्यपि।
पाशहस्ता ह्वयः केतुहस्तसंज्ञो गदाधरः॥ ३॥
ततः शूलविलासिन्या दिशान्य न्तस्तयोपरि।
विप्रप्रियोप क्षेत्रेशो बलिपीठे ततः परम्॥ ४॥
भूतिदक्षी स्तु दैवोक्तो देवा अत्रैव चोदिताः।
बलिदेवा इति प्रोक्ता स्कन्दस्य परमात्मनः॥ ५॥
क्षुरिका खड्गपाण्यन्त द्वारपालौ बलिस्तथा।
वीरबाहुर्महावीरौ भीमान्भैमा स्यशंकरौ॥ स्क॥ १॥
दिक्पाला मानरः शास्ता धनदो घोषवांस्तथा।
तीक्ष्णश्च तीक्ष्णदन्तश्च गोपुरे परितो बहिः॥ २॥
गोप्ता च पिङ्गला क्षश्च वीरसेनश्च शाम्भवः।
विदिक्स्थली दक्षभीमरूप संज्ञप दव च॥ ३॥
वीरबाहुर्महावीरो विद्युद्धास विलासिनौ।
तीक्ष्णश्च तीक्ष्णदन्तश्च तारा क्षश्च भवोद्भवः॥ ४॥
139 अथः पिङ्गलकेशाक्षो शास्तृसेनस्तयोपरि।
बलिपीठे त्वमे शास्तं बलिदेवा इतीरिताः॥ ५॥ श्री॥
वज्रदन्तगजास्यौ च महापार्श्वो विनायकः।
शिवदिक्पा मातृ शास्तृ दुर्गा स्कन्दाह्वयस्ततः॥ १।

कुम्भोदरो गोपुरे तु चण्डविक्रम संज्ञकः।
ततो विघ्नकरो दिक्षु वज्रदन्तो गजासकः॥ २॥
भीमश्च महिषास्यश्च मेघनादस्तथैव च।
विरूपाक्षश्च वरदो सर्वभक्षक एव च॥ ३॥
तदन्ये क्षेत्रपालश्च गजवक्त्रादिकस्ततः।
गजवक्त्रगणेशाख्यौ ततश्चैव विनायकः॥ ४॥
चण्डविक्रमको विघ्नकरशूर्पास्तु मेखलाः।
शूर्पकर्णस्ततो नागदन्ति हुं हुं वक्त्रजः। ५।
बलिपीठस्य दिक्ष्वस्त्र ऊर्ध्वे त्विमे स्मृताः।
एवं शूरादिसंप्रोक्ता विघ्नेश बलिदेवताः॥ ६॥ श्री:॥
नन्दी चण्ड जयत्सेन विष्वक्सेन वृषास्तथा।
गरुडोनन्तविघ्नेशौ शिवदिक्पालमातरः। ७॥
शास्ता दुर्गा गुहश्चैव चण्डसेनो च गोपुरे।
शूलारिणौ बहिर्दिक्षु भृङ्गिश्चैव समन्ततः॥
महाकाल्याह्वयः पश्चाद्भूतनाथो महीधरः।
कुमुदः कुमुदाक्षश्च पुण्डरीकोथ वामनः॥ ८॥
क्षेत्रपालस्तथैशान्यां बलिपीठे ततः परम्।
आयान्तु पार्षदाः सर्वे शांकरा वैष्णवाश्च ये॥ ९॥
बलिपीठेत्र संतुष्टाः निवसन्तु यथासुखम्।
(इतः परं च शर्वादि बलि कृत्यं यथासुखम्)
ओं नमो युष्मत्पार्षदेभ्य इत्याराध्य बलिं हरेत्॥ ५॥
✓ इतः परं च शर्वादि बलि कृत्यं शृणु प्रिये॥ श्री:।
घृतान्नं बिल्वपत्रं च जातीकुसुममेव च।
श्रीगन्धं चाक्षतं वारि धूपदीपौ तथैव च।

बलिद्रव्यमिदं शैवे दध्यान्नं तोयसी तथा।
कह्लारकुसुमं रक्तचन्दनाद्यं समीरितम्।
अगरुं जम्बुपत्रं च मल्लिकाकुसुमं तथा।
क्षीरोदनं च दुर्गायां मन्यत्सर्वं च पूर्ववत्॥ श्रीः।
स्कन्दे गोरोचनोपेतं गन्धं चैव गुडोदनम्।
शतपुष्पं च निर्गुण्डीपत्रं चापि गणाधिपे॥ श्रीः॥
कुचन्दनं च मद्यान्नं मुनिपुष्पं तथैव च।
न्यग्रोधच्छदनं चाथ मुद्गान्नं शंकरस्य ते॥ श्रीः।
कर्पूरागरुयुग्गन्धं द्रोणपुष्पं तथैव च।
अपामार्गदलं प्रोक्तं शास्तर्यत्र निगद्यते॥ श्रीः॥
13-b कृसरान्नं च कर्पूरमिश्रचन्दनमेव च।
नन्द्यावर्तसुमं बिल्वपत्रं चान्यत्पुरोक्तवत्॥
देवेषु निखिलेषूक्तद्रव्य[ा]लाभेथ वैषु च।
गुडोदनं वा द्रव्येषु यथालब्धानि केवलम्।
गन्धं पत्राणि पुष्पाणि भवेयुर्बलिकर्मणि।
बलिद्रव्यमिति प्रोक्तं बलिमन्त्राञ्छृणु प्रिये॥ श्रीः॥

*

ध्यात्वाथो देवमभ्यर्च्य मन्त्री गन्धादिमुद्रिकाः।
प्रदर्श्य तत्तदुक्तैश्च बलिमन्त्रैर्बलिं हरेत्।
गन्धं कनिष्ठया पुष्पं मङ्गुष्ठाग्रेण देशिकः।
धूपं दद्याच्च तर्जन्या दीपं मध्यमया तथा॥
अनामयाक्षमित्युक्तामुद्रा गन्धादिना क्रमात्।
ओं नमोन्त सर्वेषादि देवनं मजलं ततः॥
अर्पय मन्त्रैर्देवं पत्रं पुष्पं तथैव च।

एतमन्त्रं वदेन्मन्त्री वह्निजायावसानकम्।
पृथक्पृथग्द्वारपादिदेवानां च यथाक्रमम्॥
बलिमन्त्रा इमे नित्यविधौ सर्वाध्वरेषु च।
सन्ति नैमित्तिकाख्ये तु बलिकर्मणि केचित्तु॥
उपस्थानाणुवच्चैव मालामन्त्रा यथास्तथा।
मनवः पार्षदाश्चैव मातृणां तत्र तत्र वै॥
बलिदेवगणाधीशाः केचित्पार्षदादिकाः।
बोध्यं तत्र मया ज्ञात्वा ह्युत्सवेषु सविस्तरम्॥
बलिमन्त्रा इति प्रोक्ता वाद्यानि शृणु सांप्रतम्॥ श्रीः॥

-x-

वैष्णवे तु चतुर्विंश संख्यया च प्रबोधयेत्।
जयघण्टां पुनः शैवे षट्त्रिंशत्संख्यया बुधः॥
शैवाधिकं यतः प्रोक्तं तस्माद्रुद्रगणा बहुः॥ श्रीः॥

बलिपात्रलक्षणम्॥

आदौ तु बलिपात्रस्य लक्षणं प्रवदाम्यहम्।
पृष्ठमेकाङ्गुलं प्रोक्तं उन्नतं च(तु)रङ्गुलम्।
गलमेकाङ्गुलं प्रोक्तं वोष्ठं चार्धाङ्गुलं तथा।
द्वादशाङ्गुलनालं स्यात्(तु) वृत्ताकारं मुखं भवेत्।
स्वर्णं वा रजतं वापि ताम्रं वा लोहमेव वा।
यथाशक्त्यानुसारेण कारयेद्बलिपात्रकम्।
जलपात्रमथो विष्णुः मध्ये ब्रह्मादिदेवताः।
१५९ ओष्ठे तु शंकरः प्रोक्तः बलिपात्रस्य देवताः॥ श्रीः।
एकाङ्गुलाग्रा शुकतुण्डनम्राः सिषपेन्दु खण्डार्धगुणोपरम्याः।
दशाङ्गुलं दण्ड तथैकनालं दशैकदर्भा बलिकूर्चकाः स्युः॥

कुसुमं
कूर्चं वा कर्ममेवापि दूर्वाग्रे तुलसी तथा।
चरेत्
बलिजलपात्रे तु निक्षिप्य बलिकर्म समाक्रमेत्॥ श्रीः॥
श्रेष्ठं द्वादशवाद्यं स्यात् सप्तवाद्यं च मध्यमम्।
अधमं पञ्चवाद्यं स्याद्वाद्यानि त्रिविधेति च॥
भेरीशङ्खमृदङ्गाश्च पणवो मद्दळस्तथा।
वेणावेणुं च तालं च हूगळं [क ह] नागवाद्यकम्।
झल्लरीकम्बुवाद्यं च स्यादेवं द्वादशवाद्यकम्।
शङ्खो मृदङ्गः पणवो वीणा तालं तथैव च॥
कहळं दुन्दुभिश्चेति सप्तवाद्यं प्रकीर्तितम्।
मद्दळं चैव तालं च तथैव जयघण्टिका॥
शङ्खं च काहळं चेति पञ्चवाद्यं प्रकीर्तितम्॥ श्रीः॥
इन्द्रादितालनामानि प्रोच्यन्तेऽथ यथाक्रमम्॥
समतालं सुरेशस्य वह्नेर्द्वापणाद्वयम्।
याम्यं स्यात्कूर्म्मितालं तु मल्लतालं तु नैर्ऋतम्॥
वारुणं नवतालं स्यान्नागतालं तु मारुतम्।
कौशिकाख्यं तु सौम्ये स्यात् ढक्करीशानतालकम्।
वृषतालं महोक्षस्य मातृणां शशितालकम्।
स्कन्दस्योत्कटतालं स्यात् दौर्गं तु प्रहारकम्॥
चण्डनाथस्य विषमसमय गानं समीयते॥ श्रीः॥
प्राच्यान्तु गाने गान्धार कौल्लिचाग्नेयगोचरे।
दक्षिणे कौशिकी चैव तटभाषाच नैरृते॥
वारुणं कादरगान्धं कर्कशी वायुगोचरे।
तत्र द्रागं चोत्तरे तु शाकपाणीशगोचरे॥ [चौ?]
~~दक्षिणे कौशिकी चैव तटभाषाच नैरृते।~~

T 984

शैवागमपटलाः

नैमित्तिकोत्सवक्रिया बृहत्कालोत्तरे नैमित्तिककाण्डे		14	P 1-6
स्यन्दन उत्सवविधानम्		15	,, 6-12
ऋजुमण्डोत्सवकर्म		16	,, 12-20
उत्सवप्रायश्चित्तविधिः	अपूर्णः		,, 20-25
नवरात्रविधिः	,,		,, 25-29
सभामण्डपार्चनविधिः			,, 29-31
शिवालयद्वारनिर्णयः			,, 31-32
तुरगारोपणविधिः			,, 32-33
रथोत्सवविधिः			,, 33-39
रथभेदविधिः			,, 39-42
ध्वजरक्षणम्			,, 42-47
भेरीताडनविधिः			,, 47-49
बलिभ्रमणविधिः			,, 49-52
रथोत्सवविधिः			,, 52-56
उत्सवविधिः			,, 56-62
ध्वजारोहणविधिः	अपूर्णः ?		,, 62-74
देवलकानिर्णयः			,, 74-76
मृगयात्रालक्षणम्			,, 76-77
कुमारिकादिनवकन्यालक्षणम् (वरकन्यालक्षणम्)			,, 77-78
तुलारोहणविधिः	ललितागमे		,, 78-81
प्रायश्चित्तम्	कारणे		,, 81-82
आचार्यादिद्विजादीनां पत्नीगर्भे ऋतु मातापितृमृतदोषविवाहदोषादिविभागः			,, 82-83
उत्सवादीनां तिथिघटिकानिर्णयः			,, 83-84
रथलक्ष्मादिपतनभङ्गच्छेदनादिप्रायश्चित्तम्			,, 84-88
रथाङ्गभङ्गशान्तिविधिः			,, 88-89
रथदर्शनादिफलम्			,, 89-90
रथोत्सवान्ते आचार्यदानविधिः	वातुले रौरवे		,, 90-91
तन्त्रसङ्करनिषेधः			,, 91

क्षौरविधिः मूलागमसारे p91-93
चतुर्विधक्षौरभेदः वातुले „93-
चित्रालङ्कारलक्षणम् चन्द्रज्ञाने „94-95
रङ्गपूजा ज्ञानार्णवे „95-
" रुद्रयामले „96-
दीपाचारनीराजनादिपतनप्रायश्चित्तम् नित्यागमे „96-97
रथोत्सवप्रायश्चित्तम् बृहद्वातुले „98-99
प्रदक्षिणनमस्कारविधिः „99-
बलयन्त्रभ्रमणवर्ज्यविधिः „99-100
त्रिखरलक्षणविधिः वातुले „100-101
स्थानबिम्बदोषप्रायश्चित्तम् सूक्ष्मे „101-104
शिवलिङ्गप्रतिष्ठाविधिः बृहद्वातुले „105-115
ध्वजारोहणकालः किरणे „116-
प्रायश्चित्तविधिः ~~वातुले~~ वातुले „117-118
यानशिबिकापतनप्रायश्चित्तम् कारणे „119-
आस्थानमण्डपपतनादिप्रायश्चित्तम् „120-
देवीरथोत्सवः दीप्ते „120-121
चोरापहृतप्रायश्चित्तविधिः सिद्धान्तरत्नावल्याम् 121-123
भेरीताडनविधिः आदिपुराणे सूक्ष्मतन्त्रे 123-125
स्थिरमूर्तिभिन्नपतनादिदोषप्रायश्चित्तविधिः
विष्णुतन्त्रे 126-127
उत्सवान्तेशेषक्रियाविधिः 127-128
जीर्णोद्धारः वातुले (केवलश्लोकाः) 128-
नीराजनपटलः कारणे 129-130
रथारोहणपटलः " 131-134
उत्सवप्रायश्चित्तविधिः " 134-143
प्रभायानोत्सवविधिः चन्द्रज्ञाने उत्तरखण्डे 143-145
फलपक्वादिसमर्पणकालविधिः रौरवे 145-147
सूतकनिर्णयः नित्ये प्रायश्चित्तकाण्डे 147-148
बेताळबन्धद्रव्यविवरणम् 148-151
अष्टबन्धनसमये पीठजीर्णसन्धानविधिः
सहस्रकालोत्तरे 151-152

अष्टबन्धनक्रियाभेदविधिः वातुले p152-154
आचार्यदक्षिणाविधिः चन्द्रज्ञाने ,,154-155
बलिमूर्तिपतनप्रायश्चित्तविधिः मूलागमे ,,156-158
फलादिसमर्पणविधिः कामिके ,,158-159
महालक्ष्मीमन्त्रः ,,159-
प्रतिष्ठाक्रिया पाद्मसंहितायां ,,159-160
अन्यदेवोत्सवनिषेधविधिः मूलतन्त्रे ,,160-161
शिखरप्रोक्षणकलशारोपणविवरणम्
वातुले नित्यखण्डे ,,162-168
नवगेहपरिग्रहलक्षणम् वातुलोत्तरे ,,168-171
नवागारपरिग्रहविधिः ,,171-173
गुर्वादिदक्षिणाविधिः सिद्धान्तशेखरे ,,173-177
रङ्गपूजाकालनिर्णयः शिवरहस्ये ,,177-178
प्रतिष्ठादिकर्मणि निरीक्षणविधिः वातुले ,,178-179
मुहूर्तनिर्णयः ग्रन्थनाम न दृश्यते ,,180-199
जीर्णदण्डविसर्जनविधिः सूक्ष्मतन्त्रे ,,199-201
" ,,201-202

T 984b

लक्षहोममण्डपादिविधिः वातुलोत्तरे काम्यखण्डे 45 पटले ,,1-12
अग्निजननविधानम् वातुलागमे कर्मखण्डे ,,12-22
लक्षकर्मविधिविवरविधानम् वातुले काम्यखण्डे ,,22-29
बलिविधिः पारमेश्वरतन्त्रे ,,29-38
रथभङ्गप्रायश्चित्तनिरूपणविधिः ,,38-
प्रायश्चित्तविधिः चन्द्रज्ञाने
रथभङ्गप्रायश्चित्तम् वातुलोत्तरे
रथभङ्गप्रायश्चित्तविधिः 39-45
गजाश्ववृषभादिशान्तिः वातुलोत्तरे
प्रायश्चित्तखण्डे 45-49

[RE. 43228, from]

स्वस्ति। शुभमस्तु॥

अथ लोकगुरुं शार्वं भूपतेर्विभवाय च।
शंकरादि ख्यातानामुत्सवार्थं दिनं मि··॥
कथं ब्रूहि महादेव तत्कर्मविभूतिं पृथक्।
मण्टपानि च कुण्डानि कर्मजालान्यथाक्रमात्॥
श्रोतुमिच्छाम्यहं [तात] सर्वसंपत्समृद्धये।
शिवः - शृणु वत्स प्रवक्ष्येऽहमुत्सवार्थं षडानन॥
दिनसंख्यां च तत्कर्म मण्टपं कुण्डभेदतः।
एकाहादिनवाहान्तं क्रमात्कर्माणि षण्मुख॥
एकाहं त्र्यहं पञ्चरात्रं सप्ताहमुच्यते ?।
नवाहं चेति भो स्कन्द उत्सवं पञ्चधा भवेत्॥
एकरात्रं शिवे ख्यातं त्र्यहं गौणेति संज्ञितम्।
पञ्चरात्रं भौतिकं स्यात् सप्ताहं भौवनं भवेत्॥
नवाहं दैविके ख्यातं निशोत्तमस्तु नोच्यते।
नवरात्रं च शैवे स्यान्नवरात्रविधिं ततः॥
शक्तौ कुर्यात्सप्तरात्रं निधौ विष्णौ षडानन।
हरिशयोः पञ्चरात्रं गणेशे त्र्यहं भवेत्॥
विधिज्ञानां चैकरात्रं देवानां च प्रशस्तकम्।
सुखप्रदं चैकरात्रं त्रिरात्रं विभवप्रदम्॥
वस्त्रप्रदं पञ्चरात्रं सप्तरात्रं धनप्रदम्।
बहुराज्यप्रदं राज्ञां नवरात्रं चमूपते॥

धकाहोमविधिं चादौ क्रमाद्वक्ष्यामि विस्तरात्।
देवाग्रे च तथैशान्यां मण्टपं पञ्चहस्तकैः॥
16 मध्यमे वेदिकायुक्ते/षोडशस्तम्भसंयुतम्।
वेदिकापश्चिमे कुण्डं वृत्तं वा चतुरश्रकम्॥
मेखलात्रयसंयुक्तं हस्तार्धं खातमुच्यते।
अश्वत्थपत्रवद्योनिं सनाभिं कुण्डपश्चिमे॥
द्वौ पंच पूर्ववत्कुर्यान्मण्टपं भूषणादिकैः।
प्रातः स्नात्वा ततो मन्त्री नित्यकर्म निवर्त्य च॥
यष्ट्वा विघ्नपतिं चादौ मोदकैश्च फलादिकैः।
सनान्दिं चैव पुण्याहं वाचयेद्भूसुरैः सह॥
गुरुं वस्त्रप्रदं चैव ब्रह्माणं जापकान् ततः।
जापकान्चारकान्पश्चात् द्वारस्थे तद्विधानतः।
मधुपर्कं च तन्मन्त्रैः कृत्वं सद्योऽङ्कुरार्पणम्।
कृत्वा ध्वजं नैतिकाख्यं मूलमन्त्रेण पूजयेत्॥
तन्मन्त्रैर्होमयेद्वह्नौ समिदाज्यादिभिः सह।
मण्टपं शोधयेत्पश्चात् पुण्याहाद्यैर्विचक्षणः॥
विधेशान् तोरणाख्यांश्च कलशान्द्वारसंज्ञकान्।
पताकाख्यान्गृहाख्यांश्च कोणस्थकलशयान्॥
तण्डुलाख्यजलाढ्यौ च शिवकुम्भं च वर्धनीम्।
घटौ द्वौ स्थानबिम्बाख्यौ दिशाकुम्भं ततः परम्॥
मण्टपे वेदिकामध्ये तत्तत्स्थाने यजेद्गुरुः।
वेदिकापरितः पञ्चाद्वास्युधानि मन्त्रतः॥
मङ्गलानि यजेत्तत्र मण्टपे वेदिकाबहिः।
दिगीशानर्चयेत्पश्चाद्दिङ्मन्त्रैः प्रणवादिकैः॥

पूजाबलिं नैत्तिकाख्यं दत्त्वा विप्रांश्च भोजयेत् ।
२~ स्नात्वा विप्रजनैर्मन्त्र्या तन्निशि स्थापकोत्तमः ॥
राक्षोघ्नं वास्तुहोमं च हुत्वा वास्तुबलिं हरेत् ।
[ध्व]जकुण्डे जनयेदग्निं स्थानशुद्धिमनुं हुनेत् ॥
बिम्बशुद्धिं गणेशाख्यं कृत्वाथ विधिवद्गुरुः ।
लिङ्गशुद्धि[म]नुं यागं पञ्चब्रह्ममनुं ततः ॥
रिक्षन्त्रां समिदाज्या[ज्या]द्यैः दशाङ्गाद्यैर्हुनेद्गुरुः ।
तदन्ते दर्भदामाद्यैः स्तन्तुभिः पञ्चपल्लवैः ॥
रक्षार्थं बन्धयेद्देव वेश्मनः परितो गृहे ।
शकटाख्यं रथं पश्चाच्छुद्धिं कृत्वाधिवासयेत् ॥
[बल्यन्ते वेयहृदुदीपाद्यैः पूजयेद्विधिवच्छिवम्] or
[भेरीं संस्थाप्य तन्मन्त्रैः बलिदानं प्रदापयेत् ॥]
बोधयेद्धृदुदीपाद्यैः पूजयेद्विधिवच्छिवम् ।
भेरीं संस्थाप्य तन्मन्त्रैः बलिदानं प्रदापयेत् ॥
तद्यन्ते वेदघोषाद्यैः वाद्यघोषैः जनैः सह ।
वृषयन्त्रोपरि स्थाप्य देवं तन्मूलमन्त्रतः ॥
विविधैर्विभवैः सार्धं ग्रामसामान्तमीश्वरम् ।
उत्सवैश्च प्रचार्याथ मण्टपे पूजयेत्ततः ॥
अस्तेरामर्चयेदन्ते ताम्बूलाद्य फलादिकैः ।
तोडयेयुर्जनाः सर्वे देशिकादिद्विजोत्तमाः ॥
पुनर्गेहं परिभ्राम्य प्रविशेद्देवमन्दिरम् ।
प्रसन्नार्थं यजेद्देवं पुनः प्रातः समुत्थितः ॥
स्नात्वा नित्यं समाप्याथो द्विजैः सार्धं स्वभावितः ।
यतिकायन्तमुद्धार्य पुण्याहं वाचयेत्ततः ॥

देवेशमर्चयेद्भक्त्या ध्वजं यागेश्वरं ततः।
२८ नीत्वा नित्योत्सवं पश्चाद्देवेशं यागमण्टपं॥
प्रविश्य वेदिकामध्ये न्यस्त्वा यष्ट्वाथ मूलतः।
वेद्यान्दिक्षु विदिक्ष्वस्त्रं गुरुमन्त्रादिपञ्चकान्॥
यागं मूलं दिशामन्त्रं पञ्चकालमनूनपि।
ग्रहमन्त्रं चायुधाख्यं मङ्गलाख्यमनुं ततः॥
परिवारमनून्सूक्तान् विविधान्प्रजपेत्तथा।
ग्रहहोमं प्रकुर्वीत तत्त्वशक्तिकलामयान्॥
परिवारं च मूलं च रथहोमं च मङ्गलम्।
आयुधाख्यं पूर्णयागं यात्राहोमं च शान्तिकम्॥
प्रायश्चित्तं हुनेदन्ते हुतशेषं समर्पयेत्।
वेदिका दक्षिणे कुम्भान् पञ्चविंशतिसंख्यकान्॥
यष्ट्वाथ विधिवन्मन्त्री तस्मिन्पञ्चामृतं पजेत्।
देवमन्त्रैः प्रतिष्ठाप्य सिञ्चेत्पञ्चामृतं गुरुः॥
नैवेद्यैः पञ्चविंशद्भिः सेचयेद्देवमव्ययम्।
बहुधा पूजयेत्पश्चात् नैवेद्यं विविधं पुनः॥
निवेदयेन्मूलमन्त्रैः पुनर्नीराजनादिभिः।
भ्रामयेद्धृद्दीपैर्वैः केतुं यागेश्वरं यजेत्॥
महोबल्युत्सवैर्मन्त्री रथमूलं समानयेत्।
रथेशस्य बलिं दद्याद्दिग्विदिक्षु यथाक्रमम्॥
ततो वाद्यरवैर्भक्तैः वेदमङ्गलनिःस्वनैः।
रथं प्रदक्षिणीकृत्य प्रार्थयेच्छकटेश्वरम्॥
नमस्ते व्यजनाकार चतुश्चक्रसमन्वित।
सर्वभूषणभूषाढ्य शकटाख्यरथोत्तम।

त्वमनुज्ञां देहि देव तवारोपणकर्मणि।
प्रार्थयेदिति तन्मन्त्रैः देवमारोपयेत्पुनः॥
देशिकं मन्त्रबोद्धारं तदन्ते त्रिकनाहृकम्।
3a धावकौ पाठकौ पश्चात् छत्रचामरधारकौ।
उपविश्य जनानेवं यथोपरि वसुप्रदः।
तद्गजं स्वयमुद्धृत्य . . . ॥
. . ग्रामश्रीयां गेहस्य परितस्ततः।
होमारोपस्तु कर्तस्तु तत्परं विधिवद्गुरुः॥
मृगयात्रां पूर्णयागं हो . . . भूयक्रियाम्।
पुनर्गेहं प्रवि[ने]श्यैवं स्वरबन्धक्रियां गुरुः॥
कृत्वैवं दशविधं दानं दद्याच्चैव यथाविधि।
पूर्णाहुतिं हुनेदन्ते तद्धटस्थैर्जलैः सह॥
प्रविश्य गर्भगेहं च देवं मूले नियोजयेत्।
तैर्जलैः स्नापयेदस्तैः क्रियाजालं समर्पयेत्॥
तत्परे दिवसे प्रातः स्नापयेन्नवाभिर्घटैः।
एकाहकर्म चेत्युक्तं सर्वपापप्रणाशनम्॥
धनधान्यप्रदं नॄणां चायुरारोग्यदं स्मृत।
यशःप्रदं बलकरं सर्वसत्त्वप्रदं मुहुः॥
सभक्त्या निभवैः सार्धं यः कुर्याच्छकरोत्सवम्।
प्रभुत्वं पुत्रपौत्रं च प्राप्नुयात्सप्तजन्मनि॥
विप्रेभ्यो दक्षिणां दद्यात् बहुधा तोषयेद्गुरुम्।
तन्त्रोपकरणैः कर्ता भक्त्या दत्त्वाथ वन्दयेत्॥
वेदघोषैर्वाद्यरवैः स्वस्तिवाक्यद्विजैः सह।
देशिकं प्रविशेद्गेहे सम्यक्स्नाय वसुप्रदः॥

शैवमुक्तं ततो गौणं शृणुवत्स यथाक्रमम् ॥
इति श्री बृहत्कालोत्तरे सर्वागमसारे शिवस्कन्दसंवादे
नैमित्तिकखण्डे एकरात्रशकोत्सवक्रिया
विधिर्नाम चतुर्दशः पटलः ॥
श्री नृसिंहाय नमः ॥

3-6 अतो वनक्रियां वक्ष्ये सर्वलोकहिताय च।
मण्टपं शिवदिग्भागे सप्तहस्तप्रमाणतः ॥
निविडं सार्धपादौ तन्मध्ये वेदिका भवेत्।
वेदिका दक्षिणे वामे वृत्तकुण्डद्वयं गुरुः ॥
चतुरश्रं वेदिकाग्रे कर्तव्यं च प्रधानकम्।
द्विजैः सार्धं तत्प्रभाते स्नात्वा नित्यं च देशिकः।
निवर्त्य मूर्तिपौ मन्त्री क्रह्माय चनदः पुनः।
सदस्यान्तं च वपु[भ]येन्मुख्यस्नानं विधानतः ॥
कृत्वाथ घटिकायन्त्रं न्यस्त्वा विघ्नपतिं यजेत्।
फलैः स्वर्णैश्च पुष्पैश्च दूर्वाग्रैश्च ममात्मजम् ॥
पुण्याहं वाचयेन्नान्दीं देशिकादिद्विजान्ततः।
वरयेत्कृत्स्नदानं च मधुपर्कं तथैव च ॥
तत्परं मृदमानीय वृषयागं समाचरेत्।
परं यज्ञा परिभ्राम्य ध्वजमन्त्रेण देशिकः ॥
दण्डस्य नैर्ऋतिकारण्यस्थ बन्धयेत्पटमग्रके।
तन्मूलं वेष्टयेद्वस्त्रैः परितश्च बलिं हरेत्।
दिनपरं बन्धयेत् यानं मण्डपे देववेश्मनि।

पुनर्नित्योत्सवं नीत्वा भूसुरान्भोजयेत्ततः।
(बि)भूत्वा तु तद्रात्रौ गुरुर्विप्रजनैः सह।
पुण्याहं वाचयेन्मन्त्रैः मण्डपं प्रोक्षयेत्परम्।
निर्वपेत् पञ्चगव्यानि शास्त्रोक्तं वास्तुहोमकम्॥
हुत्वा वास्तुबलिं दद्यात्पञ्चगव्यजलाद्यकौ।
५० शिवकुम्भं शक्तिं च यजेत्तन्मूलमन्त्रतः॥
विघ्नेशान्गण्डुकाख्यांश्च द्वारस्थान्तोरणाभिधान्।
पताकाख्यांश्च संपूज्य गृह(स्थान्) त्रीन्घटान्यजेत्॥
दिग्घटांस्त्रीनेकैकान् नृप संपूज्य त्रीन्घटान्कलशसंज्ञकान्।
त्रीन् तत्त्वघटान्संपूज्य त्रीन्घटांश्च कलाभिधान्॥
समर्च्य विधिवत्कुम्भान् स्थानकाभिधायकौ।
त्रीन्घटान्कुण्डसंज्ञांश्च मङ्गलाख्यांश्च त्रीन्घटान्॥
आयुधाख्यघटांस्त्रींश्च त्रीन्घटान्गणसंज्ञकान्।
वेदिकापरितः कुम्भान् न्यस्त्वा संपूज्य पूजयेत्॥
मङ्गलान्यायुधान्यानि विन्यसेद्वेदिका बहिः।
रक्षार्थं वेष्टयेद्दर्भदाम्ना यैर्वेदबोधकैः॥
ततः संपूज्य देवेशं भ्रामयेद्धूपदीपकैः।
यष्ट्वा यागेश्वरं केतुं भूतानां स्थापयेत्परम्।
भेरीं संपूज्य संताड्य बलिं दद्यात्स्वनामतः।
तदन्ते विविधैर्घोषैः प्रविशेद्यागमण्डपम्॥
यष्ट्वा वेश्यां च देवेशं पुनः सूत्रं समर्चयेत्।
विधिवद्बन्धयेत्सूत्रं सूत्रमन्त्रेण बुद्धिमान्॥
उत्सवार्थं च शिबिकां यष्ट्वा तस्यां न्यसेच्छिवम्।
वेदघोषैः सवरवैः मागधैर्गजवाजिभिः॥

छत्रचामरसंयुक्तैः सर्वभूषणभूषितैः।
सर्वभक्तजनैः सार्धं उत्सवं च नयेत्ततः।
ग्रामान्तं नगरान्तं वा प्रासादपरितः शिवम्
मण्टपं प्रविश्य पश्चात्तस्मिन्यज्ञविधानतः॥
५-६ ततश्चास्त्रेशमभ्यर्च्य देशिकादिद्विजैस्सह।
नाडयेयुः फलैर्वत्स विविधैर्नालिकेरजैः॥
पुनर्गेहे भ्रामयित्वा प्रविश्यान्तः शिवं गुरुः।
पञ्च[पुष्पो]पचाराद्यैः प्रसन्नार्घं समर्चयेत्॥
गीतैश्च नर्तकाद्यैश्च विनिद्रां विधिमाचरेत्
पुनः प्रातः समुत्थाय नीत्वा नित्यं मनूत्तमः॥
नत्वा तु धारिकायन्तं पुण्याहं वाचयेत्ततः।
नित्योत्सवक्रियां कुर्यादेवं वेद्यां यजेत्पुनः॥
वेदामन्त्रां दिग्विदिक्षु जपेयुर्भूसुरोत्तमाः।
गुर्वादिपञ्चमन्त्रांश्च चतुरस्त्रं च दिग्ग्रहम्।
ब्रह्माणुन्यागमन्त्रांश्च सूक्तं मूलमनुं जपेत्
मङ्गलाणुं चायुधाख्यं परिवारमनुं ततः॥
वह्निं च जनयेत्पश्चाद्विधिवत्कुरुपुङ्गवः।
यागमन्त्रेण होतव्यं गणेशं स्थलशोधनम्॥
बिम्बशुद्धिं च लिङ्गाख्यं विग्रहं वाहसरकम्
परिवाराभिधं मन्त्री होमयेत्तद्विधानतः॥
वेदिकांशकरे देशे यजेत्पञ्चसुधारसम्।
नवकुम्भांश्च संपूर्य यज्ञकुम्भाणुना गुरुः।
मन्दिरान्तः प्रविश्येशं सिञ्चेत्पञ्चरसादिकैः।
तैर्घटैर्नवभिः पश्चात्पूजयेद्विधिवच्छिवम्॥

दीपौघैः भ्रामयेदन्ते ध्वजं यागेशमर्चयेत् ।
बल्युत्सवं क्रमान्नीत्वा विप्रवर्यांश्च भोजयेत् ॥
सायं स्नात्वा ततो मन्त्री सन्ध्याकर्म समाचरेत् ।
5a गत्वा स्यन्दनसामीप्यं विधिवत्स्यन्दनं गुरुः ॥
संशोध्य भूसुरैर्होम्य स्यन्दनं चाधिवासयेत् ।
पुनर्दीपोत्सवं कुर्यात् दीपौघैर्भ्रामयेच्चिरम् ॥
वृषयन्ते यजेद्देवं वृषमन्त्रेण देशिकः ।
बलिं दद्याद्विधानज्ञ श्वोत्सवं पूर्वमुक्तवत् ॥
विनिद्रकमगीताद्यैः घोषैश्च विधिवन्नयेत् ।
मनीषी प्रातरुत्थाय स्नात्वा द्विजजनैः सह ॥
नित्यक्रियां समाप्यान्ते घटिकामानमर्चयेत् ।
संकल्प्य चार्चयेद्विघ्नं पुण्याहं वाचयेद्गुरुः ॥
नीत्वा बल्युत्सवोपेतं यागवेद्यां यजेत्क्रमात्प्रभुम्
वेदानन्तं चान्यमन्त्रानाचारेत्पूर्वमुक्तवत् ॥
मूर्तीशाभ्यां देशिकेन्द्रः सह होमक्रियां नयेत् ।
मूलमन्त्राभिधं यागं तत्त्वाख्यं शान्तिसंज्ञकम् ॥
मङ्गलाख्यं चामृताख्यं रत्नाख्यं शान्तिसंज्ञकम् ।
प्रायश्चित्ताभिधं होम्य तच्छेषं चार्पयेद्गुरुः ॥
घटान्संपूज्य वेद्यग्रे नवसंख्याविधानतः ।
सुधापत्यकमन्त्यर्च्य गेहमन्तर्विशोधितम् ।
सुधारसादिकैः शम्भुं नैवेद्यैर्नवभिः पुनः ।
सेव्य संपूज्य तत्पश्चात् नैवेद्यैर्निवेदयेत् ॥
दीपौघैर्भ्राम्य देवेशं केतुं यागपतिं यजेत् ।
भूतानाहूय वाद्यैस्तैः बलिं दद्यात्परं गुरुः ॥

महाकल्पोत्सवं नीत्वा भक्त्या दोलां समर्चयेत्।
5-6 देवमारोपयेत्तस्यां त्रिवारं भ्रामयेच्च ताम्॥
रथमूलं समासाद्य सर्वघोषैर्जनैः सह।
सगुडौदनदुग्धोदन कूष्माण्डशकलैर्युतम्॥
हरिद्रारससंयुक्तं दीपवर्तिसमन्वितम्।
चक्रोन्नतसमं राशिं कृत्वा विधानमर्चयेत्।
गां महीं च तिलं दत्वा विकिरेत्परितो बलिम्।
ब्रह्मघोषैर्वाद्यरवैः भूसुरौघैर्जनैः सह॥
प्रदक्षिणत्रयं कुर्यात्परितः स्यन्दनस्य च।
प्रार्थयेत्परया भक्त्या स्यन्दनं मनुवित्तमः॥
नमस्ते [illegible] नमः षट्चक्रधारिणे।
जगन्मोहन नमस्तुभ्यं नमस्ते स्यन्दनाभिध॥
आज्ञां देहि रथश्रेष्ठ देवमारोपितुं त्वयि।
त्रिवारमिति संप्रार्थ्य रथमारोपयेच्छिवम्॥
देशिकं वाहकं तस्मिन् ब्राह्मणं होतृकं ततः।
सदस्यं घोषकांस्त्रींश्च जापकांस्त्रींश्च भागवान्॥
त्रींश्च वेत्रधरांस्तस्मिन् छत्रचामरधारिणः।
बलिदीपधरांस्त्रींश्च चारकांस्त्रीन्नियोज्य क्रमात्॥
रथस्य परितः सर्वैः [illegible] विकिरेज्जन [illegible]
रज्जुमादाय [illegible] चतुर्वर्णोद्भवा जनाः॥
ग्रामवीथ्यां रथं नीत्वा प्रासादपरितस्ततः।
रथाद्देवं चावरोप्य मृगयात्रां विधानवित्॥
मण्डपे देवमभ्यर्च्य कुङ्कुमादिरसैः सह।
[illegible] देवमथाशेषं [illegible]॥

रात्रौ भूतबलिं दत्वा क्षेत्रपालाय बलिं ततः।
विनिद्रां निनिशां [विधिना] नीत्वा प्रातरुत्थाय सत्वरम्।
समाप्य नित्यकर्माणि ब्रह्मघोषादिनिस्वनैः।
चूर्णाभिषं मूर्तिभ्यां कुर्यात् द्विविधा बुधः॥
62 चूर्णोत्सवं पुनः कुर्यात् रात्रौ चाचार्यं होमयेत्परम्।
महानद्यां च सुस्नात्वा त्यक्त्वा सूत्रं विचक्षणः॥
धाम प्रविश्य देवेशं जयघण्टादिनिःस्वनैः।
परं मूलेनावरोप्य दण्डमन्त्रेण पूजयेत्॥
हुत्वा पूर्णाहुतिं कुण्डे मूर्तिपाभ्यां च मन्त्रतः।
दिक्पालान्विसृजेदन्ते कृच्छ्रं दशविधं पुनः॥
दानं दद्यात् महोत्सवे ध्वजबन्धमयोजितान्।
मूले नियोज्य देवेशं निवेद्यादिचरोदकैः॥
विघ्नोत्पादं कर्मजालं सर्वथानन्दनान्तरम्।
दक्षिणामुत्तमां दद्यात् द्विजानां कर्मचारिणाम्॥
तन्त्रोपकरणैः सार्धं धनिनं गां महीं ततः।
दत्वा गुरुं च संतोष्य वन्दयेच्छ्रद्धया सह॥
ऋत्वर्यं स्नापयेद्देवं पञ्चविंशतिभिर्घटैः।
ब्रह्मघोषैः मागधाद्यैः छत्रचामरसंयुतैः।
प्रभूतमैनृतगीतैः वाद्यमङ्गलनिःस्वनैः।
दीपजालैस्ततश्चार्यं प्रविशेद्देवालयम्॥
गुणकर्मसमायुक्तं सर्वपापविनाशनम्।
सर्वविघ्नप्रशमनं सदा मङ्गलकारकम्॥
सर्वदुःखहरं सद्यः सुखिसं कीर्तिदं स्मृतम्।
वीर्यप्रदं पुत्रो धैर्यं संपत्सौख्यप्रदं सदा॥

वश्यप्रदं पुत्रपौत्रप्रदं मृत्युहरं मुहुः।
द्विजो वा क्षत्रियो वापि यः कुर्यात्स्यन्दनोत्सवम्॥
68 स एव मण्डलीकत्वं प्राप्नुयात्सप्तजन्मनि।
देहान्ते शिवरूपत्वं सत्यमुक्तं न संशयः॥
त्रिरात्रीयमिति प्रोक्तं पञ्चरात्रक्रियां शृणु।

इति श्रीबृहत्कालोत्तरे सर्वागमसारे शिवस्कन्दसंवादे
नैमित्तिकखण्डे त्रिरात्रसहितस्यन्दनोत्सव
कर्मविधानं नाम पञ्चदशः पटलः॥

—x—

वक्ष्याम्यहमथो वत्स पञ्चरात्रात्मिकां क्रियाम्।
मण्डपं चैशदिग्भागे नवहस्तमितेन च॥
वेदिकामध्यमे तस्य कुण्डानि परितस्ततः।
दिक्षु वेदाश्रकुण्डानि वरुणानि स्ययोर्द्विदि॥
वृत्तकुण्डं चतुर्द्वारं तोरणं सर्वभूषणम्।
कुण्डं योनिं च नाभिं च पूर्वमुक्तप्रकारतः॥
गुरुः कुर्यात्ततो विद्वान् कर्मज्ञान् श्रोत्रियान्बहून्।
स्वशाखोक्तयुतान्दक्षान् समाहूय प्रतोष्य च॥
कर्मार्थं प्रार्थ्य तान्भक्त्या प्रभाते पुनरर्थितः।
स्वयं वस्त्रप्रदश्चैव सदस्यश्च मितामहः॥
चतुर्भिर्होतृभिः सार्धं वपयेत द्विधानतः।
समालयं द्विजैः सार्धं सर्वघोषैर्विशेषतः॥
देवं प्रणम्य संकल्प्य पालिकामानमुद्धरेत्।
पश्चाद्विघ्नाधिपं स्वर्णैः फलैः पक्वैर्विधानवित्॥
नान्दीमुखं च पुण्याहं वाचयित्वा तु भूसुरान्।

वरयेद्देशिकेन्द्रादि मधुपर्कक्रियां ततः।
दत्वा कृत्स्नं भूसुराय विधिवन्मूर्तिकां हरेत्॥
7a ध्वजस्थाने न्यसेद्दण्डं कूपयोगमतः परम्।
कूपमूलेन होतव्यं तद्रूपं योजनवाहुवी:॥
नैमित्तिके ध्वजस्थाने दृढमूलमकर्मवित्।
परमारोपयेत्तस्मा दृढाङ्गं वाद्यमङ्गलैः॥
दिग्वस्त्रं पठितं मन्त्रौ बन्धयेद्ध्वजवेष्टनम्।
ध्वजमारोपयेद्दण्डे मण्टपस्याय सुव्रत॥
तद्दिग्विदिक्षु तद्दलं बद्ध्वा निःपक्रियां नयेत्।
भूसुरान्भोजयेत्तत्र शुद्धात्मा गन्धयासह॥
विघ्नेशमर्च्य पुण्याहं वाच्य बीजानि वापयेत्।
विधिवन्मण्टपं शोध्य विघ्नेशादिपदान्पुनः॥
शिवाभिधं शान्तिकुम्भं वेदिकायां यजेत्सुधीः।
नन्दाभिधानं हारयोश्च कलशं तत्रोभयान्तरान्॥
शान्तिकुम्भगणनाद्यौश्च दिग्घटान् स्थापयेत् संहकान्।
किन्नराभिधानं सकुम्भं नारव्यानम् आमुखाख्यान्नगानि विधानम्॥
कुम्भाभिधानाख्यसहानम् क्रमाद्वैतान्पूजयेद्गुरुः।
पञ्च पञ्च प्रपूर्याथ तोरणाख्यघटांस्ततः॥
द्वाराभिधानपताकाख्यान् गङ्गाख्यान्यजेत्ततः।
तोयाभिधं तण्डुलाढ्यं यष्ट्वा मन्त्रेण भावितः।
रक्षोमन्त्रेण संशोध्य ग्रामं वर्गैस्ततः परम्।
वास्तुहोमं हुनेद्वह्नौ वास्तोश्शक्तिबलिं हरेत्॥
7b रक्षार्थं गेहपरितो दर्भग्राममाथ बन्धयेत्।
विधिना पूजयेद्देवं कान्तं यष्ट्वा ततः परम्॥

भेरीं संताड्य तन्मन्त्रैश्शंखादित्रयमागतः।
भूतानां तूर्यघोषाद्यैर्निस्वनैर्वा द्रुतं पुनः॥
स्वनाभिर्बलिं दत्वा प्रविशेद्यागमण्टपम्।
नैमित्तेन समभ्यर्च्य कौतुकं बन्धयेत्पुनः॥
देवं च शिबिकासक्तं कर्तृविप्रजनैः सह।
वेदघोषैः शङ्खरवैः घोषैश्च विविधैस्सह॥
छत्रैश्चैव पताकैश्चैव चामरैश्चैव मागधैः।
तोरणैश्चैव दीपैश्च रागैश्चैव जनैः सह॥
देवं नयेद्वस्थानं ग्रामान्तं दक्षिणोत्तमः।
प्रासादपङ्क्तिं पश्चात्समाहृत्यानयेत्प्रदक्षिणम्॥
विधिना स्तोत्रमभ्यर्च्य गर्भगेहं प्रवेश्य च।
प्रसन्नयजनं कृत्वा क्रियाजालार्पणं ततः।
शौचकर्म निवृत्यन्ते प्रातर्विप्रजनैः सह।
सहोत्थाय निवृत्यान्ते नीत्वा विश्लेषमर्चयेत्॥
यतिकार्ये न्यसेत्पात्रं पुण्याहं वाचयेद्गुरुः।
अर्चयित्वा शिवं मन्त्रैः बलिं दत्वोत्सवं नयेत्।
वेदिकामध्यमे देवं यष्टा होतृजनैः सह।
होमकर्म प्रकर्तव्यं वक्ष्यमाणक्रमेण तु॥
द्वारवेदानलमन्त्रान् पञ्चगव्यादिकान्मनून्।
सूक्तान्होममनून्पादिङ्मन्त्रान् ग्रहसंज्ञकान्॥
मारोरं मूलमन्त्रं च मङ्गलाद्यं निदिशयेत्।
गणाधिपं वास्तुपालं मन्त्रेणाख्यं विचक्षणः॥
जनयेत्समिधां वह्निं स्वकुण्डे विधिवद्गुरुः।
तदग्निं चान्यकुण्डेषु निधाय क्रमशः पुनः॥

विलाप्य त्रिकटाद्यं च यागार्थं द्रव्यशोधनम्
त्रिद्वादशीं च त्रिमात्रं होमयेत् समागतः।
वेदिकाग्रे घटान्पूर्य नवसंख्यान्यजेत्ततः।
पञ्चामृतं च शुद्धिं च तद्दत्तं यथा संपातमर्पयेत्॥
देवं प्रतिष्ठाप्य गेहान्तः सुधाभिः पञ्चभिर्गुरुः॥
नैवेद्यैस्तैर्नवाभिः सिच्य पूजां कल्पयन्सुधा॥
निवर्त्य भोजयेद्विप्रान् तन्निधि स्थाप्य मन्त्रवित्।
त्रुटिकं मूलमन्त्रेण जीरकं च मरीचकम्॥
क्षीरं चरुं स्वकुण्डे च होमयेद्गुरुतः क्रमात्।
संपूज्य विविधैः पुष्पैः देवं गणपतिं स्वकम्।
सर्वोपहारमर्चाच्य दीपैर्धूपैः भ्रामयेत्सुत।
गेहस्य परितो दीपान् बोधयेद्गुरुसंगणान्पुनः।
वृषध्वजं च संशोध्य वृषमन्त्रं समुच्चरन्।
शिवमारोप्य तद्यन्ते सर्वलोकैर्जनैः सह॥
उत्सवं मण्डपार्थं च अस्त्रेशार्थं च पूर्ववत्।
नीत्वा देवं मन्दिरान्तः विशेषपूजां समाचरेत्॥
निद्रां निवार्य हास्याद्यैः नर्तनैर्गायकैः सह।
तस्मादुषसि चोत्थाय स्नात्वा नित्यं समाप्य च॥
स्नात्वा तु प्रतिकामाने पुण्याहं वाचयेद्द्विजैः।
९६ भक्त्या संपूज्य देवेशं बलिं दद्यात्स्वनामभिः॥
तद्दिने मध्यमे काले मण्डपस्थे ग्रामवर्यते।
वेदनिर्दिष्टमन्त्रजालैः होमैस्सह देशिकः॥
देवाग्निं च दिशाहोमं ग्रामभङ्गसंज्ञको।
आयुष्याण्यानन्दुनतद्दिने तद्देवं चार्चयेत्सम्प्रभोः॥

वेदिकादक्षिणे देशे अनुकुम्भस्य चारसम्।
उद्धाय बिम्बमादेवं मूलपीठे निवेश्य च॥
सुस्नाभिस्तैर्घटैः पश्चात् सेच्य पूज्य निवेदयेत्।
आमन्त्रिताय दीर्घैः बलिदानमथोत्सवम्।
समाप्य भोजयेद्विप्रान् तद्भक्तो शुचियुग्गुरुः।
होमशेषकृतं पूर्वं स्थण्डिले मूलमन्त्रतः।
सम्पातमर्घ्यं संपूज्य सुम स्नाप्यरयं पुनः।
संस्कृत्य होम्यं तन्मन्त्रैः रुक्मवत्प्राधिकं लयेत्॥
सन्मुत्सवं स्वनामार्गैः वाद्यमङ्गलनिस्वनैः।
मन्त्रे चैव मधूपाद्यैः देवमारो[प्य] तत्परम्॥
भूसुरैर्भक्तजनैः उत्सवं ग्राम्य पर्यटनम्।
पुनरस्तोशपूजान्तं पूर्वमुक्तवदाचरेत्॥
अतः प्रविश्य तं देवं प्रसन्नार्घ्यं समाप्य च।
निवर्त्य भूसुरैः सार्धं ततो जागरणक्रियाम्॥
नीत्वा तमोद्युमः काले गुरुरुत्थाय भक्तितः।
पालिकाद्यं तत्पात्रं न्यस्त्वा चार्यं समात्मजम्॥
द्विजैः सार्धं च पुण्याहं वाचयित्वा गुरुः स्वयम्।
पूर्णाहुतिं निवर्त्यैवं ग्रामधामप्रवेश्य च।
यद्वा तु वेदिकामध्ये वेदविद्भिश्च सात्त्विकैः।
१० होतृभिः सह कर्तव्यं होमकर्मविचक्षणः॥
तत्त्वाभिधं शक्तिसंज्ञं परिवारकलाग्नयो।
सुमद्दुरन्तो हुनेन्मन्त्री स्वकुण्डादिषु पञ्चसु॥
शेषं समर्प्य मूलेन वेदिकापश्चिमे ततः।
गुरुसंख्यान्वितान् पूज्य श्रीशादिरसपञ्चकम्॥

स्वच्छं बेरं प्रतिष्ठाप्य सिञ्चेत्पञ्चामृतैः शिवम् ।
नवभिस्तैर्घटैः स्नाप्य पूजयेद्गुप्तमार्गतः ॥
वाद्यघोषैर्भक्तजनैः नानाविभवसंयुतैः ।
स्वनामभिर्बलिं दत्त्वा मुष्टिना विकिरेद्बुधः ॥
होमामाकल्प कल्पोक्ते देवं मन्त्री विधानतः ।
पञ्चवारं तु तं होमं भ्रामयेत्सम्मुखच्छया ॥
सुभद्रा मूलमाश्रित्य पूजयेत्सर्वाङ्गसुन्दरम् ।
गुरुः कुर्यात्सुभद्राख्यं दिग्विदिक्स्वभ्रपर्वतम् ॥
निशारक्षासंरक्षामायुक्तं कदलीपत्रसंयुतम् ।
दीपजालैश्च कूश्माण्डशकलैः संयुतं पुनः ।
जवापुष्पैश्च संयुक्तं भूसुरानर्चयेत्ततः ।
देशिकं पूज्य दानानि गोभूम्यादीनि दापयेत् ॥
वेदघोषैः शङ्खरवैः पञ्चवाद्यरवैः सह ।
चक्रमन्त्रैश्चाङ्गमन्त्रैः पठितैश्च बलिं हरेत् ।
पञ्चप्रदक्षिणं पश्चात् कृत्वाथ रथपुङ्गवम् ।
प्रार्थयेन्मन्त्रेण सद्भक्त्या वक्ष्यमाणेन सुव्रतः ॥
सुकूश्माण्डकलाकार नमस्ते काष्ठचारिणे ।
सुभद्राधारशाखेषु सर्वभूषणभूषित ।
ममानुज्ञां देहि देव शम्भुमारोपितुं त्वयि ।
प्रार्थयित्वेति भद्राख्यं पञ्चवारं मनूत्तमः ॥
देवमारोपयेन्मध्ये देशिकं बेरवाहकम् ।
१६ सदस्यहोतृकान्मन्त्रबोधकं धोपकान्पुनः ॥
जापकान्सामगान्पाञ्चपाञ्चच्छत्रचामरधारकान् ।
बलिदीपधरान्वेत्रधारकान्पाचकान्ततः ।

पूज्यस्पत्य जनांश्चैतान् सुभक्त्या च निवेशयेत्।
भद्रासनमूलमासाद्य रत्नहेमादिकैः प्रभुः॥
बिकिरेत्पदितः पश्चात् जयशब्दैर्मयं द्रुतम्।
शंखध्वानैः कम्बुनादैः गीतिनृत्तैश्च पाठकैः॥
प्रभूतमैर्ध्र्यवाद्यैश्च सर्वनागरैस्सह।
मूलस्थानं नयेद्रुद्रं भद्रादेवं ततः परम्॥
स्वस्तिसूक्तैः आवर्त्य रथिकादिजनैः सह।
ततो गच्छेन्मृगां हेतु मुक्तवन्मण्टपे चिरम्॥
समर्च्य कुंकुमाद्यैश्च रत्नैः संध्यात्मकं जपेत्।
मूले निवेश्य देवेशं प्रसन्नारण्यार्चनं सुमैः॥
गुरुः पूर्वोक्तमार्गेण दत्वा भूतबलिं हरेत्।
सोत्रेशमर्च्य तन्मन्त्रैः शङ्ख(रत्न)काहलनिस्वनैः।
निर्गच्छेद्वाद्यघोषैः विनिद्रां तु सुनौतमं।
तत्परे प्रातरुत्थाय गुरुर्नित्यक्रियां पुनः॥
निवर्त्य भूसुरैः सार्धं प्रतिमां न्यसेत्परम्।
प्रातर्बल्युत्सवं कृत्वा होममत्र तु पश्चके॥
प्रायश्चित्तं स्नानसंज्ञं पूर्णाख्यं शान्तिकाभिधम्।
प्रायश्चित्तारव्यहोमं च हुत्वा तल्लेपसर्व[पं]येत्।
वेदिकापोतरे भागे कुम्भाञ्जलसमर्पयेत्।
सुवासं तत्समीपे प्रयत्यश्च यजेत्ततः॥
रसैस्तैः सिच्य(1)[निमितैः विप्रवैः सार्धं सुमङ्गलां रथं सुत
ग्रामानां गेह परितो नीत्वा भक्तजनैः सह]
18a तैः कृत्वैः निरनमूलाणुना गुरुः।
पूजां बलिं पूर्णमासां नीत्वा तथां विशोत्सवम्।

---

(1) The lines within square brackets are (written) added at the end of fol 96. This is later addition and not inked.

होतव्यं तत्र (त) आचार्यमुख्यैर्विधानवित् ।
स्नात्वा नद्यां तथोत्सृते वाद्यघोषैर्द्विजैः सह ॥
गेहं प्रविश्य देवं मां मन्त्रेण च प्रणम्य च ।
पूर्णाहुतिं च कुण्डेषु होतृभिः सह देशिकः ॥
हुत्वा दानानि दत्वान्ते गोमहिष्यादीनि सुव्रत ।
कुम्भं दत्वा परं पश्चात् दत्वा गोयाति मन्त्रतः ॥
दर्भे [illegible] शय्या गेहान्ते च शयाधिवासम् ।
प्रीतिपूर्वकमं द्वारे नीत्वा मन्त्रविधानतः ॥
पूजयेद्भुक्तवद्देवं शिवकुम्भादिकैर्जलैः ।
सिञ्चेत्पादं मूलमन्त्रैः क्रियाजालं समर्पयेत् ॥
द्विजेभ्यः कर्मकर्तृभ्यो होतृभ्यः सततं परम् ।
दक्षिणामुक्तवद्दत्वा प्रभुर्मोदसमन्वितः ॥
मन्त्रिकं पूजयेत्पश्चात् तन्त्रोपकरणैः सह ।
गां महीं द्रविणं रत्नं भूषणानि धनप्रदः ॥
दत्वा प्रणम्य संतोष्य ततो बाह्यरवैः सह ।
काहलवीणजनैः सर्वैः जयघण्टादिभिः स्वनैः ॥
दीपजालैर्मागधाद्यैः छत्रचामरसंयुतैः ।
गजवाजिरथैः सार्धं यथाविभवविस्तरम् ॥
कुण्डाग्निना सहाचार्यो निरीक्षालयं प्रभुः ।
वाद्यालैर्मानिनः सर्वान् विप्रो तेषां पदं प्रति ॥
मद्यमांसमकुम्भैश्च सिञ्चेच्छ्रुत्वार्धमीश्वरम् ।
शान्तिके कर्म चेत्युक्तं पापजालहरं नृणाम् ।
महत्संपत्प्रदं सद्यः शोकरोगनिवारणम् ।
धनधान्यप्रदं देशे सुभिक्षं स्यान्न संशयम् ॥

10.6 पुत्रपौत्रप्रपौत्रं च प्रदं मृत्युहरं सुत ।
चतुर्वर्णेषु यो वापि कुर्यादुत्सवं मुदा ।
स नरः सर्वभोगांश्च भुङ्क्ते मुक्त्यै सुत ।
तस्मात्पूर्णः (त्वया) समाप्नोति सहजन्मस्य संशयः ॥
पञ्चशाखा मयेत्युक्ता सहस्रात्रक्रियां शृणु ।

इति श्रीवृद्धातुले सर्वागमसारे शिवस्कन्दसंवादे
नैमित्तिककरणे पञ्चरात्राभिषेक शुभद्रौ
सर्वकर्मनिवृत्तिविधानं नाम
षोडशः पटलः ॥

—x—

श्रीः ॥ प्रायश्चित्तविधिं वक्ष्ये उत्सवस्य क्रमेण तु ।
वृषयागविहीने तु ध्वजवेदिविहीनके ॥
ध्वजदण्डविहीने तु मानोन्मानविहीनके ।
तद्भिन्ने पतिते हीने शूलादिपतितेऽपि च ॥
बलिपात्रविहीने च बलिदानविहीनके ।
बलिदीपविहीने च कालातिक्रमणेऽपि च ।
उत्सवे वाद्यहीने च तत्काले कलहे तु वा ।
पूजापर्युषितैर्द्रव्यैः संकरे लिङ्गबिम्बयोः ॥
प्रतिमायानकाले तु पतिते चाङ्गहीनके ।
दीक्षान्तर्युतैः शूद्रैः प्रतिमास्पर्शनेऽपि च ॥
तैरेव यागशालायां संप्रविष्टे कृते तथा ।
उत्सवे त्वथ तद्ग्रामे वास्तौ च मृतिसंभवेत ।
परिवेषविहीने च अस्त्रराजविहीनके ।
चूर्णोत्सवविहीने तु तीर्थकर्मविहीनके ॥

वेद्यां स्थापितकुम्भैश्च अभिषेकविहीनके।
हीनाधिके तथा न्यूने उत्सवं त्वन्यकालतः।
पीठन्यासविहीने तु चण्डयागविहीनके।
उक्तकाले कृतं यत्तदन्यकाले कृतं यदि॥
11a आरब्धादन्यतन्त्रेण शिवया।(1) ~~विस्तरादथ~~
विस्तरादथ वक्ष्यामि सप्तरात्रात्मिकां क्रियाम्॥
कर्तव्यं मण्टपं चादौ चतुर्दशमितैः करैः।
तत्त्रिधा भज्य मध्यांशे वेदिकां च मनोहराम्॥
कुर्वीत सप्त कुण्डानि वेदिका परितो गुरुः।
विधिवद्वर्तयेत्क्रमया मेखलाभिस्त्रिभिः सह।
तुर्यश्रां दिक्षु कुण्डं च सुयोनिं पावकेन्द्रयोः।
स(श)वैन्द्रयोस्त्रिकोणं स्याद्वृत्तवन्नाभिरन्ध्रकैः॥
प्रधानाख्यं वेदिमध्ये वृत्तकुण्डं विचक्षणः।
द्वाराणि तोरणादीनि कुण्डमानानि सुव्रत॥
मण्डनं मण्टपस्योक्तवत्कुर्याद्भूसुरान् ततः।
विघ्नहीनांश्च कर्मज्ञानाहूय प्रीयमानसः॥
नदीं गत्वा तु तैः सार्धं नीत्वा नित्यक्रियां गुरुः।
कृत्वा षड्ढोतृकांश्चैव सदस्यो धनदं पुनः॥
क्षौरकर्मनिवृत्त्यादौ सुस्नानं मृत्तिकादिकैः।
स्नात्वा द्विजोत्तमैः सार्धं फलपक्वैः सुमोदकैः॥
सुवर्णैश्चाथ विघ्नेशं यष्ट्वा नान्दीं च वाचयेत्।
संकल्प्य वरयेद्विप्रान् मधुपर्कक्रियां ततः॥
कृच्छ्रं विधाय स्नानाय दत्वा मूल्याणुना गुरुः।
मृदमानीय विधिवद्वेदिकान्तर्न्यसेत्परम्।

---

(1) Here fol. 10 ends. The verse is incomplete. The subject prāyaścitta is also left. The next fol. 11a begins with saptarātrotsava. Fol. no. is alright.

वृषयागध्वजारोहं दिक्पटं मण्टपध्वजम् ।
यागध्वाग्नि दिशाबद्धा क्रियामुक्तप्रकारतः ॥
कृत्वा संपूज्य देवेशं पुनर्नित्योत्सवक्रियाम् ।
11-6 समाप्य भोजयेद्विप्रान् तत्सायं स्नानपूर्वकम् ।
विनायकं समभ्यर्च्य पुण्याहं वाचय मन्त्रतः ।
अङ्कुरार्थं तु बीजानि वाप्य संशोध्य मण्टपम् ॥
विधिवद्विन्यसेत्कुम्भान् द्वारतोरणगड्डुकान् ।
पताकाख्यांश्च विघेशसंज्ञान्यागशिवाभिधौ ॥
शान्तिकुम्भं विधानेन न्यस्त्वा संपूज्य पूरयेत् ।
ग्रहाभिधान्दिशासंज्ञान्ब्रह्मकुम्भान्कलाभिधान् ॥
कुण्डाभिधांश्च तत्वाख्यान् स्थानबिम्बाभिधान्घटान् ।
मङ्गलाख्यानायुधाख्यान् परिवाराभिधान्घटान् ॥
पिण्डिकाख्यान्पृथङ्मन्त्री सप्तसप्त प्रपूरयेत् ।
तण्डुलाद्य जलाद्यौश्च यद्वारक्षाविधं हुनेत् ॥
वास्तुहोमं तद्बलिं च विकिरेद्दर्भमालया ।
रक्षार्थं गेहपरितो बन्धयेन्मूलमन्त्रतः ॥
केतुं यागाधिपं पश्चात्समर्च्यैशं विधानतः ।
भेरीं सन्ताड्य विधिवद्भूतानाह्वायपत्ततः ॥
बलिं दत्त्वा स्वनामाद्यैः यागस्थानं विशोधिवम् ।
यष्ठु सूत्रं च बध्नीयात् तद्विधानेन मन्त्रिकः ॥
शिबिकामार्चितं मध्ये देवं न्यस्त्वोत्सवं नयेत् ।
वेदघोषैः स्वस्तिवाक्यैः विविधैर्वाद्यनिस्वनैः ॥
छत्रजालैर्वीजनाद्यैः बलिदीपकदम्बकैः ।
चामरैर्धूपधूमाद्यैः पताकाद्यैश्च तोरणैः ॥

मागधैः स्तोत्रपाठाद्यैः भूमिपादि प्रभूतमैः।
12a चतुर्वर्णोद्भवैर्मर्त्यैः गीतनृत्तैश्च गायकैः॥
आयुधौघैर्गजाश्वाद्यैः पुष्पवृष्टिकदम्बकैः।
विचित्रनृत्तसंयुक्तैः ग्रामालं धाम शंकरम्॥
परितो मण्टपे पश्चात् अर्चयेद्विधिना बुधः।
अस्त्रेशमर्च्य लाङ्गूल्य फलाद्यैस्तादृशोच्छिवम्।
धामान्तः प्रविशेदन्ते पूज्य देवं च मूलतः।
गीतनृत्तादिकैर्गेहे जनो निद्रां निवारयेत्॥
द्विजैः सहैव तत्प्रातः स्नात्वा नित्यक्रियां गुरुः।
निवर्त्य पत्रिकार्थाय मानं यज्ञा न्यसेत्पुनः॥
गणेशं च समभ्यर्च्य पुण्याहं वाचयेद्गुरुः।
पूजा बल्युत्सवं नीत्वा यागवेद्यां न्यसेच्छिवम्॥
यज्ञा द्वारे वेदघोषान् वदेत्कोणमनून्स्तुत।
पञ्चगुर्वादिकान्मन्त्रान् मूलं यागमनून्ग्रहान्॥
ब्रह्माणं च दिशामन्त्रान् चतुरस्त्रमनूनपि।
परिवारमनून्सूक्तान् मङ्गलान्प्रपठेत्क्रमात्॥
आयुधानून् तथा पश्चात् होतृभिः सह देशिकः।
धनदेन सदस्येन ब्रह्मणा सह पावकम्॥
विधिवज्जनयेन्मन्त्री स्वकुण्डे शिवनामतः।
तदग्निं सर्वकुण्डेषु न्यस्त्वा चाग्निक्रियां नयेत्॥
पुनर्होमं मध्यसंज्ञं गणेशाख्यं स्वयभिधम्।
लिङ्ग मुख्याख्य बिम्बाख्यौ यागसंज्ञं शिवाभिधम्॥
होमयेच्चरुलाजाद्यैः दश द्रव्यैर्विचक्षणः।
कलशसंख्य धरान्पश्चा द्वेदिकाग्रे प्रपूर्ज्य च

128 न्यस्त्वा सुधारसान् तस्मिन् व्यूहे चैव विधानतः ।
पूजासंपातमन्त्रैशं गेहान्तर्वेशयेत्पुनः ॥
पञ्चामृतैश्च तैः शंभोः स्नापयेत्पूजयेच्छिवम् ।
हविरर्च्य बलिं दद्यादुत्सवं पूर्वमुक्तवत् ॥
प्राचार्य पूजयेद्विप्रान् तत्सायं स्नानपूर्वकम् ।
नित्यं नीत्वा स्वकुण्डे कुच क्षीरंच तूरिकं गुरुः ॥
मरीचजीरकं पत्रं कुङ्कुमं रोचनं ततः ।
मूलमन्त्रेण होतव्यं सर्पिषा सह भक्तितः ॥
शेषमर्च्य यजेद्देवं दीपौघैर्भ्रमियेत्ततः ।
वृषयन्त्रमलंकृत्य शोधयित्वान्यसेच्छिवम् ।
यजेत्पञ्चोपचाराद्यैः नर्तनैः स्तोत्रपाठकैः ।
निद्रां निवारयेल्लोकः प्रातरुत्थाय तत्परम् ॥
गुरुर्नित्यक्रियां नीत्वा पूजाबल्युत्सवं ततः ।
निवत्य वेदिकामध्ये देवं यष्ट्वा द्विजैः सह ॥
होमं कृत्वाभिधं मन्त्री घोरसंज्ञं त्रियम्बकम् ।
हुत्वा तच्छेषमर्चेशो वेदिकादक्षिणे घटान् ॥
कलशसंख्यांश्च संपूर्य तस्मिन्व्यूहे सुधारसान् ।
यष्ट्वा शिवं च धामान्तर्वेश्य सिञ्चेत्सुधारसैः ॥
पूजितैस्तैर्घटैः पश्चान्मूलमन्त्रेण धर्मवित् ।
पूजां हविर्बलिं दत्त्वा चोत्सवं पूर्वमुक्तवत् ॥
शुचियुक्तःक्षपायां वै स्वकुण्डे समुचितमः ।
गुरुपतौ मूलमन्त्रेण तृटिकाधैर्ययोक्तवान् ॥
हुत्वा देवं समभ्यर्च्य यागेशं केतुदेवताम् ।
" यन्त्रं मयूरसंज्ञं च भूष्य तस्मिन्यजेच्छिवम् ॥

बल्युत्सवं पर्यटित्वा मण्टपे च शिवार्चनम्।
13a अस्त्रं चार्चक्रमं प्रोक्तं वस्त्रत्वाय दिगम्बरम्।
प्रतिशं चैव देवान्तर्यजेत्सप्तोपचारकैः।
विनिद्रां विधिवन्मर्त्याः नीत्वा तत्प्रातरं गुरुः॥
स्नात्वा निवर्त्य नित्यानि घटिकागणपाभिधम्।
वाचयित्वाथ पुण्याहं पूजां बल्युत्सवक्रियाम्॥
समाप्येशं यागमध्ये यष्ट्वा होमं द्विजैः सह।
दिशाहोमान्स्वगायत्रीमन्त्रं हुत्वा शिवे [विशे?] ततः॥
समर्च्य [र्प्य?] हुतशेषं च वेदिका पश्चिमे वरान्।
कलासंख्यान् स्नान पञ्च सूर्यं पूज्याथ कर्मवित्॥
पश्चाद्दिशाम्ब गेहान्तः देवं स्नाप्य सुधारसैः।
कुम्भांश्च संच्य संपूज्य हविर्दत्वा बलिं हरेत्॥
उत्सवं चोत्सवात्पूर्वं भोजयेद्भूसुरान्बहून्।
सन्ध्याकर्म निवर्त्याथ स्तम्भाग्नौ शुचिषु क्रमात्॥
सप्तद्रव्यैर्हुनेत्कुण्डे चोत्सवान्तरिकादिकैः।
शिवं यष्ट्वाथ यागेशं ध्वजे चैव हविर्ददेत्।
दीपजालैः परिभ्राम्य भूतानाहूय निस्वनैः।
बलिं दत्वा परं मन्त्री शेषं यन्त्रे शिवं यजेत्॥
उत्सवश्चोत्सवं पूर्वमस्त्रेशार्चां विधानतः।
नीत्वा देवं च धामान्तं वेशयित्वा समर्चयेत्।

[Abruptly ends. Saptarātrotsava is, perhaps, almost com
Fol. 13b is left blank.

Fol. 14a अतः परं प्रवक्ष्यामि नवरात्रात्मिकां क्रियाम्।
मण्टपं कारयेदादौ पञ्चविंशति हस्तकैः।

तत्रिभज्य च मध्यांशं वेदिका च मनोहराम् ।
कुर्वीत नव कुण्डानि वेदिका परितो गुरुः ॥
चतुरस्रं तु पूर्वास् [या] माग्नेयां तु भगाकृतिम् ।
याम्यामर्धेन्दुसदृशं नैरृत्यां तु त्रिकोणकम् ॥
वारुण्यं वर्तुलं कुण्डं वायव्यां च षडस्रकम् ।
पद्मकुण्डं तु सौम्येशे कारयेच्चाष्टकोणकम् ॥
इन्द्रशंकरयोर्मध्ये वृत्तकुण्डं प्रधानकम् ।
विधिवद्वर्तयेद्दृढया मेखलाभिस्त्रिभिः सह ॥
सयोनिनाभिसंयुक्तं सर्वलक्षणसंयुतम् ।
द्वाराणि तोरणादीनि कुण्डमामानि सुव्रत ॥
मण्डनं मण्डस्यैकं [पैःसाकं] कुर्यात्प्रागुक्तलक्षणैः ।
विप्रानाहूय कर्मज्ञान् श्रोत्रियान् वेदपारगान् ॥
द्विजानाहूय कर्मार्थं प्रार्थयेद्देशिकस्ततः ।
नदीं गत्वा तु तैस्सार्धं स्नात्वा विप्रोत्तमैः सह ॥
गुरुर्ब्रह्मा च धनदो सदस्यश्चाष्ट होतृकाः ।
क्षौरकर्म तदा कुर्युः नद्यादौ परतः परम् ॥
मृदा स्नानं च विधिवत् कृत्वा देवालयं पुनः ।
गत्वा द्विजोत्तमैः सार्धं वेदमङ्गलनिस्वनैः ॥
देवं संपूज्य संकल्प्य कर्मजालं समारभेत् ।
विघ्नेशमर्चयेदादौ फलैः स्वर्णैः प्रसूनकैः ।
पक्वैश्च मोदकाद्यैश्च लड्डुकैः पृथुकैः सह ।
ततो नान्दीक्रियान्नीत्वा वरयेद्विधिवद्द्विजान् ॥
मधुपर्कं च कूर्चं च मृदमानीय मण्टपे ।
वृषयागध्वजारोहं दिक्पटं मण्टपध्वजम् ॥

यागधाम्नि दिशावस्त्रक्रियायुक्तप्रकारतः।
कृत्वा संपूज्य देवेशं पुनर्नित्योत्सवक्रियाम्॥
समाप्य भोजयेद्विप्रान् तास्मायं स्नानपूर्वकम्।
पुण्याहं वाचयेत्पश्चा यागमण्टपसंस्कृतिम्॥
146 कृत्वा बीजानि वापयेत् विघ्नेशादिघटान्यजेत्।
द्वारतोरणकुम्भांश्च गड्डुकां वर्धनीं शिवम्॥
पताकाख्यांश्च विघ्नसंतान्यागशिवाभिधौ।
शान्तिकुम्भं विधानेन न्यस्त्वा संपूज्य पूरयेत्॥
ग्रहाभिधान्दिक्शासंज्ञान् ब्रह्मकुम्भान्कलाभिधान्।
कुण्डाभिधांश्च तत्त्वाख्यान् स्थलबिम्बाभिधान्घटान्॥
एतान्घटान्पृथक्कृत्वा ग्रहसंख्यान्प्रपूजयेत्।
तण्डुलाढ्यजलाढ्यौ च यष्ट्वा रक्षाभिधं हुनेत्॥
वास्तुहोमं तद्बलिं च विकिरेद्दर्भमालया।
रक्षार्थं गेहपदितो बन्धयेन्मूलमन्त्रतः।
यानं संशोध्य संप्रोक्ष्य देवं तत्र निधाय च।
प्रदक्षिणत्रयं कृत्वा यागशालां प्रवेशयेत्।
शिवाग्निं जनयेत्तत्र गर्भाधानपुरस्सरम्।
भेरीं संताड्य विधिवत् भूतानाह्वापयेत्ततः।
शिबिकामध्य तन्मध्ये देवं न्यस्त्वोत्सवं नयेत्।
वेदघोषैः स्वस्तिवाक्यैः विविधैर्वाद्यनिस्स्वनैः।
छत्रजालैर्वीजनाद्यैः कोलिध्वजकदम्बकैः।
चामरैर्धूपधूमाद्यैः पताकाद्यैश्च तोरणैः॥
मागधैः स्तोत्रपाठाद्यैः भूमिपादिप्रभृतमैः।
चातुर्वर्ण्यैर्द्विजैर्भक्तैः गीतनृत्तैश्च गायकैः॥

आमुखोद्यैर्गजाश्वाद्यैः पुष्पवृष्टिकदम्बकैः।
विचित्रनृत्तसहितं ग्रामान्तं धाम शंकरम्॥
वहितो मण्डपे पश्चा दर्पयेद्विधिना बुधः।
अस्त्रेशमर्चयित्वा तु लाङ्गलैस्ताडयेच्छिवम्॥
धामान्तः प्रविशेदन्ते पूज्य देवं च मूलतः।
15a गीतनृत्तादिकैः सार्धं जनो निद्रां निवारयेत्॥
द्विजैः सहैव तत्प्रातः स्नात्वा नित्यक्रियां गुरुः।
घटिकायन्त्रमुद्धृत्य पुण्याहं वाचयेत्ततः॥
पूजाकल्पोत्सवं नीत्वा यागवेद्यां न्यसेच्छिवम्।
यष्टा द्वारे वेदघोषान् विदिक्स्वस्त्रमनुं जपेत्।
पञ्चयागादिकान्मन्त्रान् मूलं यागमनून्ग्रहान्।
ब्रह्माण्डं च दिशामन्त्रान् परिवारमनून्स्तुत॥
शान्तिमन्त्रादिकान्सर्वान् मङ्गलान्यज्जपेत्क्रमात्।
आमुखाण्डन् ततः पश्चात् धातृभिः सह देशिकः॥
धनदेन सदस्येन ब्रह्मणा सह पावके।
विधिवद्धोमयेन्मन्त्री स्वकुण्डे शिवमन्त्रतः॥
तदग्निं सर्वकुण्डेषु न्यस्त्वा चाग्निक्रियां नयेत्।
लिङ्गशुद्ध्याख्य बिम्बाख्यौ यागसंज्ञं शिवाभिधम्॥
होमयेच्च फलाजाद्यैः दशद्रव्यैर्विचक्षणः।
कलासंख्यघटान्पश्चाद् हृदिकाग्रे प्रपूर्य च॥
न्यस्त्वा सुधारसान्मन्त्री तस्मिन् घटे चैव विधानतः।
पूजया संपातमन्त्रेशं गेहान्तर्वेशयेत्पुनः॥
पञ्चामृतैश्च तैः कुम्भैः स्नपयेत्पूजयेच्छिवम्।
हविरर्घ्यं बलिं दद्यादुत्सवं पूर्वमुक्तवत्॥

प्रच्यार्य पूजयेद्विद्वान् तत्सायं स्नानपूर्वकम् ।
नित्यं नीत्वा स्वकुण्डेषु क्षीरं च नूर्तिकं गुरुः ॥
मरीचिजीरकं पत्रं कुङ्कुमं रोचनं ततः ।
मूलमन्त्रेण होतव्यं सर्पिषा सह देशिकः ॥
शंखमर्च्य यजेद्देवं दीपैर्वैर्भ्रामयेत्ततः ॥
15-b पिष्ट्वा कुक्कुटकं भूत्वा प्रोक्षयित्वा न्यसेच्छिवम् ।
बल्युत्सवं समाचार्य मन्त्रेशान्तं तु पूर्ववत् ।
नीत्वा चामरैर्देवं धाम्नन्तर्वेशयेत्परम् ॥
यजेत्वक्षोपचाराद्यैः नर्तनैः स्तोत्रपाठकैः ।
निशां निवारयेल्लोकः प्रातरुत्थाय तत्परम् ।
गुरुर्नीत्वा क्रियां नीत्वा पुण्याहं वाचयेद्गुरुः ।
ततो बल्युत्सवं नीत्वा यागशालां प्रविश्य च ॥
होमं ब्रह्माभिधं मन्त्री घोरसंज्ञं त्रियम्बकम् ।
हुत्वा तच्छेषमर्चेशो वेदिकादक्षिणे पथान् ।
कलशं ध्यांश्च संपूज्य तस्मिन्मूर्ने सुधारसान् ।
यष्ट्वा शिवं च धामान्त वेष्य सिञ्चेत्सुधारसैः ॥
पूजितं स्तैर्व्यवैः पश्चान्मूलमन्त्रेण धर्मवित् ।

[Abruptly ends. Almost complete. Half a page on fol. 15-b is blank.]

—x—

16a नित्योत्सवविधिं वक्ष्ये रात्रौ विशेषतः ।
गणानां च बलिं दद्यात्स्वनाम्ना च विधानतः ॥
नानाविभवसंयुक्तं मालादीपैरलंकृतम् ।
दीपतोरणशोभाढ्यं वितानाद्यैरलंकृतम् ॥

मुक्तादामैः स्वर्णदामैः धूपदीपैस्तु शोभितम् ।
नानारत्नसमाकीर्णे वरसिंहासने शुभे ॥
कांस्यजे ताम्रजे वापि दारुजे वा मनोहरे ।
तल्पोपधानचेलाद्यैः पुष्पमाल्यैर्विभूषिते ॥
न्यस्त्वा बिम्बन्तु तन्मध्ये यथाजनसमोद्भवम् ।
उपविश्यासने मन्त्री तद्वद्भूषितः शुचिः ॥
गुरोर्दक्षिणभागे तु देवनिमकस्य धारकः ।
वेदादिघोषका विप्राः पार्श्वयोरुभयोः स्थिताः ॥
राजानो मन्त्रिणश्चैव दक्षभागे व्यवस्थिताः ।
छत्रचामरवेत्रादिधारकाः सेवका जनाः ॥
वामदक्षिणभागे तु पङ्क्तिरूपेण संस्थिताः ।
गायकाश्चाग्रतश्चैव नर्तका वाद्यवादकाः ॥
सेनां कुर्यात्पुरोभागे ग्रामं चैव अखिलतः ।
देवस्य पश्चिमे भागे पुरस्त्रीजनसंस्थिताः ॥
स्थित्वैवं च जनाः सर्वे ततः पूजां समारभेत् ।
कल्पयेदासनं मन्त्री छत्रचामरमेव च ध्यानं मन्त्री प्राणायामादिकं नयेत् ॥
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।
गन्धं पुष्पं च धूपं च दीपं नैवेद्यकं पुनः ॥
ताम्बूलं दापयेन्मन्त्री छत्रचामरमेव च ।
16-6 दर्पणं व्यजनं वत्स वेदघोषादिकं ततः ॥
नमस्ते भगवान् रुद्र सर्वभोगप्रियाव्यय ।
ऋग्वेदादिमयं साङ्ग शृणु चिन्त्यात्मक प्रभो ॥
इति संप्रार्थ्य देवेशं मन्त्रैः पूर्वैः समर्चयेत् ।
गान शृणु महादेव षड्जमध्यमभेदतः ॥

श्री रागादि महारागान् धारयस्व कृपानिधे।
तुलानलोकन शम्भो कुरु गङ्गाधर प्रभो॥
उरोभावशिरोभावनेत्रभावादि समुतम्।
नागस्वरं पिनाकं च झल्लरीन्च कबाधकम्॥
शङ्खनादं वेणुरवं डिण्डिमादीन्शृणु प्रभो।
इति विज्ञाप्य देवेशं सर्वोपचारान्तरम्॥
शिरसा शिरमादाय प्राकारे सप्तदक्षिणम्।
कृत्वा गानयुतं भक्त्या देवमन्तः प्रवेशयेत्॥
इत्यादर्घ्यं शिवार्पेति दुग्धान्नं [व्रं?] तु निवेदयेत्।
नीराजय बहुदीपैर्यै ताम्बूलं चार्पयेत्प्रभो॥
समर्प्य ताः क्रियाः सर्वाः स्वरद्म भवनं व्रजेत्।
इति ते कथितं वत्स सभाख्य महदार्चनम्॥
यः कुर्यात् सुखं भोगांश्च प्राप्नोत्येव न संशयः।
प्रमादोत्थापितं कुर्याः मण्टपे चार्चनं गृहे॥
तद्दोषात् भङ्गमाप्नोति अलक्ष्मी वर्धते सदा।
तस्मात्समोक्तमार्गेण सेवां सर्वां समाहितैः॥

इति श्रीवातुले सभामण्टपार्चनविधिपटलः॥

—x—

श्रीः॥ शिवलिङ्गप्रतिष्ठार्थं महीभोगादिसिद्धये।
17a निर्वंशभूमिं संत्यज्य सुभूमौ स्थापयेच्छिवम्॥
यदि निर्वंशभूमौ चेत्प्रमादात्स्थापिते शिवे।
कर्तुर्वंशक्षयः सद्यो तत्र तत्कर्म निष्फलम्॥
प्रागास्ये सर्वसंपत्तिः वंशवृद्धिर्भवेत्प्रिये।
दक्षिणास्ये निष्फलं स्यात् मरणं वंशनाशनम्।

पश्चिमास्ये धनं धान्यं चोत्तरास्ये जयो भवेत्।
तस्माज्ज्ञात्वा तु पूर्वास्यं प्रकर्तव्यं न संशयः॥
धनार्थं राज्यदुर्गार्थं संयोगे लिङ्गमिष्यते।
बहुधा दोषमाग्देवी चाश्वस्याद्विना कृते॥
गुरुस्तस्मात्तयोरैक्यं चाश्वलब्धं तु कारयेत्।
लिङ्गप्रतिष्ठं कुर्वीत सौम्यपीठे विचक्षणः॥
भिन्नपीठे प्रमादेन प्रतिष्ठाकर्म कारितम्।
सर्वसंपद्विनाशः स्यान्निश्चितं न संशयः॥
केचिन्मतं प्रवक्ष्यामि लिङ्गस्थापनकर्मणि।
द्विजप्रतिष्ठालिङ्गे च पूर्वद्वारं प्रकल्पयेत्॥
अन्यद्वारं क्षत्रियाणां वैश्यानां पश्चिमं प्रिये।
शूद्राणामुत्तरद्वारं विदिग्द्वारं तदेतरम्॥
चातुर्वर्णोद्भवा मर्त्याः सुखसंपत्त्यपेक्षिताः।
स्ववंशवृद्धिनिरता राज्यभोगादिकाङ्क्षिणः॥
पूर्वद्वारं प्रकुर्वन्ति लिङ्गस्थापनकर्मणि।
तस्माल्लिङ्गालयद्वारं दक्षिणं वर्जयेद्बुधः॥

इति आगमसारे शिवालयद्वारनिर्णयम्॥

—×

श्री॥ गजार्पणविधिः प्रोक्ता राज्ञां संपत्करा शुभा।
17b शृणु वत्स विशेषेण तुरगस्यार्पणं परम्॥ 17a
सर्वशत्रुजयं पुण्यं सर्वदा विजयप्रदम्।
लक्ष्मी चैव सुतश्चैव भोगश्रीकान्तिवृद्धिदम्॥
सुलक्षणसमोपेतं नर्तनैर्विविधैर्युतम्।
श्वेतवर्णं [शिव] [भार?] नितान्तवत्स शिवायै तुरगं शुभम्।

वाहनार्थं प्रदातव्यो भक्तियुक्तेन भूतले।
सुदिने च नदीं गत्वा क्षालयेत्तुरगं जलैः।
पुनर्देवालयं प्राप्य प्रोक्षयेत्पञ्चगव्यकैः।
पुण्याहं शुद्धतोयेन तन्मन्त्रेण गुरूत्तमः॥
समर्च्य गन्धपुष्पाद्यैः स्मारूपं स्तोत्रम्।
देवीं च विधिवत्पूज्य कलशैर्नामसंस्तुतम्॥

प्रियगतिरतितुङ्गः रत्नकल्याणयुक्त (पर्याण)
कनकमयविभूषः स्निग्धगम्भीरघोषः।
भगवति कलितोयं वाहनार्थं मया तेन
तुरगतशसमेतो वायुवेगस्तुरङ्गः॥

संप्रार्थ्यैवं प्रार्थयित्वा प्रणमेद्दण्डवद्भुवि।
भूसुरैर्बान्धवैः सार्धं प्रभुभृत्यैर्नृपालकैः॥
नानाविभवसंयुक्तं स्नाति हर्षसमन्वितम्।
नित्योत्सवादिकं कुर्यात् गजवाजिभटैः सह।
देवीमन्ते प्रतिष्ठाप्य भोजयेद्ब्राह्मणान्बहून्।
स्वशक्त्या दक्षिणां दद्यात् देव्यास्तु प्रियतामिति।
इत्यर्पणविधिं कुर्यात्स नरो भोगवान्भवेत्।
16a राज्यवान्कोशवान् भास्वत् पुत्रवान्पौत्रवान्भवेत्।

इति वातुले शिवस्कन्दसंवादे तुरगारोपणविधिर्नाम
एकोनषष्ट्यधिकशतपटलः। 17a

—×—

श्री॥ सर्वलोकसुभिक्षार्थं राज्ञो राज्यस्य वृद्धये।
रथभेदं प्रवक्ष्यामि संक्षेपाच्छृणु षण्मुख॥
रथं चक्रन्तु शकटः स्पन्दनः स्यन्दनः स्मृतः।

अष्टचक्रः सुभद्रः स्यान्मेरुस्तु दशचक्रकः।
रथो द्वादशचक्रः स्यात् कलासंख्यस्तु पुष्कलः॥
विंशच्चक्रो हलः प्रोक्तो त्रिंशच्चक्रो महारथः।
त्रिकूटस्थाने समं चक्रं विषमे विगुणे स्मृतम्॥
विषमस्य समस्यापि भेदाश्चैव चमूपते।
रथभेदाः समाख्याताः कुण्डभेदं वदाम्यहम्॥
एककुण्डक्रमं यत्र शकटोत्सवमाचरेत्।
[प्रोक्त]
त्रिकुण्डे स्यन्दनं पञ्चकुण्डे सुभद्रकम्॥
सप्तकुण्डे तथा मेरौ नवकुण्डे रथोत्सवम्।
कुण्डद्वादशके मन्त्री पुष्कलं च यथाक्रमम्॥
हलः षोडशकुण्डे स्याद्विंशत्कुण्डे महारथः।
अलाभे सर्वकुण्डेषु स्यन्दने शकटे तु वा॥
कुण्डभेदो मयेत्युक्तो मण्डपं च ततः शृणु।
पञ्चहस्तमितं कुर्यान्मण्डपं शकटोत्सवे॥
स्यन्दने सप्तहस्तं च नवहस्तं सुभद्रके।
दशहस्तं तथा मेरौ त्रयोदशकरं रथे॥
पुष्कले षष्टहस्तं च पञ्चविंशत्करं हले।
महारथोत्सवे कुर्यात्त्रिंशद्धस्ते च मण्टपम्॥
18-6 कुण्डानां मण्टपानां च लक्षणं पूर्ववत्स्मृतम्।
पञ्चोत्सवं तु शकटे स्यन्दने सप्त वै क्रमात्। 17a
नवोत्सवं सुभद्रे च सुमेरौ च दशोत्सवम्।
रथकर्मणि मन्त्रज्ञो रुद्रसंख्या समाचरेत्॥
पुष्कले तिथिसंख्यांश्च हले विंशोत्सवान्स्मृत।
पञ्चविंशोत्सवं चैव कर्तव्यस्तु महारथे॥

आकृतिं च शृणु स्कन्द शकटो विजनाकृतिः।
स्यन्दनं कुम्भ[कुम्भ]लाकारो कूश्माण्डाकारमद्भुतः॥
मृदङ्गाकारमेरुः स्यात् कुम्भाकारं रथस्य तत्।
कुम्भाकृतिः पुष्कलाख्यो लाङ्गलीफलवद्गलः॥
महारथस्य भूनाथ मातुलुङ्गफलाकृतिः।
[पता]
आकृतिश्चेति विख्याता काः शकटादिके॥
पताकास्त्रिशताः कार्या स्यन्दने च चतुःशताः।
भद्रे पञ्चशताः प्रोक्ताः सुमेरौ षट्शताः स्मृताः॥
रथे चाष्टशताः पुत्र पुष्कले च सहस्रकाः।
द्विसहस्रं हले कार्यं त्रिसहस्रं महारथे॥
यथोक्ताकृतिवद्यस्मा शकटादिरथं गुरुः।
सम्यग्युक्तं पताकाभिः भूषिकाजालिकादिभिः॥
इक्षुभिः कदलीभिश्च दर्पणैः पूर्णकुम्भकैः।
तोरणैश्च वितानाद्यैः छत्राद्यैः पुष्पमालकैः॥
चन्दनागुरुकर्पूररसैः सिक्तं रथं तथा।
घण्टाभिश्च ध्वजाद्यैश्च भूषयेद्विविधं रथम्॥
फलैर्नानाविधैश्चैव मुक्तामालाभिरेव च।
धूपैर्गुग्गुलसंभूतैः धूपयेच्छकटादिकैः॥
19a बीजाङ्कुरैः स्वर्णदाम्नैः पीतवस्त्रैश्च चामरैः।
शकटाग्रे यजेच्छत्रं कुम्भं तु स्यन्दनाग्रके॥ 17a
सुभद्राग्रे त्रिकुम्भांश्च कुम्भाः स्वर्णमया कृताः।
मेरोरग्रे पञ्चकुम्भान् रथाग्रे सप्तकुम्भकान्॥
नवकुम्भान्पुष्कलाग्रे दशकुम्भान्हलाग्रके।
दशत्रयसुताङ्कुम्भान् यजेद्युत्स महारथे॥

शकटस्य मुखं चैकं स्यन्दनस्य चतुर्मुखम्
मुखाष्टकमथान्येषां तथा द्वारं प्रकल्पयेत्।
चक्रं च चक्रदण्डं च पट्टिकां चोपपट्टिकाम्
गुरुशिल्प्यनुसारेण शकटादिरथं सुत॥
योजयेल्लक्षणैः सम्यगुक्तवस्त्रादिभूषणैः।
त्रिदण्डसंमितो दीर्घः शकटस्तु प्रशस्यते॥
पञ्चदण्डः स्यन्दनस्तु सुभद्रः सप्तदण्डकः।
नवदण्डस्तथा मेरौ दशदण्डमितो रथः।
दण्डद्वादशको दीर्घः पुष्पकस्तु महामते।
हेलः षोडश दण्डः स्यात् द्विकाद्दण्डो महारथः॥
तदर्धमङ्गुली वत्स कीर्तिता रथकर्मणि।
रथदण्डाः समाख्याता रथपूजां ततः शृणु॥
अघोरास्त्रं जपेन्मन्त्री रथं संस्पृश्य पाणिना।
प्रायश्चित्तात्मक होमं च कुर्वीत रथदक्षिणे॥
दिशाहोमं ततः कुर्यात् प्राच्यादिषु यथाक्रमम्।
तत्तद्दिक्पालवर्णांश्च बद्ध्वा तद्दिक्षु पूजयेत्॥
बलिं दद्यात्ततो ध्यायेत्कोलात्मानं रथं तदा।
तत्र देवान्समावाह्य रथस्याङ्गेषु देशिकः॥
अक्षेषु मायां चन्द्रार्कौ चक्रेषु परिपूजयेत्।
कीलकेषु रुद्रांश्चैव स्कन्धे त्वाकाशमेव च॥ 17a
19b महादण्डद्वये शक्तिमाधाराख्यां यथाविधि।
पट्टिकासु तथा रुद्रान् गात्रं तद्बन्धकेषु च॥
धर्मादीनर्चयेन्मन्त्री. वायुमात्मानमन्तरे।
अरेषु द्वादशादित्यान् शैलकानचलानपि॥

रथप्रासादशिखरे स्तूपिकायां यथाविधम्
तत्पार्श्वे तु चतुर्दिक्षु पूजयेच्च यथाक्रमम् ॥
षण्मुखं दक्षिणामूर्तिं हरिं च चतुराननम् ।
शूलपाणिं परशुपाणिं शूरेषु परिपूजयेत् ॥
रथप्रान्तेषु दिक्पालान् पूजयेच्च विशेषतः ।
दलेषु पूजयेदष्ट विद्येशान्परिकल्पयेत् ॥
जयं च विजयं चैव तदग्रे पार्श्वयोस्तथा ।
दिग्गजान् वसूनष्टौ स्तम्भेषु परिपूजयेत् ॥
चतुर्दिक्षु चतुर्वेदान् पूर्वादिषु यथाक्रमम् ।
ब्रह्माणं सारथिस्थाने हयेषु मरुतः पुनः ॥
मुखे वरुणमभ्यर्च्य जठरेन्दुं पदेनिलम् ।
देवानेतान्प्रपूज्य शक्त्या स्नापयेत्कलशोदकैः ॥
गन्धपुष्पाक्षतैर्धूपैः दीपैश्च परितोषयेत् ।
गुळान्नैः कृसरान्नैश्च फलैर्नानाविधैरपि ॥
भक्ष्यैर्भोज्यैश्च विविधैरुपहारैः प्रलोभयेत् ।
भूताङ्कुरेण हविषा बलिं दद्याद्विशेषतः ॥
कृत्वैवं विधिवत्सर्वं रात्रौ तमधिवासयेत् ।
ततः प्रातर्विशुद्धात्मा होमं कृत्वा बलिं हरेत् ॥
महेश्वरं समभ्यर्च्य रथस्यारोहणं प्रति ।
प्रार्थयेत्परया भक्त्या पार्वतीसहितं प्रभुम् ॥
देव देव जगन्नाथ भक्तानामभयप्रद । 17
२०९ रथस्यारोहणं कर्तुमागच्छ परमेश्वर ॥
इति संप्रार्थ्य गौरीशं सर्वाभरणभूषितम् ।
पार्वतीसहितं देवं त्रिशूलं च विभूषितम् ॥

अन्नं नानाविधं तत्र रथाग्रे च निवेदयेत्।
ततो विप्रान् समभ्यर्च्य दक्षिणाभिश्च तोषयेत्॥
आचार्यं पूजयेद्भक्त्या गोभूवासो हिरण्यकैः।
लड्डुलिभिः फलैस्ताम्र स्वर्णादिविकिरैस्तथा॥
वासुक्यादिमहानागान् रज्जुष्वावाहयेद्गुरुः।
चतुर्वेदान्वदन्रज्जून् ग्राहयेद्देशिकस्तथा॥
राज्ञां शस्तं रज्जुमूले रज्जुमध्येऽपि मन्त्रिणाम्।
तयोर्मध्ये भूसुराणां तदग्रे सर्वदेहिनाम्॥
राज्ञां राज्यप्रदं मूलं तन्मध्यं धनदं नृणाम्।
विद्याप्रदं तयोर्मध्ये तदग्रं तु सुखप्रदम्॥
नृत्तगीतसमायुक्तं यात्रामारम्भयेत्ततः।
रथस्य गमने वाद्यान् वादयेत्तु विशेषतः।
रथपूजाभिदं वत्स विशेषं च वदाम्यहम्।
महारथोत्सवे शस्तो ममलोके च भूपते॥
हलोत्सवे विष्णुलोके ब्रह्मलोके च पुष्पकः।
रथास्त्वन्ये मर्त्यलोके प्रशस्ताश्चोत्सवादिके॥
तत्र भेदो विशेषोऽस्ति पञ्चब्रह्मादिभेदतः।
तत्पूर्वे तु सुभद्रस्या वामदेवं तथैव च॥
सद्योजाते शिवस्थाने महोत्सवमाचरेत्।
रथोत्सवमघोरे च धर्मकामादिवृद्धये॥
सहितन्त्रेषु कर्तव्यः शंकरस्यन्दनोत्सवः। 17
20-6 रथयुग्मं न प्रशस्तं युग्मदेवालये सुत॥
युग्मालये रथश्चैकं तन्त्रकर्म पृथक्पृथक्।
द्विरथश्चैकदेवस्यादन्यथा निष्फलं भवेत्॥

ध्वजादितीर्थपर्यन्तं रथयुग्मं प्रशस्तकम्।
वर्ज्यं पृथग्रथं वत्स राजा राष्ट्रं विनश्यति॥
शिवशक्तिर्यथा वत्स तथा युग्मरथं स्मृतं।
वर्ज्यं युग्मरथं वत्स राजा भङ्गत्वमाप्नुयात्॥
तस्मात्सर्वप्रयत्नेन द्विरथं कारयेद्गुरुः॥ श्रीः।

*

शकटादिरथे वत्स भिन्ने दग्धे च पातिते।
रथांशादिमध्यान्ते प्रमादाच्छिन्नभिन्ने सति॥
दोषं शान्तिं फलं पुत्र संक्षेपेण वदाम्यहम्।
चक्रभिन्ने चलत्वं स्या शाखे दृष्टे धनक्षयम्।
तिर्यग्दण्डे बलं हन्ति पट्टिकायां तथैव च।
मूर्तियुक्फलके स्तम्भे स्वराज्यं पतनक्षयम्॥
रथ द्वारादिके नाशे रोगबाधा भविष्यति।
रथभित्तौ विहीने च तलके च विहीनके॥
दुर्भिक्षं प्राप्नुयुः सर्वे मृत्युबाधां तथैव च।
कलिबेररथे भिन्ने हीने बहुशत्रुभयं भवेत्।
कलिबिम्बे दृश्यके च राजा भङ्गत्वमाप्नुयात्।
मूर्तिपादजन्मे हीने प्रभूणां मरणं भवेत्॥
छत्रे चैव पताके वा अलंकार विहीनके।
कीर्तिं हन्ति यशो हन्ति राजभोगो विनश्यति॥
तथाग्रकलशे हीने रथाग्रे पतिते सति।
तद्राष्ट्रः सर्वभङ्गत्वं दरिद्रत्वं प्रपद्यते।
पूर्वभागे च पतिते देशनाशो क्षयं स्मृतं।
आग्नेय्यामग्निबाधा स्यात् याम्ये मृत्युभयं नृणाम्॥

२१० दैवदेशे शत्रुबाधा त्वग्नावृष्टिस्तु वारुणे।
वातबाधा तथा वायौ कौबेर्यां निधनं स्मृतम्॥
ऐशान्यां मरणं शास्तुर्भूतबाधा विदिक्षु च।
रज्जोः छेदे ध्वजे भिन्ने तज्जने च निपातिते॥
ग्रामाभिगमनं नास्ति विजयं नाप्नुयात्क्वचित्।
तस्माच्छान्तिः प्रकर्तव्या सर्वलोकहिताय च।
रथभिन्नं तथा दृष्ट्वा पुनस्तत्रैव सन्धयेत्।
पुण्याहं वाचयेत्तत्र वेदघोषादिकैः सह॥
चक्रादिमन्त्रं जुहुयादयुतं वातदर्वकम्।
घोरमन्त्रं च तस्यार्धं शान्तिं तत्त्वं कलामयम्।
प्रायश्चित्तं च शान्तिं च मूलमन्त्रं तथैव च।
समिदाज्यचरुद्रव्यैः नृहिकैः सर्षपैः सह॥
भिन्नस्थानं च तद्बिम्बं मूललिङ्गं तथा गुरुः।
स्नापयेत्कुम्भसाहस्रैः जपपारायणैः सह॥
देशवाह्यानं भोजयेद्ब्राह्मणान्बहून्।
रथस्य पतितो दिक्षु प्रशस्ताश्चान्नराशयः॥
कूश्माण्डशाकलैः सार्धं ततो भूतबलिं हरेत्।
लाङ्गल्यादिफलैस्ताड्य घोषं तत्रोत्सवं नयेत्॥
अग्रकुम्भे रथाग्रेऽपि देहिके पतिते यदि।
बलिबेरप्रमादेन शूलास्त्रे च विहीनके॥
बीजकर्मादितीर्थान्तं पुनरुत्सवमाचरेत्।
रथाभिगमनं पूर्वं भक्तानां सर्वदेहिनाम्।
धर्मदं ज्ञानदं ज्ञेयं धनदं पश्चिमे स्मृतम्।
कामदं दक्षिणे भागे वामे मोक्षप्रदं गुह॥

21-6 ततो रत्नप्रदानं च चतुर्वर्गफलं भवेत्।
करशब्दैर्वेदवाद्यघोषैः जयशब्दैः समन्वितम्।
उत्सवान्ते फलं तस्य रहस्यं सर्वदेहिनाम्।
सत्यं सत्यं शृणु स्कन्द सत्यमेतन्न संशयः॥
शैवे विष्णौ च दुर्गायां सूर्ये चैवं फलानि च।
अश्वमेधायुतं पुण्यं महादानफलं नरः॥
रथानुगमनात्तस्य लभते च न संशयः।
योजनं रथगा जनाः शक्ता भवन्ति धर्मार्थपेक्षकाः॥
योजनार्धे शृणु स्कन्द तदर्धे योजनत्रये।
रथस्थं ये न पश्यन्ति शङ्करं शाङ्करीयुतम्॥
तेऽपि गच्छन्ति रौरवं कुम्भीपाके न संशयः।
रथारोहक्रमं वक्ष्ये बिम्बादेशिकभेदतः॥
बिम्बमारोपयेदादौ रथमध्ये न्यसेद्गुरुः।
बिम्बाग्रे पादुकं न्यस्य दक्षिणे तु देशिकः॥
सदस्ये बिम्बवामे तु ब्रह्मा देशिकदक्षिणे।
ब्रह्मणो दक्षिणे भागे संतिष्ठेद्धि आचारकाः॥
अष्टदिक्षु च मूर्तिस्थाः प्रतिष्ठेयुस्सुरोत्तमाः।
चतुर्थे रज्जुपाशाः पोषकाः स्तुतिपारकाः॥
तोरणे चैव प्रतिष्ठेत यजमानो महाविभुः।
पश्चाद्भागमासाद्य रथमूलं समाश्रयेत्॥
स्वर्णमुक्तादिरत्नानि निक्षिपेद्भक्तितस्तदा।
शालादिरज्जुमादाय जयघोषैर्नयेद्रथम्।
रथभेदो मयोक्तस्ते देवस्य नित्यपर्वसु।

इति श्रीपरमरहस्ये अघोरतन्त्रे वातुलान्तरे

रथभेदकथनं नाम षष्ठ: पटल:।

शिवाय नमः॥

— x —

22a अथातः संप्रवक्ष्यामि शिवोत्सवविधिं परम्।
सर्वपापहरं दिव्यं शृणुष्व हि विशेषतः॥
पञ्चधा प्रोच्यते सोऽपि शैवगौणादि भेदतः।
एकाहं शैवमुद्दिष्टं त्र्यहं गौणमिति क्रमात्॥
पञ्चाहं भौतिकं प्रोक्तं सप्ताहं भौवनं तथा।
नवाहं दैविकं प्रोक्तमेतासां विधिरुच्यते॥
शैवोत्सवे बलिद्वन्द्वं गौणे षड्बलिमाचरेत्।
भौतिके भौवने चैव बलिर्दश चतुर्दश॥
अष्टादश बलिः कार्यो दैविके तु हुताशन।
ध्वजारोहणपूर्वश्च भेरीताडनपूर्वकः॥
अङ्कुरार्पणपूर्वश्च त्रिविधास्ते भवन्ति हि।
ध्वजमारोपयित्वा हि भेरीं रात्रौ तु ताडयेत्॥
उत्सवस्य तु रात्रौ तु बीजानिवाप उच्यते।
ध्वजारोहणमन्त्रे तु कर्तव्यं प्रथमे निशि॥
एवं समासतः प्रोक्तं मङ्कुरार्पणपूर्वकम्।
आद्येषु त्रिभेदेषु न ध्वजारोपणक्रिया॥
भौवने दैविके चापि ध्वजारोपणमाचरेत्।
नवाहत्रितये वापि सप्ताहत्रितयेऽपि वा॥
मार्गशीर्षे तु मासे तु आर्द्रान्तं तु शिवोत्सवम्।
पुष्यमासे तु पुष्यान्तं मघान्तं माघमासके॥
फाल्गुने चोत्तरान्तं तु चैत्रे चित्रान्तमुच्यते।

वैशाखे तु विशाखान्तं मूलान्तं ज्येष्ठमासके।
अश्वान्तमाश्वयुङ्मासे कार्तिके कृत्तिकान्तिकम्॥
शैवादिचोत्सवादीनां सावत्सर्या विधीयते।
तत्पूर्वरात्रिमारभ्य कारयेदुत्सवं बुधः॥
22-b प्रतिष्ठायामुत्सवे वा सायादिदिनमारभेत्।
स्थितः
निशि सायं दिवा प्रातरिति शास्त्रस्य निश्चयः॥
ध्वजे ध्वजं न कर्तव्यं कर्तव्यं वृषभध्वजम्।
पुरारब्धान्यदेवानां मुत्सवं न च दोषभाक्॥
सम्यक्शिवोत्सवे मध्ये प्रारब्धे सर्वदोषभाक्।
शिवयागं चान्ययागमेककाले कृतं यदि॥
विफलं तदवाप्नोति वैकल्यमेव नास्तुति।
उत्सवारम्भकाले तु रथादीन्कारयेत्क्रमात्।
यन्त्रदोलान् वृषस्कन्धान् यन्त्ररथांस्तथैव च।
अश्वयन्त्रान्सिंहयन्त्रान् हस्तियन्त्रांस्तथैव च॥
कृत्वा मनोरमान्सर्वाञ्छोभावस्त्रैर्विभूषितान्।
नानाविमानसंयुक्तान्नानाध्वजसमाकुलान्॥
चित्रवस्त्रेण संछन्नान्नानागात्रेण संयुतान्।
स्वर्णदाम्ना पुष्पदाम्ना मुक्तादाम्नाप्यलंकृतान्॥
एतान्सर्वांश्च कृत्वा तु ततः कर्म समारभेत्।
✓ वृषयागमहं वक्ष्ये शृणु वत्स विशेषतः॥
ध्वजाङ्कुरो ध्वजाङ्कस्याङ्कुरात्पूर्वतरं नयेत्।
नवाहे वाथ सप्ताहे पञ्चाहे त्रिदिनेऽथ वा॥
स्वोङ्कुरार्पणं चापि शिवं संपूज्य चारभेत्।
निवसदो मासि निश्चित्य तत्पूर्वे त्रिगुणं तथा।

द्विगुणे तद्द्विने वापि ध्वजांसं हंसमारभेत्।
सप्तहस्तं ध्वजपटं कन्यसं परिकीर्तितम्।
अष्टहस्तपटं मध्यमुत्तमं नवहस्तकम्।
आयाममथैवमाख्यातं पञ्चमांशैकविस्तरम्॥
विस्तारेण समं पुच्छं पुच्छार्धं त्रिशरं भवेत्।
सितं सूक्ष्मं च सुश्लक्ष्णं पटं कार्पाससंभवम्॥
नेत्रद्वयसमायुक्तं वर्णानाद्विभूषितम्।
238 दीपचामरछत्राद्यं वृषभं लेखयेद्बुधः॥
ब्राह्मणस्य ध्वजं श्वेतं रक्तं स्यात्क्षत्रियस्य तु।
चित्रं विशां सितं शूद्रे सर्वेषां श्वेतमेव वा॥
ध्वजस्थानमहं वक्ष्ये शृणु वत्स विशेषतः।
पीठगोपुरयोर्मध्ये प्राग्भागे वृषभाग्रके॥
ध्वजस्थानमिदं प्रोक्तं ध्वजदण्डमथो शृणु।
चन्दनं क्रमुकं वापि देवदारुं च वेणुजम्॥
खदिरसारमतः सारं वा दण्डं संगृह्य देशिकः।
वक्रं जालं व्रणत्वं च कृमिकीटविवर्जितम्।
प्रासादस्य समं वापि गोपुरस्य समं तु वा।
प्रासादग्रीवमानं वा वृषभस्याक्षिसंमितम्।
द्वितालं त्रितालं गोपुरग्रीवमानकम्।
विंशद्धस्तप्रमाणं वा द्वादशं दशहस्तकम्॥
आयामं ध्वजदण्डस्य प्रोक्तं मात्राङ्गुलेन तु॥ २४।
सप्तविंशाङ्गुलं नाहं ध्वजदण्डमथोत्तमम्॥
मध्यमं तु चतुर्विंशद्द्वाविंशत्कन्यसं भवेत्।
अष्टषट्पञ्चमात्रं वा वेणुदण्डं तु नाहकम्॥

पश्चाद्दिशा द्वादशान्तानं मूलमाहुं विधीयते।
एकांशेनोन्नमग्रं स्यात्तथा दण्डाग्रमिष्यते॥
उभयोर्योगसिद्धार्धं स्कन्दत्रयमथारभेत्।
स्कन्ध[न्दा]दयं सार्धदैर्घ्यं द्वादशाङ्गुलमायतः॥
षट्त्रिंशन्मात्रपर्यन्तं स्कन्ददैर्घ्यं प्रकल्पयेत्।
सप्ताङ्गुलात्समारभ्य गायत्र्यङ्गुलावधि॥
स्कन्दविस्तारमुद्दिष्टं मूलेऽग्रे त्रिभागतः।
अर्धेन वा त्रिपादेन दण्डाकारा यथा तथा॥
२३६ मूलेऽग्रे सुषिरोपेते दण्डयष्टिरनुरूपतः।
अर्धच्छिद्रं द्रुपस्कन्धं प्रान्ते यष्टमग्रदेशि[श]के॥
दन्तप्रान्ते विधेयः स्याद्द्वलयं स्कन्ध एव वा।
दण्डं चात्र प्रमाणान्तं दण्डाग्राद्द्वयष्टियतिः॥
तदर्धं वलयादूर्ध्वं यष्ट्यग्रं परिकीर्तितम्।
कृते प्रासादपुरतो मण्टपे संस्कृते शुभे॥
ध्वजारोहणपूर्वेद्युर्निशायामधिवासयेत्।
शिवं संपूज्य विधिवत् विशालोत्सवमुत्तमम्॥
वृषस्थानमलंकृत्य वितानध्वजचामरैः।
फलपुष्पादिभिश्चैव धूपदीपैरलंकृतम्॥
उत्तराभिमुखो भूत्वा सुखासीनस्तु देशिकः।
अङ्गन्यासं करन्यासं पूर्वोक्तविधिना चरेत्॥
ततो नवपदं कृत्वा कलशांस्तत्र विन्यसेत्।
ससूत्रकूर्चवस्त्रेषु कलशेषु यथाक्रमम्॥
विघ्नेशं पूजयेदष्टौ मध्यमे कलशे तथा।
वृषमुखं गोपतिं च शृङ्गिणं नन्दिनं तथा।

ततो वृषपतिं चैव वृषभं शङ्कुकर्णकम्।
महोदरं यजेत्तत्र मध्यपूर्वादिषु क्रमात्॥
तस्याग्रे स्थण्डिलं कुर्याद्वालुकैर्हस्तमात्रकम्॥ ५०॥
शिवाग्निं जनयेद्धीमानग्निकार्योक्तमार्गतः।
तत्रावाह्य वृषं साङ्गमुपचारैश्च पूजयेत्॥
बिल्वदारुसमित्सर्पिश्चरुलाजयवान्गुरुः।
वृषमूलेन हुत्वाथ कुर्याद्रक्षां समन्ततः॥
वृषाधिवासनं प्रोक्तं ध्वजस्यारोहणं शृणु।
प्रातःकाले पटं पूज्य कलशांश्च यथाविधि॥
हुत्वा वसुशतं चाग्नौ पूर्णाहुतिमथाचरेत्।
परिचारकमाहूय प्रोक्षयेदस्त्रवारिणा॥
२५१ एकवासापरीतं च सोत्तरीयां शुमालिनम्।
पात्रे तण्डुलपूर्णे तु विन्यस्त. ग्राहयेत्पटम्।
शिबिकायां तथारोप्य कुर्याद्ग्रामप्रदक्षिणम्।
शूलमग्रे नयेत्तत्र सर्वालंकारसंयुतम्॥
आचार्यश्चाग्रतो गच्छेत् यजमानस्तु पृष्ठतः।
एवं प्रदक्षिणीकृत्य ध्वजस्थानमथानयेत्॥
ध्वजं संप्रोक्ष्य मूलेन स्थण्डिलोपरि संस्थितम्।
पूजयित्वा विधानेन वृषगायत्रिमन्त्रतः॥
ग्राह्याधिवास्य कलशं वृषविद्येश्वरात्मकम्।
धरान्ध्वजस्य तन्मध्ये वृषबीजं विनिक्षिपेत्॥
वृषगायत्रिमन्त्रेण प्रोक्षयेत्कलशोदकैः।
पूजयित्वा यथान्यायं नैवेद्यान्तं विचक्षणः।
ततो ध्वजं समुद्धृत्य मन्त्ररज्ज्वा तु देशिकः।

वृषमारोपयेत्पश्चात् सर्ववाद्यसमन्वितम् ॥ ६० ॥
ब्राह्मणेभ्यस्तथा दद्याद्दक्षिणांश्च विशेषतः ।
पटं बद्ध्वा विधानेन रज्जुमूलान्तमेव च ॥
प्रदक्षिणक्रमेणैव वेष्टयेद्रज्जुवल्कलैः ।
वृषध्वजान्तमारोहात् त्रिकालं पूजयेद्गुरुः ॥
दिक्ष्वष्टसु बलिं दद्यात् ध्वजमूले यथाविधि ।
ध्वजस्य स्थापनं प्रोक्तं सर्वशान्तिकरं परम् ॥

*

अतः परं प्रवक्ष्यामि भेरीताडनमुत्तमम् ।
स्थण्डिलद्वितयं कुर्यात् ध्वजस्य पुरतो गुरुः ॥
त्रिशूलं तत्र विन्यस्य भेरीं वस्त्रेण वेष्टिताम् ।
24b तदग्रे स्थण्डिले स्थाप्य त्रिशूलं पूजयेत्क्रमात् ॥
रुद्रञ्च मध्यमे पत्रे ब्रह्माणं दक्षिणे तथा ।
विष्णुञ्च वामपत्रे तु दण्डमध्ये प्रभञ्जनम् ।
रौद्रीं ज्येष्ठां तथा वामां मूलभागे प्रपूजयेत् ।
भेरीमध्ये यजेद्रुद्रं ब्रह्माणं दक्षिणे मुखे ॥
~~(ब्रह्माणं दक्षिणे मुखे)~~ विष्णुञ्च वामवक्त्रे तु वलये वामदक्षिणे ।
चन्द्रादित्यौ यजेन्मन्त्री भानून् कीलेषु सप्तसु ।
नवैकादशकीलेषु ग्रहान्रुद्रान्यथाक्रमम् ।
वासुकिं चर्मतन्त्रौ तु प्रहारे चार्चयेद्गुहम् ।
नैवेद्यान्तं समभ्यर्च्य प्रथमं देशिकः स्वयम् ।
बिन्दुरूपमपि ध्यायन् त्रिधा चास्त्रेण ताडयेत् ॥
नादतत्त्वं परं ध्यात्वा तत्क्षणाद्धतकल्मषाः ।
भवन्ति प्राणिनः सर्वे बाधादीन्विनिपाप च ॥

पश्चाद्वादकमाहूय वादयेत्तु विशेषतः।
सर्वान्देवान्समाहूय नामभेदेन देशिकः॥
देवानां तृप्तिसिद्ध्यर्थं कुर्याद्भूतबलिं ततः [दा]
भेरीसंताडनं प्रोक्तं हुताशनसमासतः॥
अतः परं प्रवक्ष्यामि मङ्गलाङ्कुरमुत्तमम्।
उत्सवे स्नपने चैव स्थापने प्रोक्षणे तथा॥
अन्ये च मङ्गले कार्ये मङ्गलान्तरमुच्यते।
ध्वजाङ्कुरं तु प्रथमं द्वितीयं चोत्सवाङ्कुरम्॥
तीर्थाङ्कुरं तृतीयं स्यादुत्सवस्य विधीयते।
मृत्तिका माहरेत्पूर्वं बीजनिर्वापणाय च॥
25a आचार्यः प्रस्तो गच्छेत्सर्वालंकारभूषितः।
नाना ध्वजसमायुक्तं सर्ववाद्यसमन्वितम्॥
नानाछत्रसमायुक्त बिम्बं च तदनु व्रजेत्।
प्राङ्मुखोदङ्मुखो वापि पश्चिमे वा विशेषतः॥
गत्वा पुष्पवनं वापि नदीतीरमथापि वा।
तटाकं वाथ वापीं वा उद्धृत्य मृदमाहरेत्॥
यथाविधि समानीय बीजनिर्वापमाचरेत्॥ ८०॥
शरावा पालिकाश्चैव घटिकाः त्रिविधास्तथा।
सौवर्णा राजता वापि ताम्रजा मृण्मयास्तु वा॥
ईशविष्णुविरिञ्चाश्च पालिकाद्यधिदेवताः।
नीवारमुद्गतिलमाषकशिम्बकङ्गु-
कुलत्थनिष्पावकसर्षपाणि।
संशाल्य धीमान्पयसा हृदा च
संवाप्य विद्वान् शिवबीजमन्त्रैः॥

तिलाश्चापि तथा मुद्गाः सर्षपाः शालयस्तथा।
प्रियङ्गु शिम्बा निष्पाव माषश्यामकुलत्थकाः॥
बीजवापे समुद्दिष्टाः शैव द्रव्याश्च जातयः।
द्रव्याण्येतानि पात्रेषु कृत्वा प्रक्षालयेत्पृथक्॥
निवेद्यान्नं समभ्यर्च्य बलिकर्म समाचरेत्।
शुक्लाः पीताश्चार्द्रमुखाः* अङ्कुराः स्युः शुभप्रदाः,
श्रेयोविघ्नकरा धूम्रा वक्राश्चापि तथैव च।
एवं ज्ञात्वा फलं सम्यगशुभे शान्तिमाचरेत्॥ ६५॥

× × ×

256 अतः परं प्रवक्ष्यामि यागमण्डपलक्षणम्।
गेहस्य पुरतः कुर्याद्याम्ये वा वारुणे तथा॥
सौम्यायामीशदिग्भागे कुर्यादाग्नेयगोचरे।
त्रिंशद्धस्तप्रमाणं वा एकविंशतिहस्तकम्॥
सप्तान्तरदशं हस्तं प्रमाणं नवहस्तकम्।
सप्तहस्तप्रमाणं वा कारयेन्मण्टपं सुधीः॥
चतुरश्रसमायुक्तं निम्नोन्नतविवर्जितम्।
चतुर्द्वारसमायुक्तं तोरणैरुपशोभितम्॥
नानावितानसंयुक्तं पताकाभिरलंकृतम्।
मध्ये वेदिं प्रकुर्वीत श्लक्ष्णां दृष्टिमनोरमम्॥
ष्टि?
कुण्डान्यलन्द देशे तु दिग्विदिक्षु यथाक्रमम्।
चतुरश्राणि वृत्तानि कुर्यात्प्रागुक्तवर्त्मना॥
आचार्यकुण्डं मध्ये तु सलिलेशसमीरयोः।
कृत्वैवं विधिवत्सर्वं संस्कारं मण्टपस्य च॥
कुर्वीत मण्टपे रम्ये ह्यधिवासनमारभेत्॥

अतः परं प्रवक्ष्यामि अस्त्रयागविधिक्रमम्।
आचार्यः पुत्रकश्चैव समयी साधकस्तु वा।
स्नानं कृत्वा विशेषेण पूर्वोक्तविधिना सह।
देवाग्रे स्थण्डिलं कृत्वा अस्त्रमन्त्रेण प्रोक्षयेत्॥
सुस्निग्धान्सुदृढान्कुम्भान् हैमकान्राजतानपि।
26a ताम्रजान्मृण्मयांश्चापि निष्कळङ्कान्मनोहरान्॥
सकूर्चान्सापिधानांश्च सवस्त्रान्सफलान्वितान्।
पूरयेद्गन्धतोयेन स्थण्डिलोपरि विन्यसेत्॥
वर्धनीमुत्तरे स्थाप्य परितोऽष्टौ घटांस्ततः।
शिवकुम्भे शिवं कल्प्य वर्धन्यां तु मनोन्मनीम्॥
अनन्तप्रमुखानष्टौ घटेषु परितो न्यसेत्।
शिष्याणां परिचाराणां शिरसा वाहयेद्घटान्।
त्रिशूलाद्यायुधान्सर्वान् कृत्वा तु पुरतो व्रजेत्
शङ्खदुन्दुभिनिर्घोषैः कहळाद्यैः समाकुलम्॥
धामप्रदक्षिणं कृत्वा प्रविशेद्यागमण्टपम्॥ १००।
वेदिकामध्यतश्चैव कुर्वीत स्थण्डिलं सुधीः।
अष्टद्रोणमितव्रीहींस्तदर्धमिततण्डुलैः॥
द्रोणद्वय तिलैर्लाजैरलंकृत्य यथाक्रमम्।
शिवादिकलशांस्तत्र विन्यसेद्देशिकोत्तमः॥
त्रिनेत्रं च चतुर्बाहुं सर्वाभरणभूषितम्।
दिव्याम्बरधरं देवं जटामकुटमण्डितम्॥
कृपाणपरशुसंयुक्तं वरदाभयहस्तकम्।
एवं ध्यात्वा तु मनसा कुम्भमध्ये शिवं यजेत्।
वर्धनीं हेमसंयुक्तां कल्पयेदुत्तरे विभो॥

द्विभुजां चारुवदनां सुस्तनीं च सुयौवनाम्।
दुकूलवसनां शान्तां किञ्चित्प्रहसिताननाम्॥
सर्वाभरणसंयुक्तां वर्धनीमध्यमे न्यसेत्।
26b अभितः कलशानष्टौ केसरेषु विनिक्षिपेत्॥
वेदिकोपरि मध्ये तु शूलं संस्थाप्य पूजयेत्।
अस्त्राणि वज्रकादीनि पद्मकाष्ठे विनिक्षिपेत्॥
गन्धचन्दनतोयेन लोकपालाधिदैवतान्।
पूर्वस्यां स्थापयेद्वज्रमाग्नेय्यां शक्तिमेव च॥
दण्डं तु दक्षिणे स्थाप्य खड्गं निर्ऋतिगोचरे।
पाशं तु पश्चिमे स्थाप्य वायव्यां त्वङ्कुशं न्यसेत्॥
गदास्त्रं सौम्यदिग्भागे शूलमीशानगोचरे।
पद्ममीशानदिग्भागे चक्रं निर्ऋतिगोचरे।
पूजयित्वा यथान्यायं गन्धपुष्पादिभिस्तथा।
दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम्॥
श्रीवत्सं स्वस्तिकं शङ्खं दीपं चैवाष्टमङ्गलम्।
अष्टमङ्गलरूपाणि वेदिकान्ते तु पूजयेत्॥
एवं संपूज्य विधिना गच्छेत्कुण्डान्तिकं ततः।
आचार्यकुण्डे प्रथमं शिवाग्निं जनयेद्गुरुः॥
तदग्निं सर्वकुण्डेषु निधायाग्निमुखं चरेत्।
अग्निकार्योक्तमार्गेण पञ्चब्रह्मतदङ्गकैः॥
द्रव्याणि समिदादीनि हुत्वा होमं समापयेत्।
होमान्ते च बलिं कुर्यात् शृणु वक्ष्ये समासतः॥
त्रिशूलं च समादाय बलिकर्म समाचरेत्॥ ११५॥
नानावाद्यरवोपेतं छत्रचामरसंयुतम्।

पताकाध्वजसंयुक्तं नृत्तगीतसमन्वितम्।
27a बलिं कृत्वा यथान्यायं प्रविशेद्यागमण्टपम्॥
एवं सायं दिवा कुर्यात् बल्यन्ते चोत्सवं तथा।
बलिक्रममिति प्रोक्तं ततो यानक्रमं शृणु॥

× × ×

प्रथमं शिबिकायानं मयूरं तु द्वितीयकम्।
दोलायन्त्रं तृतीयं स्याद्वाजियन्त्रं चतुर्थकम्॥
पञ्चमं वृषयन्त्रं स्यात्सिंहयन्त्रं तु षष्ठकम्।
सप्तमं गजयन्त्रं स्यात् यानक्रम इतीरितः॥
एवं प्रतिदिनं कुर्यादेकैकं यानमुत्तमम्।
महारथोत्सवं कुर्यात्तदन्यदिवसे तथा॥
तद्विधिं च प्रवक्ष्यामि सर्वपापहरं शुभम्।
सुलक्षणसमोपेतं कारयित्वा महारथम्॥
निपुणैः शिल्पिभिस्तज्ज्ञैरुत्सवार्थं हुताशन।
काष्ठं संशोध्य विविधैः वस्त्रादिपरिभूषणैः॥
रथस्थितं शिल्पिमुख्यान् ज्ञात्वा देशिकसत्तमः।
विशेषं पूजयेद्यावौ मधुरैर्मोदकादिभिः॥
ततो नान्दीमुखं कृत्वा पुण्याहं वाचयेद्गुरुः।
स्यन्दनस्याथ संस्कारं कुर्यात्प्रागुक्तमार्गतः॥
वास्तुं संपूज्य विधिवत् कलशैः स्नापयेद्रथम्॥ १२५॥
सहस्रैर्वा तदर्धैर्वा तदर्धार्धमथापि वा।
सकूर्चैः स्थापितं सम्यग्वस्त्रादिभिरलंकृतैः।
अघोरास्त्रं जपेन्मन्त्री स्यन्दनं स्पृश्य पाणिना।
प्रायश्चित्ताख्यहोमं च कुर्वीत रथदक्षिणे॥

२७८ दिशाहोमं ततः कुर्यात्प्राच्यादिषु यथाक्रमम्।
तत्तद्दिक्पालवर्णांश बद्ध्वा तद्दिक्षु पूजयेत्॥
बलिं दद्यात्ततो ध्यायेत् कल्पमानं रथं तथाऽऽद्य
तत्र देवान्समावाह्य रथस्याङ्गेषु देशिकः॥
अक्षेषु मायां चन्द्रार्कौ चक्रेषु परिपूजयेत्।
कीलकेषु मरुतश्चैव रन्ध्रेष्वाकाशमेव च॥
महादण्डद्वये शक्तिमाधाराख्यं यथाविधि।
पट्टिकासु तथा रुद्रान् गात्रतद्बन्धकेषु च॥
धर्मादीनर्चयेन्मन्त्री वायुं गात्रान्तमन्तरे।
अरेषु द्वादशादित्यान् शलाकास्वचलानपि॥
रथप्रासादशिखरे स्तूपिकायां सदाशिवम्।
तत्पार्श्वेषु चतुर्दिक्षु पूजयेच्च यथाक्रमम्॥
षण्मुखं दक्षिणामूर्तिं हरिं च चतुराननम्।
खड्गपाणिं परशुपाणिं द्वारेषु परिपूजयेत्॥
रथपार्श्वेषु दिक्पालान् पूजयेच्च विशेषतः।
ध्वजेषु पूजयेदष्टविद्येशान्परितः क्रमात्॥ १२५॥
जयं च विजयं चैव तद्गौ पार्श्वयोस्तथा।
दिक्ष्वष्टसु वसूनष्टौ स्तम्भेषु परिपूजयेत्॥
चतुर्दिक्षु चतुर्वेदान् स्यन्दनस्य यथाक्रमम्।
ब्रह्माणं सारथिस्थाने हयेषु मरुतं पुनः॥
मुखे वरुणमभ्यर्च्य जठरेन्दुपदेनिलम्।
देवानेतान्प्रयत्नेन मन्त्री स्नापयेत्कलशोदकैः॥
गन्धपुष्पाक्षतैर्धूपैः दीपैश्च परितोषयेत्।
गुडान्नैः कृसरान्नैश्च फलैर्नानाविधैरपि॥

28a भक्ष्यैर्भोज्यैश्च विविधैरुपहारैः प्रतोषयेत्।
भूतकू[क्रू?]रेण हविषा बलिं दद्याद्विशेषतः॥
कृत्वैवं विधिवत्सर्वं रात्रौ तमधिवासयेत्।
अथ प्रातर्विशुद्धात्मा होमं कृत्वा बलिं हरेत्॥
महेश्वरं समभ्यर्च्य रथस्यारोहणं प्रति।
प्रार्थयेत्परया भक्त्या पार्वतीसहितं प्रभुम्॥
देवदेव जगन्नाथ भक्तानामभयप्रद।
रथस्यारोहणं कर्तुं आगच्छ परमेश्वर॥
इति संप्रार्थ्य गौरीशं सर्वाभरणभूषितम्।
दिव्याम्बरधरं दिव्यपुष्पमालाभिरञ्जितम्॥
शिबिकायां समारोप्य गिरिजासहितं शिवम्।
यानान्तरेऽपि वा रम्ये चित्रवस्त्रैरलंकृते॥
सर्वतोद्यसमायुक्तं मानयेत्स्यन्दनादिकम्।
गच्छन्तमनुगच्छन्ति सेन्द्रा देवा महाबलाः।
तत्प्रियाः शक्तयश्चैव पार्वतीमनुयान्ति वै।
त्रिशः प्रदक्षिणीकृत्य रथं वाद्यरवैः सह॥ १४५॥
झल्लिकाभिः पताकाभिः पुष्पमालैर्विभूषितम्।
इक्षुभिः कदलीभिश्च दर्पणैः पूर्णकुम्भकैः॥
तोरणैश्च वितानैश्च छत्रैः सम्यगलंकृतम्।
चन्दनागरुकर्पूररसैः सिक्तं समन्ततः॥
घण्टाभिः किङ्किणीभिश्च ध्वजैश्च परिभूषितम्।
फलैर्नानाविधैश्चैव मुक्तामालाभिरेव च॥
धूपैर्गुग्गुलसंभूतैः धूपितं च समन्ततः।
28b बीजाङ्कुरैः स्वर्णदामैः चित्रवस्त्रैश्च चामरैः।

हिमाम्बुकणिकाभिश्च समन्ताच्चकरञ्जितम्।
आरोपयेद्रथं पश्चात्स्वस्ति सूक्त मनुस्मरन्। १५०॥
पार्वतीसहितं देवं त्रिशूल च विभूषितम्।
अन्नं नानाविधं तत्र रथाय च निवेदयेत्।
ततो विप्रान्समभ्यर्च्य दक्षिणाभिश्च तोषयेत्।
आचार्यं पूजयेद्भक्त्या गोभूवा सोहिरण्यकैः॥
ताडुंलीभिः फलैस्ताडच स्वर्णादिविकिरेत्तथा।
वासुक्यादि महानागान् रज्जुत्वा वाहयेद्गुरुः॥
चतुर्वेदान्च दन्तज्जुं ग्राहयेद्देशिकस्तदा।
राज्ञां शस्तं रज्जुमूले रज्जुमध्येपि मन्त्रिणाम्।
तयोर्मध्ये भूसुराणां तदग्रे सर्वदेहिनाम्।
राज्ञां राज्यप्रदं मूलं तन्मध्यं धनदं नृणाम्॥
विद्याप्रदं तयोर्मध्ये तदग्रं तु सुखप्रदम्।
नृत्तगीतसमायुक्तं यात्रामारम्भयेत्ततः।
रथस्य गमने वाद्यान् वादयेत्तु विशेषतः।
पटहान्मद्दलान्भेरीं दुन्दुभीनपि काहलान्॥
वीणा वेणूंस्तथा कुर्याच्छङ्खानपि महास्वनान्।
अग्रे पृष्ठे च मध्ये च तत्र तत्र प्रघोषयेत्॥
यत्र ढोलादिकांश्चापि क्रमेण पुरतो नयेत्।
ग्रामादिवीथयः कुर्यात् निम्नोन्नतविवर्जिताः।
वालुकास्तरणं कुर्याद्वीथिकां चोपवीथिकाम्।
अलंकुर्यात्तथा वीथीं कदलीक्रमुकादिभिः। १६०॥
21a ये देवमनुगच्छन्ति गच्छन्तं स्यन्दनेन हि।
पदे पदेश्वमेधस्य फलं तेषां न संशयः॥

ये पश्यन्ति रथारूढमुमया सहितं शिवम्।
ते सर्वे पापनिर्मुक्ताः शिवसायुज्यमाप्नुयुः॥
एवं रथोत्सवं वक्ष्ये यः कारयति भक्तितः।
इह लोके बहून्भोगान्भुक्त्वा च मनसेप्सितान्॥
देहान्ते मत्प्रसादेन शिवलोके महीयते।
रथोत्सवं प्रपश्यन्ति बाला वापि स्त्रियोपि वा॥
तेपि पापैः प्रमुच्यन्ते निर्मोका इव पन्नगाः।
ग्रामं प्रदक्षिणीकृत्य नगरं वापि भूषितम्॥
निवर्तयेद्रथं पश्चात्कृत्वा वीथीमथापि वा। २६५॥

इति श्रीदीप्तागमे शैवभागे रथोत्सवविधिः।

शिवाय नमः॥

*

शुभमस्तु शिवोत्सवमथो वक्ष्ये समासाच्छृणु षण्मुख।
सर्वदुःखहरं सौख्यं सदा विजयवर्धनम्॥ १॥
सर्वरोगविनाशार्थं सर्वभूतप्रियावहम्।
ध्वजाङ्कुरार्पणं पूर्वं द्वितीयं चोत्सवाङ्कुरम्॥
तीर्थाङ्कुरं तृतीयं तु त्रिविधं मङ्गलाङ्कुरम्।
प्रथमं वृषयागं तु द्वितीयं केतुरोहणम्॥
भेरीघोषं तृतीयं स्याद्बलिदानं चतुर्थकम्।
पञ्चमं यागशालां च तीर्थाङ्कुरमतः परम्॥
29-b सप्तमं कौतुकारम्भमष्टमं यागकर्मणि।
नवमं चोत्सवं प्रोक्तं दशमं पट्टबेरकम्॥
एकादशं रथारोहं द्वादशं मृगयान्तकम्।
चूर्णोत्सवं ततः कुर्यात्तीर्थारम्भं चतुर्दश॥

पूर्णाहुतिं ततः कुर्यात् चण्डयागं तु षोडश।
ध्वजावरोहणं पश्चाच्छुद्धस्नानमतः परम्॥
गौरीयागं तदन्ते तु भस्मोत्सवमतः परम्।
विंशद्भेदमिति ख्यातं ज्ञात्वा कर्म समाचरेत्।
नवाहं वाथ सप्ताहं पञ्चाहं त्रियहं तु वा।
एकाहं वाथ वैवत्स पञ्चधा भेदमुत्तमम्॥
शाकल्यं पावनं शान्तं माङ्गल्यं च चतुर्विधम्।
ध्वजारोहादितीर्थान्तं शाकल्यं चेति कीर्तितम्॥
वृषध्वजं विना वत्स शेषं पूर्ववदाचरेत्।
पावनं तत्समाख्यातं शान्तं स्याच्छृणु षण्मुख।
केचिद्य वृद्ध्या भक्त्या केचित्काले शिवोत्सवम्।
शान्तमेवं समाख्यातं माङ्गल्यं शृणु षण्मुख॥
पूर्वाह्ने वापराह्ने वा केवलं चोत्सवं कुरु।
एवं माङ्गल्यमित्युक्तं चतुर्विधमितीरितम्।
सौरं च सावनं चैव चान्द्रं नाक्षत्रमेव च।
30a एते चतुर्विधे मासे तीर्थोद्दिश्य शिवोत्सवम्॥
मुक्तिदं चान्द्रमासे तु नाक्षत्रं पापनाशनम्।
प्रजावृद्धिकरं सौरं सावनं शान्तिदं स्मृतम्॥
अर्कचन्द्रसमायोगं चान्द्रमित्यभिधीयते।
पर्वे वाथ चतुर्दश्यां षष्ठ्यां छम्यान्तमेव वा।
पर्वान्ते सर्वमासेषु तीर्थान्तं कृष्णपक्षके।
वैशाखे तु चतुर्दश्यां माघे ज्येष्ठान्तमेव वा॥
ज्येष्ठाद्यन्यन्तकं वापि मास्येद्युत्सवं ततः।
षष्ठ्योक्रमेमोश्चैव कृष्णपक्षे विशेषतः॥

तिथिप्रधानं तीर्थान्तं चान्द्रमित्यभिधीयते।
मासेषु चोत्सवं वत्स पूर्णचन्द्रेण संयुतम्॥
पुष्यान्तं पुष्यमासे तु माघमासे मघान्तकम्।
फाल्गुने चोत्तरान्तं स्या चैत्रे चित्रान्तमेव च॥
वैशाखे चैव शूर्पान्तं ज्येष्ठे मूलान्तमुच्यते।
आषाढे चोत्तराषाढं श्रावणे श्रवणान्तकम्॥
पूर्वाषाढं तथा मासे पूर्वाषाढान्तमुच्यते।
अश्वान्ताश्वयुजे मासि चोत्सवं कारयेद्बुधः॥
कार्त्तिके कृत्तिकान्तं हि द्विवान्तं मार्गशीर्षके।
तद्दिनात्पूर्वमुक्तं तु ओष्ठसामुद्रतीर्थकम्॥
यत्तद्दिनायदि पर्वत्र द्दिनात्पार्श्वपक्षयोः।
रात्रियुक्तं तिथिर्यावत्सा तिथिश्चेति निश्चयः॥
दानं प्रदक्षिणं होमं तीर्थं सामुद्रकं तथा।
तत्काले तु विशेषेण कारयेत्सर्वसंपदम्॥
तीर्थं नदीतटाके तु विना पर्व समाचरेत्।
30 मासनक्षत्रमेवोक्तमुत्सवं तत्प्रशस्यते॥
भास्करस्य गतिर्यावत् राशौ राशौ तु षण्मुख।
संक्रान्तिरिति विख्याता सौरस्य मासं तदेव हि॥
पूर्वाह्ने वाथ मध्याह्ने चापराह्णे प्रदोषके।
अर्धरात्रार्धरात्रान्ते संक्रमं संभवेद्यदि॥
तत्काले तीर्थमारभ्य तत्तीर्थं सर्वसंपदम्।
सौरमासोत्सवं प्रोक्तं सर्वारिष्टविनाशनम्॥
राजाभिषेके दीक्षान्ते जन्मान्ते वाल्यान्तरे।
युद्धारम्भदिनान्ते वा यजमानदिनान्तके॥

देवतास्थापनान्ते वा ग्रामारम्भान्तमेव वा।
तेषु जन्मत्रयं वापि नित्यमृक्षं संप्रशस्यते॥
स्नपनं चोत्सवं ज्ञेयं सा प्रतिष्ठोत्सवां गुह।
आर्द्रान्तं वैष्णवान्तं वा रोहिण्यन्तमथापि वा॥
सर्वमासेषु कर्तव्यं तीर्थोत्सवमिति स्मृतम्।
ग्रामऋक्षं तथा वत्स मासे चैकैकमेव तु॥
मासे मासे तथा न्यूनमधिकं सममेव च।
ज्ञात्वा परिहरेद्वत्स तीर्थर्क्षं निश्चितं गुह॥
नित्यर्क्षौ द्वौ तु संप्राप्ते चैकमासे परं वरम्।
नेष्टं तु प्रथमे ऋक्षे त्वन्यर्क्षे तीर्थमाचरेत्॥
कृते चेत्तीर्थऋक्षे तु तत्कर्ता वास्तु नश्यति।
तस्मात्सर्वप्रयत्नेन तीर्थमन्यर्क्षके विदुः॥
अंशके सप्तमेऽतीते राशौ राशौ तु भास्करः।
31a मासशून्यफलं कुर्याज्ज्ञात्वैवं चोत्सवं कुरु॥ ३५?॥
ध्वजोत्तानादितीर्थान्तमेकमासे परं वरम्।
ग्रामारम्भादि मध्यं स्यादन्ते तीर्थविधं भवेत्॥
पूर्वाह्णे चोत्तमं तीर्थं मध्याह्ने मध्यमं भवेत्।
अपराह्णे च रात्रान्ते तीर्थं तच्चाधमं भवेत्॥
तीर्थऋक्षावसाने तु तत्तीर्थं चाधमं गुह।
द्विवारे खण्डऋक्षं चेत्त्वन्यर्क्षे तीर्थमाचरेत्॥
एकाहमुत्सवं शैवं त्रिदिनं गौणमुच्यते।
पञ्चाहं भौतिकं प्रोक्तं सप्ताहं भौवनं स्मृतम्॥
नवाहं दैविकं प्रोक्तं श्रीकण्ठं द्वादशाहकम्।
एकविंशद्दिनं रौद्रमतः सप्तविधं भवेत्।

एकाहं ग्रामरक्षार्थं त्र्यहं लोकपावनम् ।
पञ्चाहं भूतरक्षार्थं सप्ताहं जन्तुपालनम् ।
नवाहं देवताप्रीतिं द्वादशाहं मरुत्प्रियम् ।
एकविंशाहमेवोक्तं लोकपालप्रियावहम् ॥
प्रतिसंवत्सरं मासं तिथिं निश्चित्य ऋक्षयुक् ।
पुरा ल(र?)ब्धोत्सवे हीने पर्यायान्ते मासि वा कृते ॥
उत्तमं मध्यमं चैव कन्यसं त्रिविधं भवेत् ।
उत्सवेषु नवेष्वेव प्रोक्तेषु क्रमशो विदुः ॥ ९५ ॥
यदि स्यात्तीर्थनक्षत्रं व्यत्यासेन प्रकीर्तिताः ।
यागारम्भस्य पूर्वे तु व्यत्यासे ज्ञायते यदि ॥
31-b अङ्कुरार्पणपूर्वं तु कारयेदुत्सवं ततः ।
प्रायश्चित्तं तु कर्तव्यं शान्तिहोमं समाचरेत् ॥
ध्वजदण्डोपि तावेशो ध्वजे वारोपणं ततः ।
अपराह्णे ध्वजं पश्चात् वृषयागं समाचरेत् ।
अतीते तीर्थनक्षत्रं ज्ञात्वैवं हि षडानन ।
समाप्य तीर्थमात्रान्यमुत्सवं पुनरारभेत् ॥
एकोत्सवविधानेन आर्द्रान्तं तीर्थमाचरेत् ।
शिवोत्सवारम्भकाले नेष्टमन्योत्सवं गुह ॥
अन्यदेवोत्सवे काले महादेवोत्सवं कृतम् ।
पुरारब्धान्यदेवानामुत्सवं न च दोषभाक् ॥
तस्माच्छिवोत्सवे मध्ये आरब्धात्सर्वदोषभाक् ।
शिवयागं चान्ययागमेककालकृतं यदि ॥
निष्फलं तमवाप्नोति वैकल्मिन्नेव वास्तुनि ।
ध्वजे ध्वजं न कर्तव्यं कर्तव्यं वृषभध्वजम् ॥

देवकल्याणकाले तु नृकल्याणं न कारयेत्।
कारयेद्यदि मोहात्तु व्याधिशोकभयं भवेत्।
नगरे पत्तने वापि राजधान्यां तथैव च।
सर्वदेवोत्सवं कुर्याद् दोषमत्र न विद्यते॥
त्रिविधं चोत्सवारम्भं कारयेत्तु विचक्षण।
अङ्कुरार्पणपूर्वं च भेरीताडनपूर्वकम्॥
ध्वजारोहणपूर्वं च त्रिविधं तदुदाहृतम्।
अङ्कुरार्पणपूर्वं च सर्वसंपत्समृद्धिदम्॥
329 भेरीताडनपूर्वं स्याद् दे[दे]वानां तु प्रियावहम्।
ध्वजारोहणपूर्वं चेत् सर्वप्राणिसुखावहम्॥
अङ्कुरं प्रथमारम्भे भेरीघोषणमन्तरम्।
ध्वजमारोपयेत्पश्चादङ्कुरार्पणपूर्वकम्॥
दिनद्वयं समारभ्य चोत्सवस्य दिनादितः।
भेरीं रात्रौ तु संताड्य ध्वजं पश्चात्तु रोपयेत्।
अङ्कुरानर्पयेत्पश्चाद् भेरीताडनपूर्वकम्।
मध्याह्ने ध्वजमारोप्य तद्रात्रौ भेरिघोषणम्॥
उत्सवारम्भरात्रौ तु तीर्थाङ्कुरमथाचरेत्।
ध्वजारोपणपूर्वं हि प्रोक्तमेवं षडानन॥ ६२॥
तीर्थान्तं कारयेद्यस्तु देशिकः प्रीतमानसः।
रात्रौ चैवोत्सवारम्भं प्रातःकाले समाचरेत्॥
पुष्कलं विजयं सौख्यमुत्सवं त्रिविधं भवेत्।
पुष्कलं मुक्तिदं प्रोक्तं विजयं वैजयं भवेत्॥
सौख्यं तत्सुखदं ज्ञेयं एवमेव विधीयते।
पुष्कलं चोक्तमासेन पूर्वरात्राधिवासयेत्॥

मेरीम?

32 b पक्षश्चैव ऋतुश्चैव दिशश्चैव मनुस्तथा।
स्मृतिश्चैव विशेषेण बलिदानं विधीयते॥
निर्दिष्ट दिवसा रात्रीमारभेदुत्सवं ततः।
व्योम वेदश्च निर्योश सूर्यश्चैव तु षोडश॥
बलिसंख्येति विज्ञेयं बलिमुख्यं प्रकीर्तितम्।
१द निर्दिष्ट दिवसात्पूर्वमारभ्यात्पूर्वरात्रिके॥
तुर्यभागश्च सूर्यश्च षोडशं चैव विंशति।
तिथिप्रधानमेवं हि बलिसंख्याः प्रकीर्तिताः।
वृषयाग समारभ्य पूर्वरात्रौ विशेषत।
सर्वाधिवासनं चापि कारयेद्विधिना यतः॥ श्रीः॥
[ध्वजारोहणविधि] ×
प्रथमं वृषमालिख्य द्वितीयं नेत्रमोचनम्।
जलाशयं तृतीयं स्यात्प्राशनं तु चतुर्थकम्।
पञ्चमं शयनारम्भं षष्ठं कुम्भाधिवासनम्।
सप्तमं तु कलान्यासमष्टमं होमकर्मणि॥
नवमे प्रतिसरं कुर्याद्ध्वजसंस्थापनं दश।
धृतं शिरोपणं पश्चाद्ग्रामाद्युत्सवः परम्।
पूर्णाहुतिं ततो दद्यात् पुण्याहं कारयेद्बुधः।
ध्वजमारोपयेत्पश्चात्पूजयेत्तदनन्तरे॥
रात्रं ध्वजतन्त्रमं प्रोक्तं कारयेत् शारिकवा।
वृषभो वा त्रिशूलो वा स्थापितं कारयेत्ततः।
33a अष्टद्रोणैस्तदर्धैर्वा तदर्धैः शालिना कृत॥
धान्यार्धं तण्डुलोपेतं तण्डुलार्धं तिलानपि।
दर्भपुष्पोपशोभाढ्यैः पूजयेत् गन्धपुष्पकैः॥

नवहस्तध्वजपटं सप्तषड्ढस्तमेव वा।
प्रासादतारमानं वा गर्भाद्यस्य समं तु वा॥
द्वारोच्चं वाथ कर्तव्यं मुक्तमादिक्रमेण तु।
उपानादुत्तरान्तं वा पादाग्रस्य समं तु वा॥
एवमुत्सेधमानं तु विस्तारं शृणु षण्मुख।
आयतं भूतभागैकं भागविस्तार उच्यते॥ ८०॥
लम्बनं तत्समं प्रोक्तं द्वित्रिपुच्छमथापि वा।
पार्श्वे तु कदलीकारं पुच्छार्धं शिखराकृति॥
कण्ठाग्रेणैव पुच्छाग्रो किङ्किणीरवशोभितम्।
श्वेतं रक्तं तथा पीतं कृष्णं चैव चतुर्विधम्॥
ब्राह्मणादिक्रमेणैव ध्वजानां वर्ण उच्यते।
मुखं पादं च पृष्ठं च ज्ञात्वा मध्ये वृषं लिखेत्॥
अधोभागं वृषं ज्ञेयं मूर्ध्वभागं तु पृष्ठतः।
अधोभागं वृषं कुर्याद्दैशिकैः शिल्पिभिः सह॥
दैवज्ञेन समायुक्तं मुहूर्तं तन्निरीक्षयेत्।
राजग्रामानुकूलत्वे लेखयेच्छिवसन्निधौ॥
वर्णानि संगृहीत्वा तु पृथक्पात्रे विचक्षणः।
33-6 शङ्खं वै चाञ्जनं वापि गैरिकाजातलिङ्गकम्॥
श्यामं च पञ्चधा ज्ञेया जलेनालोड्य यत्नतः।
वर्णसंस्कारवत्कृत्वा शिल्पिशास्त्रे विचक्षणः॥
हेमशूलिकया [तू?] युक्तं लेखयेच्छिल्पिवित्तमैः।
वृषध्वजं न्यसेन्मध्ये परितस्त्वन्यकेतुना॥
पूर्वाग्रे चोत्तराग्रे च कृत्वा सर्वं समालिखेत्।
लिङ्गमानं च पीठं च गर्भमानं तथैव च।

अन्याधिष्ठानमानं च प्रस्तरग्रीवमानकः।
नासिकास्तविमानं च यजमानवशेन वा ॥ ९० ॥
मानधर्मविधिं ज्ञेय मिष्टमानेन कारयेत्।
अल्पं वा महतीं वापि ज्ञात्वा लिङ्गं बशाद्बुधः [स्वः] ॥
अल्पलिङ्गस्य चोत्सेधं द्विगुणस्त्रिगुणं तथा।
वृद्धिरं वृषभोत्तुङ्गं मधमं मध्यमोत्तमम् ॥
दैविके गाणवे लिङ्गे चार्षके बाणलिङ्गके।
लिङ्गनाभोन्नतस्यापि पीठमानेन वा कुरु ॥
यदि दैविकमानुष्यमूलं वा दिव्यमेव वा।
पूजाभागस्य नाहार्धं मुत्सेधार्धमथापि वा ॥
तद्द्वयं वसुधा कृत्वा सप्तांशं मध्यमं भवेत्।
34a रसांशमधमं प्रोक्तं पूजाभागस्य मानकम् ॥
हरीहरस्यौ यन्मान द्विभागमथवापि वा।
त्रिभागमुत्तमं प्रोक्तं द्विभागं मध्यमं भवेत् ॥
अधमं चैकभागेन त्रिधा मानं प्रशस्यते।
लिङ्गपीठस्य भागोऽर्धमानेनैवोत्तमं विदुः।
तस्यार्धमधमं ज्ञेयं तयोर्मध्येऽष्टभाजिते।
अधमादीनि चोत्तुङ्गं नाभिमानेन षण्मुख ॥
पीठतारसमं मानमुत्तुङ्गं तत्प्रशस्यते।
तथैव तुङ्गमानेन कारयेद्वृषमानतः ॥
सकलानां विशेषेण तत्तद्बाह्यार्धमुच्छ्रयम्।
पीठं महत्तरं चेत्तु तुङ्गमानेन तं कुरु ॥ १०० ॥
अल्पं च नाहमानेन कारयेदेवमेव तु।
अन्यलिङ्गादिके वत्स केवलं वृषभं कुरु ॥

अष्टमङ्गलरूपाणि परितः कल्पयेत्क्रमात्।
वृषोच्चार्धेन भागैकं भागं कुर्याद्वृषासनम्॥
दलैः षोडशभिर्युक्तं कर्णिकाकेक[स]रैर्युतम्।
द्विपार्श्वे चामरं श्वेतं पूर्णघण्टारवं तु वा॥
अधश्चोर्ध्वे लिखेद्विद्वान् लक्षणेन समन्वितम्।
नानावल्लीयुतैरन्यैः पुन्नागकुसुमं लिखेत्॥
युग्मलोचनरक्षे तु कारयेन्नेत्रमोचनम्॥
त्रिमूर्त्यायतनं चेत्तु हंसतार्क्ष्यौ वृषं लिखेत्।
ऊर्ध्वे वृषभमालिख्य वैनतेयं तु मध्यमे॥
अधस्तार्ध्यं समालिख्य कल्पयेत्तु विशेषतः।
34b प्रधानध्वजमेवोक्तं मध्येजां केवलं वृषम्॥
अष्टध्वजं समारोप्य दैविके तु षडानन।
लोकपालकलिङ्गांश्च प्रधानं वृषभध्वजम्॥
पावकाद्येशपर्यन्तं लोकेशान्वाहनांल्लिखेत्।
शिल्पिकर्म विसृज्याथ दक्षिणां दापयेत्पुनः॥
प्रोक्षयेच्छुद्धतोयेन लम्बकूर्चोपरि न्यसेत्।
चन्दनं चाक्षतं पुष्पं तिलचूर्णं ददेत्क्रमात्॥
जलाशयं तु संकल्प्य शिवाग्रे स्थण्डिलोपरि।
सौवर्णं राजतं ताम्रं मृण्मयेन जलाशयम्॥
गन्धतोयेन संपूर्णं विन्यसेत्स्थण्डिलोपरि।
दर्पणं विन्यसेन्मध्ये यं दृच्छायान्वितं गृह॥
यामं यामार्धमात्रं वा विन्यसेत्तु जलाशये।
जलादुत्तीर्य यामान्ते वृषयागं समारभेत्॥
ब्रह्मजज्ञानमन्त्रेण विन्यसेदङ्घ्रिवेदिके।

इदं विष्णिवति मन्त्रेण वृषकुक्षौ तु विन्यसेत्।
त्रियम्बकेति मन्त्रेण वृषपृष्ठौ तु विन्यसेत्।
आपो हि ष्ठेति मन्त्रेण लाङ्गूलाग्रे तु विन्यसेत्।
बिल्वतन्त्र चतुरित्युक्तो विन्यसेत्क्रमधपमे॥
प्रणवेन समायुक्तं हृदयं च शिरः शृणु॥ ११५॥
तीक्ष्णशृङ्गाय विद्महे शिरेण सह योजयेत्।
चुलिके वेदपादाय धीमहि कवचस्तथा।
35a नेत्रं तन्नो वृषश्चोति प्रचोदयात्तमन्त्रतः।
षडङ्गं हृदयादीनि विन्यसेत्तु विचक्षणः॥
पञ्चविंशतितत्त्वानि विन्यसेत्तु तदङ्गके।
गन्धपुष्पं तथा धूपं नैवेद्यं च समर्पयेत्॥
वृषगायत्रिमुच्चार्य विन्यसेद्वृषकुम्भके।
उक्षं पूर्वघटे न्यस्त्वा शृङ्गिणं दक्षिणे तथा॥
नन्दिनं वारुणे चापि वेदपादं तथोत्तरे।
पावके गोपतिं चैव उग्रतुङ्गं तु राक्षसे॥
वायव्ये वृषनाथं तु वृषभं चैशके घटे।
तार्क्ष्यगायत्रिमुच्चार्य मध्यकुम्भे तु विन्यसेत्॥
तार्क्ष्यं पूर्वघटे न्यस्त्वा दारुणं दक्षिणे घटे।
वारुणे स्वर्णपक्षं तु वैनतेयं तथोत्तरे॥
आग्नेय्यां सर्पनारीं च गरुत्मश्चैव नैर्ऋते।
वायव्ये नागनारीं च विषान्तं चैकश ~~मैशके॥~~ घटे॥
हंसः शुचिष मन्त्रेण हंसकुम्भे तु विन्यसेत्।
विहङ्गं पूर्वकुम्भे तु वेदमाता च पावके॥
वेदिं [वि]दक्षिणे भागे च पक्षिराजस्तु नैर्ऋते।

वारुणे तु घटे विद्वान् तुरगशीर्षं तथैव च।
मारुते तु घटे वत्स कृष्णवाहनमेव च॥
शुकनासी तथा सौम्ये हंसरूपं तथैशके।
एकैकमावृतानेतौ कुम्भान्कुम्भे तु विन्यसेत्॥
356 गतात्पूर्ववतः कुर्याद्देशिकेन विचक्षणः।
देवतामण्टपे वापि वाहनामण्टपेपि वा॥
गोमयालेपनं कुर्यात्प्रोक्षयेदस्त्रमन्त्रतः।
स्थण्डिलं शालिना कुर्यादेकैकं तु पृथक्पृथक्॥
नवध्वजोत्तमं ज्ञेयमष्टके तु त्वन्तु मध्यमम्।
अधमं ध्वजमेकं स्याद्यथा वित्तानुसारतः॥
मध्यादीशानपर्यन्तं स्थण्डिलं नव कल्पयेत्।
द्रोणतोयेन संपूर्णान्कुम्भान्बिम्बसमप्रमान्॥
तन्तुना चित्रकान्सर्वानेकद्वित्रिकतन्तुभिः।
नवकुम्भान्सुसंस्थाप्य पदं प्रति विशेषतः॥
अष्टदिक्षु ध्वजं चेत्तु [मध्ये वृषभदेवता] ~~स्थण्डिलत्रितयं भवेत्~~
परितोऽष्टघटान्न्यस्त्वा वृषविद्येश्वरक्रमात्॥
त्रिमूर्त्यायतनं चेत्तु स्थण्डिलत्रितयं भवेत्।
वृषकुम्भं न्यसेन्मध्ये वैनतेयं तु दक्षिणे॥
उत्तरे हंसकुम्भं स्यात्तन्तुद्वियेनावृतान्।
स्थण्डिलं पश्चिमे भागे ध्वजं तस्योपरि न्यसेत्॥
सुकूर्चान्वि मन्त्रान्ध्यात्वा पुष्पाद्यैरर्चयेत्क्रमात्।
धूपदीपं ददेत्पश्चात्पुण्यसूत्रेण वेष्टयेत्॥
नैवेद्यं पायसं गौडं मुद्गान्नं दापयेत्पृथक्।
पूजयेत्तु विशेषेण ततो होमं समाचरेत्॥

पञ्चाग्निं वा तथैकाग्निं कल्पयेत्कल्पवित्तमः।
पञ्चाग्निश्चेच्चतुर्दिक्षु प्रधानं चैशकेदिशि॥
36a एकाग्निश्चेद्विशेषेण पूर्वे वा त्वैशकेपि वा।
अग्निकार्योक्तमार्गेण वृषाग्निं परिकल्पयेत्॥
समिदाज्यचरुमुद्गतिलसर्षपकं यवम्।
वृषगायत्रिमन्त्रेण प्रत्येकं चैकविंशतिम्॥
हुत्वा हुत्वा च वै वत्स स्पर्शाहुतिमथाचरेत्।
मूर्तिगायत्रिमुच्चार्य हुत्वा चैककममाहुतिम्॥
वृषाङ्गान्तु हुनेत्पश्चाज्जयादीं तत्र हूयते।
अभ्यैध्यानं हुनेत्पश्चात् राष्ट्रभृच्च हुनेत्पुनः॥
तार्क्ष्यगायत्रिमुच्चार्य हुनेत्पञ्चशताहुतिम्।
हंसः शुचिषमन्त्रेण हुत्वा चैव तथा भवेत्॥
घृतेन जुहुयात्सर्वं व्याहृतीश्च हुनेत्पृथक्।
पूर्णाहुतिं क्रमेणैव होमयेत्प्रणवेन तु॥
परिषेकं ततः कुर्यात्पुनः पुण्याहमाचरेत्।
वृषगायत्रिमन्त्रेण वृषस्य यन्यसेत्॥
पञ्चदण्डांश्च संकल्प्य प्रासादस्य समं भवेत्।
तुल्यन्तु नासिकान्तं च कन्धरं गोपुरान्तकम्॥
चन्दनं चूर्णकं बिल्वं मधूकं पल्लवं तथा।
वैणवं देवदारुं च याज्ञिकैश्च तरुं गुह॥
पञ्चकं क्रमुकं चैव दण्डान्यत्रैव संग्रहेत्।
त्रितालं मूलनाहं स्या क्रमशो ग्रान्तकं कृशम्॥
अन्तः साराणि सर्वाणि दारवः पुरुषान्विदुः।
बहिः साराणि सर्वाणि नारीरूपं भवेद्गुह॥

36b यागान्तो वर्जयेन्नाशि तल्लयान्तं प्रमान्विदुः ।
एवं दण्डादिसंकल्प्य विशेषं निश्चितं बहिः ।
हर्म्यं नवतलं चेत्तु ध्वजं प्रतितलं कुरु ।
उत्तमं त्रिणि विख्यातं त्रितलान्ते तु मध्यमम् ॥ १५० ॥
शिल्पाकुम्भसमं ज्ञेयं प्रासादं मृतिर्भवेत् ।
अल्पप्रासादकं चेत्तु द्विगुणं दण्डदैर्घ्यकम् ॥
मानवे ह्येव मेवं स्याद्यद्वा स्वायम्भुवे सति ।
स्थानानि शकटं चेत्तु कोणे कोणे चतुर्दिशि ॥
प्रधानपूर्वदिग्भागे शंकरे वा विशेषतः ।
अष्टदिक्षु ध्वजं कुर्याद्राज्यश्रीश्चैव वै गृहे ॥
यष्टित्रयं ततः कुर्यात् याज्ञिकैस्तरुभिर्यजेत् ।
आयामं रत्निमात्रं स्यात्तदर्धं विस्तरं भवेत् ॥
घनं तत्कौशिकाङ्गुल्यमर्धावरमर्धैकतः ।
सुषिरद्वयमन्येषां याज्ञवास्तु दृढं ~~भवेत्~~ सुधीः ॥
उपदण्डं वैणवं तु पादोत्सेधसमं तु वा ।
हर्म्यतारार्धमानं वा रथ्यायामसमं तु वा ॥
ध्वजदण्डस्य चोत्सेधं वेदभूतरसांशकम् ।
उपदण्डस्य चोत्सेधं प्रोच्यन्ते तु शिखिध्वज ॥
षट्पञ्चचतुरङ्गुल्यं नाभिमात्रप्रमाणतः ।
तस्योर्ध्वे योजयेद्विद्वान् यन्त्रयष्टिं विशेषतः ॥
वक्त्रं चायसेनाय स्निग्धं कृत्वा सुबुद्धिमान् ।
हस्तमात्रायतं कूर्चमग्रे चैव तु योजयेत् ॥
37a दर्भमालादिना वेष्ट्य सप्रदक्षिणमाचरेत् ।
अग्रादि मूलपर्यन्तं मूलादग्रान्तमेव वा ।

वलयं योजयेद्रज्जुं गुणं कूलमाश्रितम् द्विगुणं
मात्राङ्गुल परीणाहे सत्रिवृत्कारयेद्गुरुः ॥
वृषस्य पुरतो वापि महापीठ पुरोऽपि वा।
वृषापदे पीठपृष्ठे गोपुरस्य पुरे पुरे ॥
सप्त मात्रावटं खात्वा गोमयेनानुलेपयेत्।
प्रोक्षयेत्कुशतोयेन चन्दनं चाक्षतं न्यसेत् ॥
हैमेन कच्छपं वाथ रौप्येण वृषभं तु वा।
विष्णुं ध्यात्वा च वैवस्त विन्यसेद्दण्डमूलके ॥
शैलजे चैष्टके वाथ मृण्मये वाथ कारयेत्।
अधिष्ठान समोत्सेधं मध्यमं तस्य विस्तरम् ॥
अथ वारत्न मात्रं स्यादुत्सेधं तद्द्वयं ततिम्।
उपानस्य तु यत्राकं पीठस्यैव तु कारयेत् ॥
उपनादीन्पट्टिकान्तमुत्सेधं त्विति गोप्यते।
तदूर्ध्वेष्टदलं पद्मं कर्णिका च समन्वितम् ॥
दर्पणोदरवत्सर्वं गोमयेनानुलेपयेत्।
शिल्पिनं तु विसृज्याथ प्रोक्षयेद्धृदयेन तु ॥
मङ्गलाङ्कुरमावृत्य मङ्गलाङ्कुरमावृतान्।
पूर्णकुम्भैरलंकृत्य धूपदीपैरलंकृतैः। १६० ॥
कौतुकं बन्धयेत्सर्वान् सौवर्णेनाथ तन्तुना।
एवं रात्रौ तु संकल्प्य प्रभाते विमले गुरुः ॥
नित्यसंध्यावसाने तु वृषभं शूलमर्चयेत्।
376 पूजयेत्पूर्ववत्सर्वम् अग्निमूर्तिं समर्चयेत् ॥
शेषद्रव्याणि सर्वाणि होमयेत्तु षडङ्गकैः।
जयादिमभ्यातानादि राष्ट्रभृच्चाहुतिं हुनेत् ॥

वृषगायत्रिमन्त्रेण प्रायश्चित्तार्थकं हुनेत्।
पूर्णाहुतिं ततो दद्यात् धारयेन्मूलमन्त्रतः॥
अग्निमूर्तिं विसृज्यात्र प्रोक्षयेदस्त्रमन्त्रतः।
ध्वजाधिदेवतान्पूज्य तत्तन्मूलेन मन्त्रवित्॥१६५॥
पञ्चविंशतितत्वान्तं वृषरूपं षडानन।
नागान्तं वैनतेयं च स्यार्धं संयत्पञ्चविंशतिम्॥
तत्तद्गायत्रिमन्त्रेण तत्तद्वर्णानि विन्यसेत्।
प्रणवं विन्यसेन्मूर्ध्नि तीकारं मध्यमस्तके॥
क्ष्णकारं विन्यसेच्छ्रोत्रे शृकारं शृङ्गमूलके।
ङ्गाकारं दक्षिणे नेत्रे यकारं वामलोचने॥
विकारं नासिकादक्षे द्मकारं तस्य वामके।
हेकारं गण्डमध्ये तु वेकारं त्वधरोष्ठके॥
दकारं तालुमध्ये तु पाकारं चोत्तरोष्ठके।
दाकारं दन्तपङ्क्तौ तु यकारं हृदये न्यसेत्॥
धीकारं नाभिमध्ये तु मकारं वृषणे न्यसेत्।
३१० हिकारं बीजदेशे तु तकारं नकारं दक्षिणे स्फिके॥
णोकारं चापरे दक्षपादे विन्यस्य षण्मुख।
वृकारं पादमूले तु षकारं पृष्ठदेशके।
भकारं पुच्छमूले तु प्रकारं तस्य मध्यमे।
चोकारमग्रपुच्छे तु दकारं लाङ्गुलाग्रके॥
याकारं खुरमूले तु क्रमात्स्थाने तु विन्यसेत्।
एवमक्षरविन्यासं पुनरङ्गानि विन्यसेत्॥
यस्य शृङ्गं तु वृषभे मन्त्रं न्यस्त्वा तु मध्यमे।
गन्धादीन्पूजयेत्पश्चाच्छूलं चक्रं सरोरुहम्॥१६६॥

घृतं शिरोर्पणं कुर्यात् निशि[शा] चूर्णं समर्चयेत्।
कुम्भानुद्धृत्य शिरसा धारयेत्सदनाद्गतान्॥
कुम्भबीजं समादाय वाहनाद्धृदये न्यसेत्।
तत्कुम्भस्थोदकेनैव प्रोक्षयेत्तास्त्रमन्त्रकैः॥
सर्वालंकारसंयुक्तैः सर्वतोद्यसमन्वितैः।
ग्रामप्रदक्षिणं कुर्यात्त्रिशूलेन समायुतान्।
सकुम्भं च विकुम्भं च द्विविधं सर्वमेव च।
सकुम्भं ब्राह्मणस्योक्तं विकुम्भं क्षत्रियादिनाम्॥
शूलं चक्रं च पद्मं च केवलं फलमेव वा।
ध्वजं निवस्य सेद्धत्स दण्डस्याग्रे शिखाग्रके॥
स्थण्डिलं पूर्ववद्धत्स न्यस्त्वा पूर्ववदाचरेत्।
वस्त्राद्य पुष्पमालाद्य बन्धयेद्धृदयेन तु॥
चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः।
नृत्तं गानं च वाद्यं च शङ्खकाहलनादकैः॥
384 जयशब्दैर्हरशब्दैः ब्रह्मघोषसमाकुलैः।
वृषताळं तु संताड्य ध्वजमारोपयेत्पुनः॥
छिन्नं भिन्नं तथा जीर्णैः सद्यः सन्धाय षण्मुखः।
प्रायश्चित्तेववत्कुर्यात् शान्तिहोमं तथाचरेत्॥
ध्वजमन्त्रं गृहीत्वा तु लेखयेद्वृषदेवताम्।
सद्योधिवासनं कुर्यात् शुद्धपुण्याहमाचरेत्॥
ब्राह्मणान्घोषयित्वा तु क्षिप्रमारोपयेद्ध्वजम्।
वृषकुम्भाभिषिच्याथ दण्डमूले विशेषतः॥
परिवारध्वजांश्चैव तत्तद्दिगभिषेचयेत्।
पूजयेत्पूज[र्व?]द्धीमान् गन्धादीनि यथाक्रमम्॥

वृषोच्छिष्टं ददेन्नित्यं वन्ध्याना रोगिणामपि।
तत्पिण्डं प्राशयेन्नारी अपुत्री पुत्रमाप्नुयात्॥
व्याधिघ्नं सर्वदोषघ्नं वृषोच्छिष्टं त्रिविष्टप।
ध्वजदेवं वृषं विद्याद्ध्वजालग्नं षडानन॥
दण्डं च विष्णुदैवत्यं पूजयेत्तु स्वनामतः।
वृषं वृषभदेवाश्च वृषगायत्रिमूर्तयः॥
त्रिसन्ध्यमर्चयेद्विद्वान् वृषगायत्रिमुच्चरन्।
अथवा पूजयेद्धस्त त्रैसन्ध्यामेकमेव वा॥ श्रीः॥ ॥
रात्रौ भेरीं च संताड्य सर्वदेवप्रियार्थकम्।
भेरीणां लक्षणं वक्ष्ये शृणु चैव तु षण्मुख॥
310 खादिरं पनसं वापि आम्रबिल्वं तथैव च।
जातिवृक्षशिरीषं च स्तम्भकार्जुनमेव च॥
असनं बकुलं चैव उशीलं चन्दनं तथा।
द्विजा उशीलका प्रोक्ता क्षत्रिया बकुलं तथा।
न्यग्रोधं वैश्यजातीनां वटः शूद्रस्य जातिषु।
एवमादीनि वृक्षाणि सारं संगृह्य यत्नतः॥
उत्तमं सप्ततालं स्या द्वेशीयामं त्रिधा भवेत्।
एवमायसमायुक्तं द्विमुखं च करिष्यसि॥
मुखाभ्यां नाहमुद्दिष्टं द्वात्रिंशाङ्गुलमुत्तमम्।
अष्टाविंशाङ्गुलं मध्यं चतुर्विंशं तु कन्यसम्॥
सप्ताङ्गुलविहीनं स्यात्तद्वामस्य मुखं भवेत्।
भेरीमध्यमनाहे स्यात्षट्षष्टिकतमं भवेत्॥
मध्यमं तु चतुष्षष्टिर्द्विषष्टिश्चाधमं स्मृतम्।
भेरीणां लक्षणं वक्त्रा मेकाङ्गुलमिति स्मृतम्॥

उत्तमं तद्विजानीयान्मध्यमं यवहीनकम्।
39b अधमं तु यवं विद्धि ओष्ठमानं त्रिधा भवेत्॥
मध्यतास्य वर्धोत्तत्र क्रमेण कृशता नयेत्।
उदरं सुषिरं चैव सर्वत्रैव तु कारयेत्।
वलयं वक्त्रोपरि कुर्यात् ताम्रमायसमेव वा।
यवाधिकं तु वलयमोष्ठोपरि समन्ततः॥
सुषिरं सूक्ष्मसंयुक्तं अष्टादशनवं बुधः।
सुषिरं सप्तदशमं चतुर्दशमथापरे॥
अष्टादशं च वामे तु दक्षिणे नवकं तथा।
वलयं गृह्य यत्नेन तदलाभे तु काष्ठजम्॥
तन्त्रिणी करवीरं च शाकाशो वा वसन्तिकः॥ २१५॥
सर्वं यष्टिं समादाय वलयं तत्र कारयेत्।
रज्जुना वेष्टयेत्पश्चात् सुश्लक्ष्णेन दृढीकृतम्।
सूत्रेण वेष्टनं तत्र यवान्तरमनन्तरम्।
वलयं स्थापयेत्तत्र अनेन सह योजितम्॥
कपिलायाः सुचर्मेण जरावत्समथापि वा।
गावं वत्सं तु विप्रेन्द्र दोषमत्र परीक्ष्य च॥
चर्मसंयोज्य यत्नेन स्थापयेच्छुद्धवारिणा।
अन्नमूलेन संयोज्य वलयेनैव संयुतम्।
संयोज्य मतिमान्सम्यग्रन्ध्रादीन् क्रमयोगतः।
चर्मेण वेष्टयेद्वक्त्रं चर्मसूत्रेण वेष्टयेत्॥ २२०॥
40a अथ देवलकानां तु लक्षणं ब्रुवतेऽधुना।
त्रिविधं तच्च गदितं कल्पकर्मादिभेदतः॥
वृत्त्यर्थं पूजयेद्यस्तु प्रतिमां लिङ्गमेव वा।

देवस्थानपतियोऽसौ स वै देवलकः स्मृतः।
अर्थार्थकालनिर्दिष्टे वि? वृत्त्यार्थी वत्सरत्रयम्॥
दिनमासर्तुरहितो वत्सरायनवर्जितः।
अविच्छिन्नन्तु मासाद्यैः यो देवं पूजयेन्नरः।
स वै देवलकः प्रोक्तः सर्वकर्मबहिष्कृतः॥
कल्पदेवलकाश्चैव कर्मदेवलकास्तथा।
शुद्धदेवलकाश्चैव इति देवलकास्त्रिधाः॥
देवस्थानादिपतयो गणिकाद्याश्च सेवकाः।
कल्पदेवलकास्ते ते देवद्रव्यापहारिणः॥
पूजाङ्गं जापका विप्रा अभिषेकादिकर्मसु।
पूजाहोमादिदानेषु नियुक्ता कर्मदेवलाः॥
वृत्त्यर्थमचले लिङ्गे परार्थं यः शिवं यजेत्।
वर्षत्रयमतीतं चेत् शुद्धदेवलकः स्मृतः॥
कल्पदेवलकानां तु ऐहिकामुष्मिकं नहि।
पुत्रपौत्रादिभिः क्लिष्टाः नरकं यान्ति सर्वथा॥
कर्मदेवलकास्ते ते भक्तियुक्ता महेश्वरे।
तस्य प्रसादाल्लभन्त ऐहिकामुष्मिकं ययुः॥
408 शुद्धदेवलका विप्राः सर्वकर्मबहिष्कृताः।
रात्रे कल्मषसंयुक्ताः पश्चाच्छुद्धा जपादिभिः॥
तथा सर्वज्ञानोत्तरे —
परार्थं यजनं चेत्तु चले वाप्यचलेऽपि वा।
नैगमेनापि वा कुर्यात् विधिना श्रुतिदेवलः॥
आत्मार्थं चरलिङ्गं तु स्थिरलिङ्गं परार्थकम्।
धनं स्वीकृत्य यः कुर्याद्विधिना श्रुतिदेवलः॥

अर्चायां कालनिर्दिष्टं वित्तार्थी वत्सरत्रयम्।
स वै देवलको नाम सर्वकर्मबहिष्कृतः॥
चितिं काष्ठं चितिं चैत्यं यूपं चण्डालमन्त्यजम्।
कल्पदेवलकान्स्पृष्ट्वा सचेलं स्नानमाचरेत्॥
इति देवलक-निर्णयः॥

*

मृगयात्रादिकं गत्वा वने पुष्पवनादिभिः।
किरातरूपिणं कृत्वा सर्वभक्तजनैः सह॥
नृत्तगीतैश्च वाद्यैश्च छत्रचामरसंयुतैः।
शिबिकायां समारोप्य देवं देवीसमन्वितम्॥
शूलं धनुः समायुक्तं देशिका मूर्तिपैः सह।
गत्वा पुष्पवनं वापि प्राङ्मुखो वाप्युदङ्मुखः॥
प्रविश्य मण्डपं चैव वितानादिविभूषितम्।
तोरणादि बहिः कृत्वा पुष्पमालादिरञ्जितम्॥
पूजयित्वा महादेवमर्चयेदायुधादिभिः।
फलपुष्पादिभिः कृत्वा ताम्बूलं च प्रदापयेत्॥
नीराजनं प्रकर्तव्यं नृत्तगीतसमन्वितैः।
५१९ नाळिकेरफलं चैव चतुर्दिक्षु प्रपूजयेत्॥
पूर्वादीनां चतुर्दिक्षु मृगमावाह्य देशिकः।
ऊर्ध्वदिक्षु फलं बद्ध्वा स्थापयेद्वेणुदण्डकैः॥
दण्डैर्बद्ध्वा फलं चैव नववस्त्रेण वेष्टयेत्।
कुर्याद्बाणप्रयोगेन यजमानं तु कारयेत्॥
प्रथमं पूर्वतो वापि द्वितीयं दक्षिणे तथा।
तृतीयं पश्चिमे देशे चतुर्थं चोत्तरे क्रमात्॥

पञ्चमं चोर्ध्वदेशस्य पञ्चबाणप्रयोगकैः।
पूर्वे वृद्धिप्रदं ज्ञेयं दक्षिणे शत्रुनाशनम्॥
पश्चिमे राज्यसंपत्तिर्धनधान्यादिचोत्तरे।
ऊर्ध्वदेशे तु यः कुर्यात्सर्वसंपत्प्रवर्धनम्॥
पुनर्देवालयं गच्छेद्देवालयं वा प्रदक्षिणम्।
आस्थानमण्टपं गत्वा फलपत्रं निवेदयेत्॥
ताम्बूलं दापयेत्तत्र नीराजनमनुक्रमात्।
गन्धयागादिकं कृत्वा कर्तॄणां दापयेत्तदा॥
सुवर्णं निक्षिपेत्तत्र सर्वसेवाः प्रकीर्तिताः।
मूलगेहं प्रविश्याथ निर्माल्यं तु विसर्जयेत्॥

इति मृगयात्रालक्षणम्॥

बहिः प्रासाददेशे तु गीतवाद्यादिनिस्वनैः।
५१-६ लाङ्गल्यादिफलैरस्त्रराजानं ताडयेद्गुरुः॥
यजमानो द्वितीये च तृतीये च चतुर्मुखः।
चतुर्थे ऋत्विजो वत्स पञ्चमे जापकादिकाः॥
ताडयेयुः क्रमादेवं तदन्ते चान्यभूसुराः।
क्षत्रिया वैश्यशूद्राश्च क्षेत्रपाले समीरिताः॥
विपरीते कृते चात्र तद्बलिर्निष्फलं भवेत्।
शाम्भव्यां प्रदक्षिणं तस्य सर्ववाद्यरवैः सह॥
[इदु इडुगल्लिगे इडुगायि इडुव लक्षण - कन्नड]

अथ वक्ष्ये शृणु स्कन्द हस्तसंख्यां मर्यादिताम्।
लिङ्गस्य वेष्टयेद्वस्त्रं त्रिचतुष्पञ्चभिः करैः॥

रविसंख्या मुखस्योक्ता द्वारस्य च तदनन्तरम्।
कलासंख्यानि वस्त्राणि द्वारमाच्छादयेत्प्रभो॥
हस्तमेकं तु विस्तारे पुच्छत्रयसमन्वितम्।
हस्तसंख्या मया प्रोक्ता वस्त्रभेदमथोच्यते॥
वस्त्राणि त्रीणि भेदानि लिङ्गवस्त्रादिभेदतः।
लिङ्गस्य वेष्टयेद्वस्त्रं जीर्णोद्धारादिकर्मणि॥
तद्वस्त्रं लिङ्गवस्त्रंस्यान्मुखवस्त्रमथोच्यते।
धारासूत्रादिपीठान्तं द्वारमाच्छादयेद्गुरुः॥
तद्वस्त्रं मुखवस्त्रं स्यादष्टबन्धक्रियादिषु।
गर्भद्वारादिसूत्रान्तं द्वारमाच्छादयेद्गुरुः।
तद्वस्त्रं द्वारवस्त्रं स्यान्नैत्तिके तु समाहितः।
42a वस्त्रभेदो मया प्रोक्तो कालभेदो मथोच्यते॥
स्नपने चैव पूजायां हविःकाले बलौ तथा।
शून्यालये भूतबलौ अभ्यङ्गे होमकर्मणि॥
प्रसन्ने प्रोक्षणे चैव मङ्गले मन्त्रसाधने।
शयनादिषु कालेषु द्वारमाच्छादयेत्प्रभो॥

इति वातुले द्वाराच्छादनवस्त्रलक्षणम्॥

देव्यौवाच —

विश्वेश्वर जगद्वन्द्य महादेव दयानिधे।
तुलारोहविधिं त्वत्तः श्रोतुमिच्छामि सांप्रतम्॥
तुलारोहो जनैः कार्यः निमित्तेषु च केषु च [चित्]।
कः कालस्तद्विधेश्चात्र तद्द्रव्यं तत्फलं तथा॥
एतत्सर्वं मम ब्रूहि तव प्रीतिवशेन च।

संकटे विषमे प्राप्ते प्रार्थयेत्तुलया तु माम्।
स्वर्णेन सर्वसंपत्त्यै राज्यकोशाय चायुषे॥
हृद्रोगनाशनायाशु रजतेन सुखाय च।
गुदव्याधिविनाशाय ताम्रेण रोपयेत्तुलाम्॥
लोहेन सर्वरोगाणां नाशनाय च पार्वति।
यक्ष्मनाशाय कांस्येन त्रपुणा गुल्मनाशने॥
अपस्मारविनाशः स्यात् सीसस्य तुलया ध्रुवम्।
पित्तरोगविनाशः स्यात् तुलया पित्तलस्य तु च॥
42b गण्डमालाविनाशस्तु गुडस्य तुलया भवेत्।
तुलया ग्रहणीनाशः कदलीफलसंचयैः॥
नारिकेरैस्तु पुत्रार्थं क्रमुकैः श्वासशान्तये।
ताम्बूलैः शुभकार्यार्थं पनसाम्रफलैः शुभम्॥
फलैरन्यैः कपित्थाद्यैः द्राक्षाखर्जूरकैस्तथा।
सर्वबान्धवफलैर्देवि तुलारोहे भवेद्ध्रुवम्॥
माक्षिकेण महद्भाग्यं कीर्तिः क्षीरेण चोत्तमा।
दध्ना जडविनाशः स्यात् तेजोवृद्धिर्घृतेन च॥
दिव्यवस्त्राणि वस्त्राणां तुलया भवति क्रमात्।
चन्दनैस्तुलया प्रोक्तं सुरूपं च सुखं सदा॥
कुङ्कुमैश्च तुलारोहः सद्यः कामफलप्रदः।
कालश्चात्र तुलारोहे वैशाखः कार्तिको भवेत्।
पुण्यमासस्तु माघे वा फाल्गुनेन च एव वा।
तृतीया पञ्चमी षष्ठी नवमी च त्रयोदशी॥
नवम्येकादशी वापि तानि कम्ना शुभप्रदा।
भानुरिन्दुर्गुरुश्चैव वाराः शुक्रस्य शोभनाः॥

अश्विनी रोहिणी चार्द्रा पुनर्वसुमघात्रयम्
हस्ताज्येष्ठोत्तराषाढा नक्षत्राणि शुभानि वै ॥
शुभनक्षत्रवारादौ शुभग्रहयुते तथा ।
कृतनित्यविधिर्भूत्वा गत्वा देवालयं प्रति ॥
पूर्वभागे तथैशान्यामुत्तरे वा महेश्वरि ।
मण्टपलंकृते शुद्धे कृत्वा विघ्नेश्वरार्चनम् ॥
43ª नान्दीक्रियां सकुर्याद्वै कृत्वाचार्यपुरस्सरम् ।
वरयेद्देवपूजार्थं विप्रान्मन्त्रजपाय च ॥
कुण्डे वा स्थण्डिले वापि चाग्निकार्यविधानतः ।
समिदाज्यचरुद्रव्यैः तिलसर्षपकैः क्रमात् ॥
अष्टोत्तरशतं वापि तदर्धैर्मूलमन्त्रतः ।
होतव्यं गुरुणा देवि पञ्चविंशतिकुम्भकैः ॥
स्नाप्य संपूज्य देवेशं गन्धाद्यैश्चैव मन्त्रतः ।
प्रार्थयेदेव देवेशं भक्तानुग्रहकारणम् ॥
तुलामारोढुमिच्छामि देह्यनुज्ञां मम प्रभो ।
इति संप्रार्थ्य देवेशं तुलामण्टपमाविशेत् ॥
तुलास्वरूपिणीं तत्र विष्णुमायां जगद्धिताम् ।
अर्चयित्वा यथान्यायमिति संप्रार्थ्य तत्र ताम् ॥
धर्माधर्मकृतानां च देहिनां साक्षिणीं शिवाम्
मामुद्धर तुले देवि तस्मात्संसारसागरात् ॥
इति संप्रार्थ्य देवेशीं पुष्पाणि च विकीर्य च ।
प्रदक्षिणत्रयं कृत्वा नमस्कारांस्तथैव च ॥
एकतस्तुलया योग्य द्रव्यं तत्पात्रके ततः ।
स्वभारात्किञ्चिदधिकं निधाय तदनन्तरम् ॥

अन्यत्रस्तु स्वयं कर्ता निदध्यीत तुलां स्मरेत् ।
स्वस्तिमङ्गलवाद्यैश्च विप्राशीर्वचनैः सह ॥
सर्ववाद्यरवैः सार्धं तत्र स्थित्वा क्षणं ततः ।
43b अवरुह्य तुलापात्रात्फलं तां प्रतिमामपि ॥
स्वर्णाभरणवस्त्रादीन् गुरोर्दत्त्वा कृताञ्जलिः ।
तुलाद्रव्यं यथान्याय्यं गुर्वादिभ्योऽथ दापयेत् ॥
गोप्रदानं गुरोर्दत्त्वा दक्षिणां च स्वशक्तितः ।
विप्रेभ्यो दापयित्वा तु मृष्टान्नैर्भोजयेच्च तान् ॥
इति संप्रार्थितो देवि तुलारोहविधिस्तव ।
समीरितो मया चैव इहामुत्र सुखप्रदः ॥

इति श्रीललितागमे तुलारोहणविधिः पटलः ॥

—x—

मृगादि गभ [गृह] प्रवेशप्रायश्चित्तम् ।
श्वभिस्तु करभैर्वाथ गृध्रैः शार्दूलकैः सुत ।
शशकैर्मर्कटैश्चैव कुक्कुटैश्च वनश्चभिः ॥
मृगैरन्यैस्तथाऽन्यैश्च प्राणिभिः काननोद्भवैः ।
प्रमादाद्गर्भगेहे तु बहिः प्राकारमेव वा ॥
प्रवेशिते यदि मृते तत्र दोषाशुभं भवेत् ।
44a असान्निध्यकरं(1) चैव अलक्ष्मीर्वर्धनं नृणाम् ॥
शमनादिषु सर्वेषु प्रायश्चित्तानि सुव्रत ।
स्थानशुद्ध्यादिकं कृत्वा विघ्नशान्तिपूर्वकम् ॥
नान्दीकर्म च कुर्यादौ शान्तिहोमं समाचरेत् ।
वास्तुराक्षोघ्नहवनं बलिं वास्तोः समाचरेत् ॥
अस्त्रजापं वेदघोषैः मृत्युञ्जयजपं तथा ॥

---

(1) Space sufficient for 4 lines is left on fol 43b. The matter continues on ~~page~~ fol 44a

होमान्ते स्नापयेद्देवं अष्टोत्तरशतैर्घटैः।
ब्राह्मणान्भोजयेत्पश्चात् सहस्रया दक्षिणां तथा॥
रात्रौ दीपोत्सवं कुर्या द्वन्द्व पूजां समाचरेत्ततः परम्।
मया प्रोक्तं शृणु स्कन्द लिङ्गस्थानि ध्यमानुमान॥
पत्तनं राजधानीं च सर्वशत्रुभयावहम्।
अलक्ष्मीनाशनं स्कन्द राजराष्ट्रसुखावहम्॥
इति श्रीकारणीये प्रायश्चित्तविधिः॥

—×—

आचार्यादिनृणां देव नित्याद्यर्चनकर्मणि।
गर्भे प्राप्ते यदि स्त्रीणां ऋतुप्राप्ते तथा शिव॥
मातापित्रोर्मृते चाब्दे विवाहाब्दे महेश्वर।
कथं कार्यं महादेव श्रोतुमिच्छामि शंकर॥
शिवः— शृणु पुत्र प्रवक्ष्येहं शैवादीनां समर्चने।
नित्यादिकेषूत्सवेषु आचार्याद्यैः क्रमात्सुत॥
गर्भे प्राप्ते स्वपत्न्यस्तु तदा नित्यार्चनं गुह।
प्रकुर्यात्सप्तमासान्तं प्रतिष्ठाद्युत्सवं यदि॥
पुण्यवत्पुत्रशत दिनात्प्राक्कारयं गुरुः।
५५b वाहुकादिद्विजानां तु सप्तमासान्तमिष्यते।
रजः प्राप्ते स्वपत्न्यस्तु दशन्यासादि वैदिकः।
शुचिः स्याद्ब्राह्मणादीनां तदाचार्यस्तु जपाद्गुरोः॥
मातापित्रोर्मृताब्दे तु विवाहाब्दे षडानन।
दीक्षादि कर्मरिक्तानि बलिपूजार्चनानि च॥
ते कुर्यान्नैमित्तिकार्यं तु दीक्षा श्रौतोत्सवादिके।

तदह्नि सर्वकर्माणि न कुर्यान्नात्र संशयः।
इत्युक्तविधिना मन्त्री दोषादींश्च विचार्य वै॥
दोषस्तु सर्वदा त्यक्त्वा गृह्णीयादितरं स्मृत।

इति श्रीचन्द्रज्ञाने आचार्यादिद्विजानां पत्नीगर्भऋतु-
मातापितृमृतदीक्षाविवाहदीक्षादि विभाग-
निर्णयपटलः॥ श्रीः॥

→

सम्यगुक्तं मया वत्स प्रतिष्ठोत्सवलक्षणम्।
पतिका नियमं सम्यक् शैवादीनां शृणूत्सवे॥
नित्ये नैमित्तिके काम्ये षण्मासे चायने तुत।
मासर्तुपक्षवारे च दीपाख्ये सूत्रपूजने॥
व्रतकाम्यादिके चादौ नियमं वत्सरे क्रमात्।
उत्तमं द्विमुहूर्तं स्यान्मध्यमं सार्धमुहूर्तके॥
अन्यमेके मुहूर्तं स्यान्निर्णयं नियमोत्सवे।
षण्मासे चायने वत्स तत्काले प्रयागते॥
यद्दिने संक्रमे प्राप्ते मध्याह्ने चार्धरात्रके।
उत्सवं तद्दिने कुर्यादर्धरात्रादिके गुरुः॥
45a न कुर्यात्तद्दिने वत्स परे कुर्यान्न संशयः।
मासर्तुपक्षवारे च उत्सवेषु विशेषतः॥
द्वात्रिंशद्घटिकायां तु त्रिंशद्दशा तिथिः शुभा।
तन्न्यूने पूर्वदिवसे गुरुः कुर्यात्तदुत्सवम्॥
दीपोत्सवे पवित्रे च व्रताद्यर्चनकर्मणि।
तत्काले यद्दिने यस्मिन्नृक्षे नियमनोत्सवम्॥
तस्मिन्प्राह्णे तदेकं वा मुहूर्ते पञ्चसंयुते।

यामे वा कारयेन्मन्त्री तथैवा षडानन ।
तत्कर्माणि ततः पश्चात्पवित्रं विषये शृणु ॥
चतुस्त्रिद्विमुहूर्तस्तु उत्तमादिक्रमाद्गुरुः ।
द्रोपस्तद्विषये नान्यत्पूर्वं कुर्यात्पवित्रकम् ॥
तथा व्रतादिके वत्स निशि कुर्याच्चनैर्विना ।

इति श्री चन्द्रज्ञाने उत्सवादीनां तिथि[ध]कूरिका-
निर्णयनिरूपणं नाम त्रिंशत्पटलः ॥

—*—

रथप्रयाणकाले तु गोमाहिषमृगादयः ।
स्त्रीबालस्य शिराश्चैव रथचक्रहता यदि ॰
क्षताश्च शीर्णदेहाश्च तथैव रुदिराप्लुताः ।
तत्काले तु मृतिं प्राप्ते तत्फलं शृणु पार्वति ॥
राज्यक्षोभं नृपक्षोभं तथा दुर्भिक्षसंभवम् ।
परचक्रभयं चैव देशकोशविनाशनम् ॥
तद्दोषपरिहारार्थं प्रायश्चित्तं विधीयते ।
लक्षं जपेदघोरास्त्रं तथा पाशुपतास्त्रकम् ॥
45b मृत्युंजयं तथाग्नेयं तथा दिक्पालमन्त्रकम् ।
वेदपारायणं चैव ब्राह्मणैः कारयेत्सुधीः ॥
अघोरेणायुतं हुत्वा तत्तद्द्रव्येण देशिकः ।
स्नापयेत्कुम्भसाहस्रैः विधानाद्देशिकोत्तमः ॥
पश्चाद्ध्यादिदानेन गोशतं समलंकृतम् ।
ब्राह्मणेभ्यस्ततो दद्यात्स्वर्णभूम्यादिकाः क्रमात् ॥
भोजयित्वा द्विजश्रेष्ठान् दीनान्धबधिरानपि ॥
अनुज्ञातस्ततो विप्रैरुत्सवं कारयेद्गुरुः ॥

एवं कृते महेशानि यथोक्तफलभाग्भवेत्।
इति विजये॥

रथयात्रादिकाले तु छेददथे प्रमादतः।
राजा राष्ट्रं जनानां च नाशनं च भवेद्ध्रुवम्॥
तस्माद्यत्नेन कुर्वीत प्रायश्चित्तं यथोक्ततः।
जपेल्लक्षमघोरास्त्रमयुतं होमयेद्बुधः।
सहस्रकलशैर्देवमभिषिञ्चेत्समाहितः।
गजाश्वरथदानादि दद्याद्वित्तानुसारतः॥
ब्राह्मणान्भोजयेत्पश्चात् यथाविभवविस्तरम्।
यथापूर्वं तथा कुर्याद्रुत्सवं देशिकोत्तमः।
इति संतानसंहितायाम्॥

रज्जुच्छेदे रथच्छेदे स्थिते च पतितेऽपि च।
अघोरास्त्रमहामन्त्रं लक्षसंख्या जपेन्मनुम्।
सहस्रकलशं कुर्याद्दशसाहस्रहोमकम्।
हुनेच्च समिदाज्यादीन् महाभूतबलिं हरेत्॥
५८a रथनिर्माय भूरादि कल्पयेल्लोककल्पनाम्।
रथं कृत्वा विशेषेण देवमारोप्य भक्तितः॥
रथस्य चालनं कृत्वा कारयेद्भूरिभोजनम्।
आचार्यं प्रीणयेत्पश्चान्मूर्तिपाञ्जापकानपि।
दीनान्धबधिरादीनां दापयेद्भूरिदक्षिणाम्।
समाप्य मूलबिम्बं तु यथा विभवविस्तरम्॥
इति कारणीये।

रथप्रदक्षिणे काले रथभङ्गो भवेद्यदि।
अघोरास्त्रं जपेन्मन्त्री लक्षं तद्दोषशान्तये।

तथा पाशुपतास्त्रं च मृत्युञ्जयसुदर्शनम्।
आग्नेयं क्षुरिकास्त्रं च ब्रह्मास्त्रं क्षेत्रपालकम्॥
शूलिन्याश्च महामन्त्रं मृतसंजीवनीमपि।
प्रत्यङ्गिरं लोकपालान् अभयंकरमेव च॥
नवग्रहाणां मन्त्रांश्च साधिप्रत्यधिदैवतान्।
अपमृत्युविनाशार्थं राजराष्ट्रनिवृद्धये॥
एवं कृते महादेवि सर्वशान्तिर्भविष्यति।
इति कारणीये॥
रथभङ्गफलं चक्रभिन्ने तु कलशेपि वा।
महारोगादिजातं च हुनेत्पाशुपतेन तु॥
दण्डहीने महामारी मूलेन जुहुयाद्बुधः।
पट्टिका भिद्यते चैव मसूरीव्याधिसंभवम्॥
अघोरेण हुनेन्मन्त्री सर्वारिष्टविनाशनम्।
पत्रहीने स्नानहीने दुर्भिक्षं सर्वनाशनः॥
हुनेन्मूलेन विधिवत् सर्वशान्तिकरं परम्।
द्वारादिपट्टिकामूले मनस्तापं धनक्षयम्॥
५०-६ मूलेन जुहुयान्मन्त्री सर्वशान्तिकरं परम्।
उपशालादहीने तु राजा राष्ट्रं विनश्यति॥
अघोरेणायुतं हुत्वा सहस्रं स्नपये गुरुः।
सर्वशान्तिकरं पुण्यमायुरारोग्यवर्धनम्॥
मूर्तिहीने च तुरगे सर्वसंपद्विनाशनम्।
हुनेदघोरमन्त्रेण सर्वशान्तिर्भविष्यति॥
पताककलशे हीने दुर्भिक्षं मरणं भवेत्।
मूलेन जुहुयान्मन्त्री सर्वारिष्टविनाशनम्।

आचार्यमूर्तिपाहीने शोधनं सर्वसंपदम् ।
भाग्यादीनि विनश्यन्ति महाशान्तिं समाचरेत् ।
रथस्थमूर्तौ पतिते भिन्ने हस्तपदादिके ।
सर्वलोकक्षयकरं सर्वशत्रुविवर्धनम् ॥
महामहाभूतपीडा बहुधा बहुधा तथा ।
महाशान्तिं प्रकुर्वीत होमयेद्घोरलक्षकम् ॥
रथस्तु पतिते भिन्ने राजा राष्ट्रं विनश्यति ।
पूर्वभागे च पतिते महाराष्ट्रं विनश्यति ॥
पतिते चाग्निदिग्भागे नगरेग्निभयं भवेत् ।
याम्यायां च महामारी मसूरीव्याधिपीडनम् ॥
पतिते नैरृते भागे प्रजाक्षोभं महत्तरम् ।
वारुण्यां पतिते चैव अवृष्टिः सस्यनाशनम् ॥
पतिते वायुदिग्भागे महारोगं धनक्षयम् ।
47a बेरे [च] पतिते चैव धनधान्यं विनश्यति ॥
पतितेशानदिग्भागे महात्मा गुरवस्तथा ।
साधुसज्जनगोविप्राः विनश्यन्ति न संशयः ॥
गोभूतिलहिरण्यादि महादानादिकं चरेत् ।
हुनेद्घोरं महामन्त्रं लक्षसंख्यं जपेन्मनुम् ॥
स्नापयेत्कुम्भसाहस्रैः ब्राह्मणान्भोजयेद्गुरून् ।
तद्रथं पूर्ववत्कृत्वा पुनरुत्सवमाचरेत् ॥
सर्वशान्तिर्भविष्यति सर्वारिष्टविनाशनम् ।
सहस्रशीर्षं देवं सहस्राक्षं सहस्रपात् ॥
एवं विराड्रूपं च ध्यानाद्देवं समाहितः ।
अनेन विधिना मन्त्री प्रायश्चित्तं समाचरेत् ॥

इति श्रीकिरणे रथचक्रादि पतनभङ्गच्छेदनादि
प्रायश्चित्तविधिः ॥

शिव उवाच —

रथेत्वारोहमाणे तु देवेशेन सुरेश्वरी ।
रथं शिवात्मकः प्रोक्तः तद्रूपाध्यनये शृणु ॥
रथाग्रे तिष्ठति ब्रह्मा रथमध्ये सदाशिवः ।
रथमूले स्थितो विष्णुः त्रिमूर्त्यात्मा रथोत्तमः ॥
रथाङ्गोपाङ्गमाश्रित्य सर्वास्तिष्ठन्ति देवताः ।
दिगीशा दिक्षु तिष्ठन्ति कूर्मानन्तावधः स्थितौ ॥
तस्माद्रथस्तु देवेशि सर्वदेवमयः स्मृतः ।
रथाक्षमोः प्रभङ्गे च राष्ट्रराजाप्रजाक्षयः ।
उपोष्य तद्दिने तत्र सर्वभोगविवर्जितः ।
47b अधःशायी भवेद्रात्रौ राजा परमनैष्ठिकः ॥
पूर्वाह्णे चापराह्णे वा रात्रौ वा सुरसूदनी ।
रथाक्षभङ्गे संजाते आह्वानञ्चेद्दारगान् ॥
कपिलाङ्गां पुरस्कृत्य दद्यात्सर्वस्वदक्षिणाम् ।
तत्र शान्तिं प्रकुर्वीत द्विजार्थीभ्यां समन्वितः ॥
श्रावयेच्चतुरो वेदान् जपेत्प्रासादकं मनुम् ।
शतलक्षं तदर्धं वा होमं कुर्याद्दशांशकम् ॥
प्रासादोक्तप्रकारेण पूजयेच्च सदाशिवम् ।
त्रियम्बकं महादेवं तथा मृत्युञ्जयं जपम् ॥
कुर्यात्सर्वप्रयत्नेन शिवतन्त्रानुसारतः ।
दानानि पूर्वमुक्तानि दद्यात्श्रेयसे शिवे ॥

मधुरान्नप्रदानेन ब्राह्मणांस्तोषयेत्प्रभुः।
गोभूहिरण्यदानेन शिवं संतोषयेच्छिवे॥
लक्षं रुद्रजपाच्चैव रुद्रसूक्ताभिषेकतः।
शिवागमविधानेन शिवं सन्तोषयेत्प्रभुः॥
शिवप्रसादाच्छान्तिः स्यात्तथा ब्राह्मणभोजनात्।
रथभङ्गोत्थितोत्पातो वदामि गिरिजे शृणु॥
सुवर्णेन रथं कृत्वा रत्नमण्टपमण्डितम्।
छत्रध्वजपताकैश्च सर्वतोलंकृतं शुभम्॥
उमामहेशं संपूज्य रथमध्ये शिवप्रदम्।
दद्याद्वित्तानुसारेण ब्राह्मणाय सुशीलिने॥
अशुभं हरमेवेत्त शुभं मे सर्वदा ~~शिव~~ दिश।
सुवर्णरथदानेन श्रेयः सम्यक्प्रयच्छ मे॥
५४१ अनेन ममुना दानं दद्याद्राजा गुणान्वितः।
तस्माद्दानेन होमेन शिवलिङ्गार्चनेन च॥
तुष्टा तं शमयेद्राजा प्रजाश्च परिपालयेत्।

इति श्री किरणतन्त्रे रथाक्षभङ्गशान्तिविधिः॥

—*—

शृणु देवि प्रवक्ष्यामि रथस्थस्य महेशितुः।
दर्शनादर्चनाद्वापि फलं वक्ष्यामि तेऽधुना॥
ये पश्यन्ति रथारूढमुमया सहितं शिवम्
ते सर्वे पापनिर्मुक्ताः शिवसायुज्यमाप्नुयुः।
पदे पदेऽश्वमेधस्य फलं तेषां न संशयः।
रथस्थं ये न पश्यन्ति ते यान्ति नरकं ध्रुवम्॥
रथमारोपयेच्छम्भुं ब्राह्मणैर्मूर्तिपैः सह।

पूजयेद्गन्धपुष्पादिधूपदीपादिमङ्गलैः।
राजमन्त्रिमुखाः सर्वे शंभुं स्यन्दनसंस्थितम्।
कुर्वन्तु सेवां भक्त्या ते प्रदक्षिणपुरस्सरम्।
दर्शयेयुर्हेमफलैः भवपाशविमुक्तये॥
स्तोत्रमन्त्रैः पठित्वा तु नमेयुः सिद्धिकाङ्क्षिणः।
प्रसन्नः शंकरो भूत्वा तेभ्यो दास्यति संपदः॥
तस्मात्सर्वप्रयत्नेन सेवनीयो महेश्वरः।
शंकरो यो महेशः स्यात्पूजाकरणकौतुकः॥
संपूज्य हेमवस्त्राद्यैः भक्त्याचरणैः शुभैः।
तद्धेमफलरत्नानि दर्शनार्थं महेशितुः॥
समागतानि हे देवि गृह्णीयात्तानि वै गुरुः।
पूजयित्वा रथसुरान् तर्पयित्वाथ तद्गणान्॥
48b रथरज्जुं समादाय राजा मन्त्री द्विजादिभिः।
नीत्वा रथं शनैर्देवि वेदमङ्गलनिस्वनैः।
नृत्तगीतादिभिः कुर्यादुत्सवं कारयेत्सुधीः।

इति वातुले रथदर्शनादिफलस्वर्णादिविभागः॥

—x—

रथारोहणवेलायां भक्तेभ्यः शृणु पार्वति।
रथोपयोगतं द्रव्यं स्वर्णं वा रत्नमेव वा॥
फलं वा पुष्पमेवापि देशिकाय प्रदास्यते।
इति वातुले।
रथोपयोगतं स्वर्णं धनादीन्यौष्यमेव च।
फलं वा पुष्पमेवापि रत्नपट्टावलिं गृह॥
कञ्चुकं च सुवासं च देशिकाय प्रदास्यते।

इति रौरवसंहितायाम्॥
येनागमेन चारब्धं कर्षणाद्यर्चनादिकम्।
तेन सर्वं तु कर्तव्यं न कुर्यादागमान्यतः॥
येनागमानि कर्माणि प्रारब्धानि महेश्वरि।
तेनागमेन कुर्वीत ह्यन्यथा निष्फलं भवेत्॥
आचार्यमन्त्रभेदेन तन्त्रसंकर उच्यते।
तन्त्रसंकरदोषेण राजा राष्ट्रं विनश्यति॥
कर्मभेदं प्रमादेन सप्तभेदादिकं प्रिये।
आचार्यभेदे कृते यत्र नारकीं गतिमाप्नुयात्॥
इति वातुले॥ // आचार्यादिसंकरगाकु॥
चातुर्मास्यादिके चैव तथा गङ्गादिदर्शने।
महातीर्थाभिगमने प्रायश्चित्तादिकेषु च॥
महादाने तथा काले पुरुषे दुष्प्रतिग्रहे।
दीक्षापूर्णाभिषेके च गुरूणां च विपर्यये॥
अहर्निशा तथा वार नक्षत्रा योगसंभवः।
५१२ महापातादिके चैव नास्ति दोषं विपर्यये॥
Sand संध्यायां च तथा रात्रौ न दोषः क्षौरकर्मणि।
यदा मुहूर्तकालोऽस्ति तदा क्षौरं समाचरेत्॥
कृत्वा पञ्चविधं स्नानं मृत्तिकागोमयादिभिः।
मन्त्रस्नानं प्रकुर्वीत इष्टमन्त्रानुरूपितः॥
क्षीरं संशोध्य मूलेन तथा प्रक्षालिते शुभे।
वाससी परिधायाथ मन्त्रे शुद्धे विशेषतः॥
ततो यागगृहं यायात् शुद्धगोमयचर्चितम्।
पञ्चवर्णरजाद्यैश्च चित्रितं मणिभूषितम्॥

कल्पयेन्मण्टपं तत्र चतुर्द्वारं समेखलम्।
वेदिकायूपसंयुक्तं रत्नतोरणसंयुतम्॥
तत्रादौ प्रथमेशानि ऋत्विग्भिः सह देशिकः।
ब्रह्मचर्यरतो भूत्वा देवताध्यानतत्परः॥
संकल्पकल्पनं कुर्यात्कर्म दर्शेन पार्वति।
गणेशपूजनं कुर्यात्स्वस्तिवाचनपूर्वकम्॥
ब्रह्मचर्यरतो मन्त्री नियतात्मा जितेन्द्रियः॥ श्री॥
देवताप्रार्थनादींश्च कृत्वा गच्छेन्नदीतटे।
सङ्कल्पविधिवत्तत्र क्षुरदाक्षालनं चरेत्॥
इन्द्रादिलोकपालांश्च स्मृत्वा क्षौरं समाचरेत्।
सर्वमन्त्रपुरश्चर्यप्रारम्भसमयेषु च॥
यज्ञदीक्षादिसमये माता मि[पि]त्रोर्मृतेहनि।
राज्ञां पट्टाभिषेके च दर्शे सूर्यविधुग्रहे॥
महानाम्न्यादिके चैव व्रते वा शास्त्रसंग्रहे।
चातुर्मास्यादिके चैव तथा गङ्गादिदर्शने॥
५१८ महातीर्थाभिगमने प्रायश्चित्तादिकेषु।
महादाने तथा काले पूर्वे दुष्प्रतिग्रहे।
दीक्षापूर्णाभिषेके च गुरूणां च विपर्यये।
अहर्निशं तथा वारे नक्षत्रायोगसंभवः॥
महापातादिके चैव नास्ति दोषस्य कल्पनम्।
शत्रूणां विजये वादे गुरोराज्ञाप्रलापने॥
नात्र संशयलेशोऽपि राज्ञो चेत्क्षौरकर्मणि।
नृपाज्ञया ब्राह्मणसम्मते न
विवाहकाले मृतसूतके च।

कन्धस्य मोक्षे कृतदीक्षयं च
अहर्निशा शौरं न दोषवर्ज्यम्॥
इति मूलागमसारे॥ २२॥ //

शैवं चतुर्विधं ज्ञेयं समुदायेन षण्मुख।
शुद्धं मिश्रं च मार्गं च वीरं चेति महामते॥
तत्रादौ संप्रवक्ष्यामि शुद्धशैवस्य लक्षणम्।
मन्त्रतन्त्रक्रियामुद्रान्यासावाहनकारिणी॥
उपचारैर्बहुविधैः लिङ्गं सिंहासने यजेत्।
शुद्धशैवमिति प्रोक्तं मिश्रं शैवमतः शृणु॥
शैवं च वैष्णवं शाक्तं कौमारं गाणपत्यकम्।
शैवं च सिद्धदैवत्ये पूजापञ्चमतं चरेत्॥
मिश्रशैवमिति प्रोक्तं मार्गशैवमतः शृणु।
लिङ्गमन्त्रोपदेशश्च करपीठार्चनं जपः॥
सल्लिङ्गधारणं तत्र लोकाचारप्रवर्तनम्।
50c कुलाचारप्रवृत्तिः स्यात्संसारी चाभिमानवः॥
तथा सन्ध्यावसाने च वीरशैवमतः शृणु।
तद्भेदेनोच्यते विद्याच्छिवजीवैक्यबोधिका॥
तस्यां रमन्ति ये शैवा वीरशैवास्तु ते मताः।
लोकाचारं परित्यज्य कुलाचारविवर्जितः॥
सर्वमन्त्रं परित्यज्य शिवमन्त्रं जपेत्सदा।
नचारो वैदिकाचारो वर्णाश्रमविवर्जितः॥
सल्लिङ्गधारणं तत्र भविभक्तविभेदतः।
माहेश्वरेषु संसर्गी वीरशैवः प्रकीर्तितः॥
इति वातुले चतुर्विधशैवभेदः॥

उत्सवं च कृतं देव चित्रालंकारलक्षणम् ।
तद्विधानं क्रमेणैव वद शम्भो दयानिधे ॥

ईश्वरः —

तत्क्रमं च प्रवक्ष्येऽहं शृणुष्व कमलानने ।
स्वर्णजं रजतं शस्तं सर्वराज्यप्रदं शिवे ॥
क्षौमजं कौशवृद्धिं च त्रिविधं समुदीरितम् ।
नित्यकाम्योत्सवे देवि अलंकुर्यात्सुभक्तितः ॥
शिवादिसप्तदेवानां स्वर्णजं रजतं शुभम् ।
नैमित्तिकोत्सवे शस्तं क्षौमजं चेश्वरादिनाम् ॥
शीर्षार्यं भावयेद्भक्त्या कुर्यात्कौकुकबन्धवत् ।
काम्योत्सवे च वा कुर्यान्नित्ये क्षौममयं नम ॥
क्षौमजं यदि मोहात्तु चित्रालंकारमद्रिजे ।
50 नित्योत्सवे च देवस्य नालं कुर्यात्कदाचन ॥
तयोर्लक्षणमीशानि दशाङ्गुलसुविस्तरम् ।
नानाङ्गुलप्रभेदेन विंशत्यङ्गुलमुन्नतम् ॥
अर्धचन्द्रसमाकारं मध्ये द्वारसमन्वितम् ।
पञ्चविंशत्स्वर्णवर्णं पुष्पे मालाकारेण संयुतम् ॥
द्वारमध्ये कोषफलं केतकीं परितः शिवे ।
अन्यैर्विचित्ररत्नाद्यैः कल्पयेज्जूपल्लिकादिभिः ॥
तन्नेम्यां वलयाकारस्वर्णसूत्रेण बन्धयेत् ।
न्यसेत्तस्योपरि शिवे दृढं कीर्तिमुखाकृतिम् ।
स्वर्णकुम्भसमायुक्तं छत्रं जालिकया युतम् ।
सुवृत्तं कल्पयेत्तत्र शिखाग्रे सुमनोहरम् ॥
शिल्पिना कारयेत्सम्यक्परितस्तस्य पुत्थलीन् ।

एतल्लक्षणमित्युक्तं तदङ्गजनमिष्यते।
कौमजेन विशेषोस्ति किञ्चिदस्य नगात्मजे॥
विस्तारं षोडशाङ्गुल्यमुन्नतिं विंशतं परम्।
द्वाराकृतिं विना देवि शेषं पूर्वोक्तवच्छुभम्।
व्याळवद्दलयं कुर्याद्विंशत्पट्टिकया युतम्।
तद्बहिर्नेमिपार्श्वे तु देहत्सम्बन्धमीश्वरि॥
एतल्लक्षणसंयुक्तं चित्रालंकारमीरितम्।
यो भक्त्या कारयेद्राजा सोपि मत्प्राप्नुयाद्ध्रुवम्॥
चित्रालङ्कारमित्युक्तं शृणु यानस्य लक्षणम्॥ श्रीः॥
इति श्री चन्द्रज्ञाने चित्रालंकारलक्षणविधिः॥

—*—

51a रङ्गपूजा प्रकर्तव्या रात्रौ शृणु विशेषतः।
तद्विधिं तत्फलं देवि प्रवक्ष्यामि यथातथम्।
तद्विधिर्द्विविधः प्रोक्तो नित्यनैमित्तिकादिके।
लिङ्गद्वारादिदण्डान्तं विंशत्योर्ध्वं शतं पृथक्॥
चतुर्नवतिकारूपं चतुःषष्टिकलात्मकम्।
उपहारमितं देवि त्रिविधं चोत्तमे विधौ॥
तथादि द्वारपालान्तं षट्त्रिंशत्तत्त्वरूपकम्।
पञ्चविंशतितत्त्वं वा षोडशं वोपहारकम्॥
त्रिविधं चाधमे देवि द्विविधं चेति कीर्तितम्।
पृथक्पृथक्चण्डिकादि देवतास्तत्र देशिकः॥
यावत्संख्योपहारोपि द्विधायास्तैः ताः समर्चयेत्।
विविधैश्चोपचारैस्तु देवताहर्षसिद्धये॥
इति ज्ञानार्णवे दुर्गारङ्गपूजाविधिः॥

—*—

लक्षणं चोपहारस्य शृणु देवि यथाक्रमम्।
देवस्याभिमुखे मुक्ती फलकं सुमनोहरम्॥
विन्यसेत्प्रोक्षयेत्तत्र वस्त्रमाच्छादयेत्ततः।
दीपाधारादि दण्डानि निपधारायुतानि च॥
विन्यस्य फलकस्यास्य तत्पार्श्वे चोभयोर्न्यसेत्।
पृथक्पृथक्च पात्राणि सलिलानि प्रपूरयेत्॥
51-6 प्रस्थं चैकं तदर्धं वा शुद्धान्नं घृतसंयुतम्।
कुकुन्दवटकापूपैर्गुडकं कन्दपिष्टकैः॥
खण्डैश्च नारिकेराणां कदलीपूगपर्णकैः।
जपाकुमुकपुष्पाद्यैः संयुक्तं चान्यभूषणैः॥
उच्चैर्मण्डपं तत्र सर्वलक्षणसंयुतम्।
एतल्लक्षणसंयुक्तमुपहारं गुरुत्तमः॥
समर्पयेच्चण्डिकादि देवतानां त्वमादिकम्।
एवं क्रमेण यः कुर्याद्रङ्गपूजां तवालये॥
इहलोके सुखी भूत्वा चान्ते तव पुरं वसेत्।

इति रुद्रयामले रङ्गपूजाविधिः॥

—x—

शृणु देवि परं गुह्यं प्रायश्चित्तमनन्तरम्।
नित्यनैमित्यकाम्यार्चमर्चने रङ्गपूजने॥
अस्थाने मण्टपेच्छायां तथा दीपोत्सवे शिवे।
उत्सवे चान्यमङ्गल्ये पार्श्वस्थे यदि चानयोः।
दीपस्तम्भे चोर्ध्वमालादीपैर्वाधारादिपात्रकम्।
आधारे दीपपङ्क्तेश्च दीपस्तम्भाग्रसंस्थितः॥
एकादिवार्तिको कस्मादार्तिकाभ्रमणे यदि।

काले देवस्य चैतानि पतने भञ्जने सति।
नाशने चैकदीपं वा दीपजालानि वा यदि॥
चण्डवाय्वादिघाते च जातेष्वेवं महेश्वरि।
52a तत्क्षणे त्रिशतं मूलं जपेत्तद्दोषशान्तये॥
ततः कुर्याच्छेषकर्म पूर्वोक्तविधिना गुरुः।
तदन्ते तत्परे वापि दिने शान्तिं विधानतः॥
कुर्याद्विप्रवरैः सार्धं देशिकः शुद्धमानसः।
पुरा गणपतिं पूज्य गन्धपुष्पादिकैः क्रमात्॥
नान्दीमुखं च पुण्याहं कृत्वा सम्यग्गुरूत्तमः।
ततोऽग्निजननं कुर्यादग्निकार्योक्तवर्त्मना॥
पञ्चाशतं जुहुयान्मन्त्री पश्चान्मूलेन होमयेत्।
हविराज्यादिकैर्मन्त्री दशद्रव्यैः पृथक्पृथक्॥
ततः पूर्णाहुतिं हुत्वा अष्टाविंशद्घटान्गुरुः।
पूजितान्सिञ्चयेत्तांश्च मम मूर्ध्नि यथाक्रमम्॥
गोभूम्यादिप्रभेदेन दानानि विविधानि च।
कृशान्धबधिरेभ्यश्च दद्याद्विप्रेभ्य एव च॥
पूर्वोक्तांस्तांश्च देवेशि भोजयेद्विविधैः क्रमात्।
भक्ष्यभोज्यादिकै रम्यैस्तद्दोषोपनताप्तये॥
एवं कृते महादेवि तद्दोषं नश्यति ध्रुवम्॥ श्रीः॥

इति श्रीचिन्त्यागमे दीपाधारश्रीराजनादिपतननाशन-
प्रायश्चित्तविधिः॥

—x—

शृणु वक्ष्ये सुतश्रेष्ठ यद्गुह्यं रथकर्मणि। [Repeated in the original itself]
रथारोहणवेलायां श्रीः [incomplete]

रथारोहक्रमः प्रोक्तः तत्र दोषस्तु कथ्यते।
द्विजेतरे रथारोहे रथशुद्धिस्तु निष्फला॥
526 राजा दुःस्थितिमाप्नोति ग्रामे नाशमवाप्नुयात्
तस्माज्ज्ञात्वा चमूनाथ प्रमादाच्च द्विजेतरान्॥
नारोपयेद्रथं वत्स रथमारोपिते यदि।
रथशुद्धिं पुनः कुर्यात्सर्वलोकसमृद्धये॥
शृणु वक्ष्ये सुनश्रेष्ठ यद्गुह्यं रथकर्मणि।
रथारोपणवेलायां प्रासादे प्राङ्गणे च वा॥
प्राकारे मण्डपे वत्स परिवारालये यदि।
शिखरे यत्र कुत्रापि दहिते [ध्वे च] चलिते सति॥
स्फुटिते कम्पिते भग्ने पतिते मूलबेपि वा।
राज्ञो राष्ट्रस्य भङ्गत्वं परराजभयं भवेत्॥
दुर्भिक्षमग्निबाधा स्याच्चास्मिन्देशे न संशयः।
तस्मात्तदा प्रकर्तव्यं शान्तिकर्म विचक्षणः [णैः]॥
आदौ नान्दीं च पुण्याहं पुनः सद्योऽङ्कुरार्पणम्
तिलायुतमघोरेण तत्तन्मूलायुताहुतिम्॥
जुहुयान्मान्त्रिको भक्त्या जपपारायणादिकैः।
दुर्दानानि महादानं दत्त्वा विप्रांश्च भोजयेत्॥
रथं नयेत्ततो भक्त्या सर्वभक्तजनैः सह।
देवमन्तः प्रवि[वे]श्याथ रथकर्म समापयेत्॥
सान्निध्यार्थं चतुर्थ्यर्थं ततो मन्त्री विधानतः।
स्नपयेत्कुम्भसाहस्रैः तदर्धार्धैस्तथापि वा॥
यजेत्तं बहुधा देवं सर्वसंपत्सुखाय च।
द्विजेभ्यो दक्षिणां दद्यात्तद्दोषविनिवृत्तये।

53a रथोत्सवे कृते येन यदि शान्तिं विना कृतम्।
दुर्भिक्षं वर्धते लोके राजा राष्ट्रं विनश्यति॥
सम्यग्दोषाननुकृत्वा शान्तिकर्म तदाचरेत्।
ततो रथं नयेद्विद्वान् सर्ववाद्यरवैः सह॥

इति श्रीवृद्धमनुवे रथारोहणकाले प्रायश्चित्तम्॥

—x—

[कौस्तुभ मुद्रणद यम्बद - कन्नड]

गे. [हे?] हुळी स्पर्शनेनैव देवलत्वं प्रपद्यते॥
तस्मात्सर्वप्रयत्नेन गेहुळीं न स्पृशेद्बुधः।
यो मूढबुद्ध्या यद्द्रव्यं गन्धपुष्पफलादिकम्॥
गेहुळीस्पर्शनं कुर्यात्तन्निर्माल्यं प्रचक्षते।
इत्य[न]निले॥

करौ संपुटवत्कृत्वा संस्थाप्य हृदयस्थले।
पदे पदान्तरं गच्छेत् मृदुगत्या प्रदक्षिणम्॥
स्तोत्रध्यानसमायुक्तो बाह्यप्राकारके शुभे।
अथवान्तर्वृतौ कुर्यात् तदन्ते च न कारयेत्॥
यदि मोहात्तु कुर्वीत मूलधाम-समीपके।
अन्तर्वीथौ मण्टपे च नारकीं गतिमाप्नुयात्॥
तस्माद्बहिर्बहिः कुर्यात् प्रदक्षिणनतिं बुधः।

इति प्रदक्षिणनमस्कारविधिः॥

—x—

चण्डेशयोग्यनिर्माल्यं भक्षणात्पतितो नरः।
नारी च पतिता भूयः प्रायश्चित्तं न विद्यते।
शूद्रसंपर्कसंयुक्ता मद्यपा बलिभोजिनी।

भवे
भर्तृहन्त्री च या नारी सा भूयात्पतिता हि वै।
ब
बल्यन्नभक्षणा नारी विधवा सधवापि वा।
53-6 रुद्रस्य दासी सा भूयात्प्रायश्चित्तं न कारयेत्।
बल्यन्नं वर्जनीयं स्यान्मद्यपास्तं न भक्षयेत्॥
प्रायश्चित्तं न कुर्वीत कारयेद्यदि मोहतः।
भूतोच्छिष्टं च यस्यान्नं तस्यान्नं भुञ्जते नरः॥
प्रायश्चित्तं न कर्तव्यं मर्त्यस्तु पतितो भवेत्।

इति तन्त्रसारे बल्यन्नभक्षणवर्ज्यविधिः

वक्ष्ये रथस्यादिमध्ये देशिकादिसहोतॄणाम्।
सूतके मृतजातादि यदि प्राप्ते शिखिध्वज॥
होतॄणां सूत्रमध्ये तु सूतकं तु समाचरेत्।

(इति वातुले सूतकनिर्णयः॥)

सूत्रान्ते देशिकः कुर्यात्सूतकं तन्न संशयः।
सदस्यस्तु समायोज्य शेषं सूतकमाचरेत्।

शि?
अथ वक्ष्ये विधिं स्कन्द देवानां खिखरस्य तु।
पञ्चमूर्तिं चाष्टमूर्तिं रुद्रमेकादश स्मृताः॥
पूर्वादिक्रमतः कुर्याद्द्वादशादित्यमूर्तिकाः।
विघ्नेशं दक्षिणामूर्तिं शास्तारं क्षेत्रपालकम्।
पूर्वादीनां दिशां देवास्तत्रदायतनादिषु।
अष्टविघ्नेश्वराः प्रोक्ताः कर्तव्या शिल्पिवित्तमः॥
तताच्छिन्नमार्गेण प्रासादशिखरादिषु।
शैवे च वैष्णवे चैव सौरे शाक्ते स्कन्दे द्विभैरवे॥

मूर्तिन्यासं हरिहरे कुर्यात्स्थाप्यो कलशार्णैः।
दिक्षु प्रदिक्षु लिङ्गानि नाभामूर्त्यादिशक्तिभिः॥
इन्द्रादिभिस्तदस्त्रैर्युर्वेष्टितं शिखरं हि तत्।
54a षट्त्रिंशतन्त्रो वल्लभिः पञ्चविंशतिभिर्गृहे॥
अष्टादशभिरुक्तं स्यात् श्रेष्ठं तच्छीर्षकं मतम्।
विंशद्भिः?
तथैव पञ्च शिवभिरेकादशभिरेव तत्।
मध्यमं शीर्षं प्रोक्तमधोक्तमधमं गृहे।
पञ्चत्रिकलशानेकान् कलशं शिखरे न्यसेत्॥
एवं ते शिखराकृतिं पञ्चमूर्तिस्वरूपिणी।
त्रिपङ्क्तिरूपिणी शुद्धे ब्रह्माविष्णुशिवात्मकाम्॥
एकं परशिवाकारं कलशे विग्रहरूपकम्।
शिखरं लिङ्गरूपं स्यात्कलशस्तत्प्रकाशकः।
सर्वदेवादिमूर्तीनां सप्तप्राकारपूर्वकम्।
पञ्चप्राकारकं वास्तु चैकप्राकारसंयुतम्॥
एवं ज्ञात्वा विधानेन कुर्याल्लक्षणपूर्वकम्।
देवतासन्निधिस्तत्र भवत्येव न संशयः॥

इति श्रीवातुले प्रतिष्ठातन्त्रे उपरिभागे शिखरलक्षण
विधिः षट्पञ्चाशत्पटलः॥ श्रीः॥

शिवाय नमः॥

शृणु देवि प्रवक्ष्यामि संक्षेपेण विधिक्रमात्।
पूजालोपे निमित्तानां राजचोराद्युपद्रवैः॥
दुर्भिक्षमारीसंतापाः पूजान्यूनं भवेद्यदि।
चण्डालाद्यैर्मद्यपैश्च प्रविष्टे देवमन्दिरे॥
श्वानोष्ट्रखरकोलाद्यैः प्रविष्टे देवमन्दिरे।

काकोलूकादिपक्षीणां नीडे स्याच्चेत्प्रसूतिके।
वल्मीकमधुकोत्पत्तिः जायते देवतालये॥
रक्तमांसरजूष्ट्वा(?) प्रविष्टे देवमन्दिरे।
दम्भोलिपतनाच्चैव अन्यप्राणिप्रवेशने।
एवमादिषु दोषेषु महाद्भुतकदर्शने।
546 नानातन्त्रोक्तदोषेषु प्रायश्चित्तं तु कारयेत्॥
संप्रोक्षणे चाष्टबन्धे यज्ञे चापि रथोत्सवे।
पञ्चपर्वोत्सवे श्राद्धे मन्त्राणां ग्रहणे तथा॥
इत्यादिकर्मदीक्षासु अङ्कुरार्पणमाचरेत्।
प्रायश्चित्तविधौ कर्म संप्रवक्ष्ये यथा क्रमात्॥
सुदिने सुमुहूर्ते तु प्रायश्चित्तं यथाविधि।
एकाहे त्रियहे वापि न ध्वजं च नचाङ्कुरम्॥
सद्योङ्कुरं तु कुर्वीत एकाये त्रियहेऽपि वा।
पूजा जपश्च होमश्च बलिमुत्सवमेव च॥
ब्राह्मणैस्तर्पणं कुर्यात्स्तोत्रपाठमिति क्रमात्।
वेदपारायणं चैव नानामन्त्रं जपांस्तथा॥
शैवांश्च वैष्णवान्ब्राह्मान् सौरान्वैनायकानपि।
एते मन्त्रान्प्रजप्तव्याः प्रायश्चित्तस्य कर्मणि॥
स्थाने दुष्टे स्थानशुद्धिं बिम्बशुद्धिं च कारयेत्।
बिम्बे दुष्टे तु लिङ्गस्य शङ्क्या शुद्धिर्भविष्यति॥
एतत्स्थलं दोषदुष्टं तत्रस्थं मृत्तिकां त्यजेत्।
तटाकनद्यारामादि मृत्तिकाभिः प्रपूर्य च॥
सुभूष्य चालयं सम्यक् गागामे तोरणादिभिः।
आदौ गजाननं पूज्य मूलबिम्बं सशक्तिकम्॥

प्रार्थयेन्मनसा देवं सर्वदोषापनुत्तये।
देवदेव जगन्नाथ देवानां भद्रदायक॥
55a प्रायश्चित्तक्रियायां तु अविघ्नं कुरु मे प्रभो।
इति विज्ञाप्य पूर्वोक्तं पुण्याहं वाचयेत्ततः॥
आचार्यं वरयेदादौ ब्राह्मणां ऋत्विजांस्तथा।
वेदपारायणांश्चान्यान् नानामन्त्रजपे सुधीः॥
देवेशस्याभिषेकार्थं ब्राह्मणान्वरयेदथ।
आचार्यः प्राञ्जलिर्भूत्वा ब्राह्मणान्प्रार्थयेत्ततः॥
भवन्तो भूसुराः सर्वे तर्पणं तद्यथाक्रमम्।
यथा देवः प्रसन्नः स्यात्तथा मह्यं प्रसीदथ॥
ततो देवस्य पूजायां विधानं वक्ष्यतेऽधुना।
पञ्चामृतैः पञ्चगव्यैः पञ्चवृक्षोदकानपि॥
पञ्चरत्नोदकैश्चैव नानागन्धोदकैस्तथा।
स्वर्णोदकैः क्षीरजलैः अभिषेकाः प्रकीर्तिताः॥
शतरुद्रोदकैश्चैव शतकुम्भोदकैरपि।
ततो वस्त्रमलंकार स्वर्णरत्नाद्यलंकृतम्॥
सुगन्धमक्षतं पुष्पं धूपदीपं निवेद्यकम्।
निरीक्षमन्त्रराशिं च दीपजालसमन्वितम्॥
नानाफलानि धान्यानि गोनिरीक्षां च कारयेत्।
बलिं च सेवकांश्चैव तीर्थत्रय समन्वितम्॥
हवनस्य विधानान्ते वक्ष्ये तत्समासतः।
पलाशोदुम्बराप्लक्ष अपामार्गाश्च बिल्वजान्॥
55b अघोरास्त्रेण होतव्यं दधिक्षीरकमाज्यकम्।
दूर्वाश्च वक्त्रमन्त्रेण तथैव त्र्यम्बकेण च॥

उदुम्बरं च वक्त्रेण वामेन च घृतं हुनेत्।
चरुं सदूर्वां वक्त्रेण मन्त्रेणैव हुनेदथ॥
गव्याज्येनैव चरुणा जुहुयान्मूलमन्त्रतः।
साहस्रं च तदर्धं वा शतमष्टोत्तरं तु वा॥
मृत्युंजयेन मन्त्रेण सहस्राहुतिमाचरेत्।
सद्योजातादिभिर्मन्त्रैः तथा प्रासादमन्त्रतः॥
होमशेषं समाप्याथ ब्राह्मणान्भोजयेत्ततः।
महाशान्तिजपं कृत्वा पुरुषसूक्तजपं तथा॥
दक्षिणाभिश्च तोष्याथ भूसुरान्दण्डवन्नमेत्।
वस्त्रार्पणं ततः कृत्वा आभिर्गीर्भिरुदीरयेत्॥
आशीर्वादं समादाय विप्राणां वन्दनादिना।
धनदो विघ्नरहितः विहरेत्तु यथासुखम्।
गोभूहिरण्यवस्त्राद्यैः राचार्यं परिपूजयेत्॥ श्रीः॥

इति श्रीसूक्ष्मतन्त्रे स्थानबिम्बदोषप्रायश्चित्त-
पटलः॥

गर्भगेहशिरः प्रोक्तं शुकनासशिरं तथा।
मध्यरङ्गं तथानाभिश्चन्द्रालयकटिं तथा॥
महामण्टपजानु स्यात् गोपुरस्य च पादयोः।
देवागारस्य पञ्चाङ्गं वक्ष्यामि शृणु षण्मुख॥
महापीठं ध्वजं कुम्भं शक्तिं वाहनमेव च।
56a पञ्चाङ्गरहितं देवं पूजायां निष्फलं भवेत्॥ श्रीः।
इति वातुले॥
शिलाबिम्बं च लिङ्गं च भिन्नं चेद्भुवि निक्षिपेत्।

दारुमूर्तिं विभिन्नं तु तद्वद्दहयेत्सुधीः।
पञ्चलोहादिमूर्तीनां भिन्ने सन्धानमुत्तमम्॥
सान्निध्यं यत्र वर्तेत भिन्नाङ्गं न परित्यजेत्।
स्फुटिते चाङ्गहीने च तद्बिम्बं च परित्यजेत्॥
इति वातुले।

कम्बुः कम्बुशिलामयाहि महती ग्रासः समुन्नाफलं
पार्श्वं तत्कन्द तु कमिकितः श्वेताष्टबन्धो मतः।
वस्त्रस्यन्तु शारस्त्राति त्रिगमनैर्भागैः स्वतुल्यैर्यथा-
योग्यं श्वेततिलोद्भवेन पिपितं बन्धोपनिष्ठार्थकृत्॥ १॥
जीर्णेऽष्टबन्धे सकलागमेषु बन्धोयमिष्टार्थ करोमि कार्यः।
तवाग्निरीय प्रतिमादिलिङ्गप्रधान देवादिषु नार्चनं स्यात्॥ २॥
शिवसूत्रं कृष्णसूत्रमष्टबन्धं शिवालयम्।
पीठलिङ्गादिभिन्नं चोक्षिप्र तत्पूर्व ~~कारयेत्~~ मान्चरेत्॥ ३।
इति वातुले॥ श्रीः॥ शुभमस्तु॥
शैववैष्णव सौर्गाक्ति गाणपत्यादिसंभवैः।
मन्त्रैर्विशुद्धचित्तश्चेत् स मे प्रियतमो भवेत्॥
षड्दर्शनानि मेऽङ्गानि पदौ कुक्षि करौ शिरः।
56-b तेषु भेदं हि यः कुर्यात् मदङ्गच्छेदको हि सः॥
शैववैष्णवसौर्यादि दर्शनान्यपि भक्तितः।
भजन्ते मानवा नित्यं समभावेन कोविदाः॥
जानाति मतमाहात्म्यं मद्भक्ता एव नापरे।
चकोरा एव जानन्ति नान्ये चन्द्रकलां रुचिम्।

इदु षड्दर्शनभेद माडलागदु एम्बुव वचन। [कन्नड]
शुभमस्तु॥ गङ्गाधर नमस्तुभ्यं नमस्ते वृषभध्वज।

शिवलिङ्ग प्रतिष्ठार्थं संक्षेपेण वद प्रभो ॥ १ ॥
शृणु स्कन्द प्रवक्ष्यामि लिङ्गस्थापनमुत्तमम् ।
सिद्धक्षेत्रे महानद्यां पर्वते वनगह्वरे ॥
प्रतिष्ठितं चिरान्नष्टं प्रम प्रतितमेव वा ।
आनयेत्स्थापनार्थाय लिङ्गं लक्षणं च वर्तुलम् ॥
स्थापयेत्तत्र चागारे प्रासादाग्रं न शोधयेत् ।
आधारे शक्तिपीठे च ?
नवीकरण पक्षे तु प्रासादाग्रं विचारयेत् ।
कर्तुश्चन्द्रानुकूले हि गुरुशुक्रास्त वर्जिते ॥
वास्तुं संपूज्य विधिवत्कृत्वा होमं बलिं हरेत् ।
आधारशक्तिपीठे च न्यस्त्वा होमं समाचरेत् ॥
संस्थाप्य कूर्मपीठं च प्रार्थयेदिति मन्त्रतः ॥
[जलान्तं वा शिलान्तं वा भूमिं खात्वा विशोधयेत्]
नमस्ते कूर्मरूपाय विष्णवे विश्वधारिणे ।
करिष्यमाणं प्रासादनिर्मितं स्थानुमर्हसि ।
अनन्ताकारपीठं च दिग्गजान्दिक्षु (विन्यस) कुम्भसेत् ॥
पद्माकारं न्यसेत्पीठं पञ्चधा परिकीर्तितम् ।
पातालादिकमारभ्य न्यसेत्सप्त शिलास्ततः ॥
पद्मयोरन्तरे चैव कुहनाळं प्रकल्पयेत् ।
५१a स्वर्णेन रजतेनापि नाळं ताम्रेण वा भवेत् ॥
नाळोर्ध्वं पद्मपीठं च ततः पीठं त्रयात्मकम् ।
नवाष्टसप्तहस्तोच्च लिङ्गं तन्मध्यमं त्रिधा ॥
त्रिद्व्येकहस्तमानं यल्लिङ्गं स्यादधमं त्रिधा ।
एवं नवविधं लिङ्गमुत्तमादि विभेदतः ॥

ब्रह्मविष्णुकपर्दीशैश्चतुरश्राष्ट वर्तुलैः।
पीठत्रयं भारयित्वा पञ्चसूत्रसमन्वितम्॥
लिङ्गं पीठं तथा नालं लिङ्गाग्रं पादमेव च।
लिङ्गाग्रमुखपर्यन्तं पञ्चसूत्रमुदाहृतम्॥
लिङ्गलक्षणमित्युक्तं गर्भलक्षणमुच्यते।
पीठं तु नवधा भज्य उत्तमं गर्भविस्तरम्॥
पीठस्य पञ्चगुणितं मध्यमं गर्भलक्षणम्।
पीठस्य त्रिगुणं गर्भ मधमं परिकीर्तितम्॥
एवं च त्रिविधं गर्भ गर्भार्धं तु तदन्तरम्।
द्वारद्वयसमायुक्तं नवत्सार्ध्यं च मण्टपम्।
चतुर्द्वारसमायुक्तं षोडशस्तम्भसंयुतम्।
दर्पणोदरसंकाशं नानामूर्तिसमन्वितम्॥
रङ्गमण्टपमित्युक्तं गर्भार्धं वाहनालयम्।
द्वादशस्तम्भसंयुक्तं चतुस्तम्भमथापि वा॥
चतुर्दिक्षु चतुर्द्वारं पञ्चान्तरसमन्वितम्।
तदूर्ध्वे गोपुराकारं तदग्रे कलशान्न्यसेत्॥
57/6 स्थापयेच्च महानन्दिं फालनेत्रसमायुतम्।
गर्भस्य त्रिगुणं कुर्यात् प्राकारं परिकीर्तितः॥
प्राकाराग्रेऽन्यसेद्द्वारं गेहे? द्वारादिकं स्मृतम्।
गर्भस्य पञ्चगुणितं बहिः प्राकारविस्तरम्॥
पुरद्वारादिकं कुर्यात् बहिर्द्वारं विचक्षणः।
गेहार्धं शिखरं न्यस्य तदग्रे कलशं न्यसेत्॥
तन्मितं सार्धहस्तं स्यात्स्वर्णरौप्यादिभेदतः।
पूर्वे तु वृषभं प्रोक्तं आग्नेय्यां षण्मुखस्तथा।

दक्षिणे गणनाथश्च वीरभद्रस्तु नैर्ऋते।
पश्चिमे विष्णुमूर्तिश्च वायुपुत्रं च वायवे।
उत्तरे पार्वती स्थाप्य ईशान्यां भैरवस्तथा।
एवं शिवालयं प्रोक्तस्तद्विधिं शृणु सुव्रत॥
उत्तरे त्वयने काले चन्द्रतारानुकूलके।
माघादि पञ्चमासेषु तु शुक्लपक्षे सुनिर्मले।
कृष्णेपि दशमीं यावत् तदूर्ध्वं वर्जयेद्बुध।
देवागे शांकरे वापि मण्टपं कारयेद्गुरुः।
उत्तमादिविभेदेन त्रिंशद्धस्तेन मण्टपम्।
पञ्चविंशत्करं वापि विंशद्धस्तमथापि वा।
ततोन्तरदशायामं त्रयोदशमथा दश॥
नवहस्तप्रमाणं वा सप्तहस्तं तु वा भवेत्।
पञ्चहस्तमितं वापि मण्टपं नवधा स्मृतम्।
58a स्तम्भाः षोडश षट्त्रिंशच्चतुःषष्टि यथाक्रमम्।
त्रिभागं मण्टपं कृत्वा मध्यभागे तु वेदिका॥
द्विभागं मध्यवेदी च स्नपनार्थं च मण्टपम्।
रत्निमात्रं तदुत्सेधं तथा कुण्डस्य मण्टपम्॥
एककुण्डं त्रिधा कुण्डं च पञ्चकुण्डं तथैव च।
सप्तकुण्डं च षड्वक्रा नवकुण्डं प्रशस्यते॥
शैवाद्युत्सवभेदेन एककुण्डादि कारयेत्।
वेदिका पश्चिमे देशे कुण्डं च चतुरश्रकम्।
एककुण्डविधिः प्रोक्तः त्रिकुण्डं च ततः शृणु।
वेदिकापुरतो भागे चतुरश्रं प्रकल्पयेत्।
वृत्तद्वयं प्रकर्तव्यं वेदिकादक्षिणोत्तरे॥

त्रिकुण्डं चैव संप्रोक्तं पञ्चकुण्डं तथैव च।
चतुरश्रं चतुर्दिक्षु योनिनाभिसमन्वितम्।
वरुणानिलयोर्वृत्तं पञ्चकुण्डं प्रकीर्तितम्।
सप्तकुण्डं तथा वास चतुरश्रं चतुर्दिशि॥
इन्द्र ईशानयोर्मध्ये सुवृत्तं कुण्डमेव च।
हुताशनेन्द्रयोश्चैकं वृत्तकुण्डं चमूपते॥
चतुरश्रं प्रधानाख्ये वरुणानिलमध्यगे।
एवं कुण्डं च सप्ताख्ये नवकुण्डं ततः शृणु॥
वेदिबाह्ये च विधिवत्प्रागादि परिकल्पयेत्।
चतुरश्रं योनिमर्धचन्द्रं त्र्यश्रं सुवर्तुलम्॥
586 षडश्रं पङ्कजाकारमष्टाश्रं तत्तदाख्यया।
आचार्यकुण्डं मध्ये स्या गौरीपति महेन्द्रयोः॥
कुण्डं च पञ्चधा प्रोक्तं चोत्सवं पञ्चधा स्मृत।
शैवं गौणं भौतिकं च भौवनं दैविकं स्मृतम्॥
एवं पञ्चविधं प्रोक्तमुत्सवं परिकीर्तितम्।
आदौ गणाधिपं पूज्य पुण्याहं वाचयेत्ततः॥
लिङ्गस्य ग्रहणं पश्चात् शिल्पिहस्ताद्विचक्षणः।
तथासौ सुजले लिङ्गं शाययेद्विधिवत्पुनः॥
त्रिरात्रं पञ्चरात्रं वा जले चैकाधिवस्य च।
तद्दिने प्रातरुत्थाय नित्यं निर्वर्त्य मन्त्रवित्॥
क्षौरकर्म द्विजैः सार्धं कृत्वा सुस्नानमाचरेत्।
गणेशमर्च्य नान्दीं च पुण्याहं वाचयेद्गुरुः॥
वरयेद्गुरून्सौम्यान् तन्त्रज्ञान्वेदपारगान्।
मन्त्रक्रियासुकुशलान् दरिद्रांश्च अमायुतान्।

मधुपर्कं दत्तो दत्त्वा वस्त्रहेमादिभूषणैः।
आचार्यं प्रार्थयेत्कर्ता पश्चाद्गेहं परिगृहेत्।
शिल्पिं सन्तोष्य तद्गेहं शिल्पिहस्तात्प्रभूत्तमः॥
प्रार्थ्य संगृह्य विधिवत्तोषयेत्तं विचक्षणः॥
शिल्पिभिर्निर्मितं गेहं दृढं सौम्यं त्वया कृतम्।
देहि मे शिल्पिराजेन्द्र स्थापनार्थं शिवस्य च॥
त्वया संस्थापितं पुण्यं दशांशं देहि मे विभो।
तद्गृहीत्वा मुदा गेहं प्रदास्यामि नरोत्तम॥
59a शंभोः संस्थापितं पुण्यं न दास्यापि कदाचन॥
त्वयेप्सितं धनं रत्नं गृहाणालयकारक।
मया कृतमिदं गेहं दृढं सौम्यं शिलामयम्॥
गृहाणाहं प्रदास्यामि प्रतिष्ठार्थं शिवस्य च।
इत्युक्त्वा कारकौ भक्त्या दद्याद्गेहं प्रहर्षितः॥
तद्गेहं च स्मासूक्तैः शैवमन्त्रैः यथाविधि।
गृहीत्वा चैव तद्गेहं स्वदेहार्चिं [र्पिं?] तत्फलम्॥
अङ्गुलीयादिवस्त्राणि मकुटं सर्वभूषणम्।
दत्त्वा तस्मै देशिकाय सुस्नात्वा मङ्गलस्वनैः॥
देशिकानुज्ञया सार्धं भूसुरैः स्वस्तिवाचनैः।
सदाशिवोदितैस्तन्त्रैः शुद्धिसाधनसंहितैः॥
गेहं संशोध्य संपूज्य वक्ष्यमाणविधानतः।
गेहपूजां प्रवक्ष्यामि स्थापितं परमेश्वरम्।
देशकालौ विचार्याथो पुनः पीठार्चनं गुरुः।
जया माया समा सौम्या पुष्कला मङ्गलप्रदा।
श्रीप्रदा भोगदा विश्वा गेहस्य नव शक्तयः॥

आवाह्य पूजयेद्भक्त्या अङ्गावरणपूर्वकम्।
पञ्चोपचारैरभ्यर्च्य बलिं दद्यात्समन्ततः॥
मृदं संगृह्य विधिवद्रोपयेद्धान्यांस्ततः।
शोधयेन्मण्डपं रात्रौ पूजयेत्कलशान्न्यसेत्।
बीजं निर्वापयेत्पश्चात् वस्त्रमाच्छादयेद्गुरुः।
54b होमयेच्छान्तुरात्रौ च बलिं वास्तोः समाचरेत्॥
पुनर्द्वारेशयोर्नेत्रमुन्मील्य मनुवित्तमः।
तौ च संपूज्य तन्मन्त्रैः भूपीठं विन्यसेत्तदा॥
नवरत्नानि विन्यस्य तदधो नवि[व] दिक्षु च।
पुनः पीठद्वयं स्थाप्य पूजयेत्पीठमन्त्रतः॥
निधिकुम्भं चेष्टकारभ्य शिलां संस्थापयेत्तदा।
होमयेज्जलसामीप्ये वारुणस्य तु मन्त्रतः॥
जलाधिवासितं लिङ्गं तत्तीरे विन्यसेत्पुनः।
उद्धृत्यामलकीपिष्टैः रुद्रसूक्तेन तत्परम्॥
सिञ्चेत्तं बहुभिः कुम्भैः वेदमङ्गलनिस्वनैः।
पूज्य पञ्चोपचाराद्यैः भूसुरैः सह देशिकः॥
लिङ्गमानीय शेडुस्य विन्यसेच्छांकरे दिशि।
धान्यराशौ निगूह्याथ तस्य गायत्र्या हुनेत्॥
सिञ्चेत्तं नवभिः कुम्भैः उपचारैश्च पञ्चभिः।
इष्ट्वा तं तण्डुले पश्चात् तन्मूलेन निगूहयेत्॥
मुहूर्तान्तं न्यसेत्तस्मिन्न घटैश्च नवभिः पुनः।
तं सिञ्चेद्रुद्रसूक्तेन तेन मन्त्रेण होमयेत्।
गन्धपुष्पादिभिश्चेष्ट्वा निवेद्य फलेषु च।
तन्निवेश्याथ मूलेन प्रतिक्रान्तं मनूत्तमः॥

तेन हुत्वा ततो मन्त्री पूजयित्वा प्रसूनतः।
परिकार्ध्य न्यसेत्तेषु पञ्चभिस्तं घटैस्ततः॥
60a संसिच्य पावमानेन हुनेत्तेनैव मन्त्रतः।
पूजयित्वाथ तल्लिङ्गं पुष्पराशौ निगूह्य च॥
आयने तेति मन्त्रेण हुनेदष्टोत्तरं शतम्।
विन्यसेच्च त्रिमुहूर्तान्ते पुनश्च नवभिर्घटैः॥
स्नाप्य संपूज्य सद्भक्त्या पावमानेन देशिकः।
शय्यां विन्यस्य पर्यङ्के श्रीसूक्तेन ततो गुरुः॥
शय्यायां शाययेल्लिङ्गं याममात्रं मूलमन्त्रतः।
तेन हुत्वाथ संसिञ्चेदष्टोत्तरशतैर्घटैः॥
दृष्ट्वा तं बुद्ध्या लिङ्गं ततः प्रातः समुत्थितः।
स्नात्वा नित्यं निवर्त्याथो गुरुश्चेष्ट्वा गणाधिपम्॥
पुण्याहं वाचयेद्भक्त्या होमयेच्छक्तितश्च कम्।
सुमुहूर्ते च संप्राप्ते स्वस्तिवाक्यैः प्रभूतमैः॥
वेदघोषैः शङ्खवैः भेरीकाहलनिःस्वनैः।
सर्ववाद्यरवैः सार्धं भूसुरैः सह देशिकः॥
गृहीत्वा चैव तल्लिङ्गं स्वस्तिवाचकपूर्वकम्।
गेहं प्रदक्षिणीकृत्य लिङ्गमन्तः प्रवेश्य च॥
तत्र देवात्मकं यन्त्रे पीठमाले च विन्यसेत्।
लिङ्गं पीठे प्रतिष्ठाप्य ध्रुवाद्यौरिति मन्त्रतः।
लिङ्गमूलस्य परितो पीठमाले च सुव्रत।
60b बन्धेन बन्धयेद्भक्त्या दृढेन मूलतः॥
लिङ्गं पीठं च वस्त्राभ्यां वेष्टयेद्दर्भमालया।
वस्त्रेणाच्छाद्य तद्द्वारं वस्त्रमन्त्रेण तत्परम्॥

वृषयागं ततः कृत्वा ध्वजं संस्थाप्य बुद्धिमान्।
शिखयागो यजेत्कुम्भं वेदमङ्गलनिस्वनैः॥
द्वार दिगेन वदितो परिवारान्यसेत्क्रमात्।
लिङ्गाग्रे वृषभं पश्चात् स्थापयेद्देशिकोत्तमः॥
निशि स्नार्थं चतुर्थे हि त्रिदिने द्विदिनेऽपि वा।
सद्यो वाथ प्रकुर्वीत विधिवद्गुरुसत्तमः॥
निशीथादिनसंप्राप्ते तदन्ते स्नपयेद्गुरुः।
लिङ्गस्य सन्निधानार्थं सहस्रं स्नपयेद्घटैः॥
शिवाग्निं जनयेत्पश्चात् कुण्डे चैव प्रधानके।
तदग्निं सर्वकुण्डेषु निधायाग्निमुखं चरेत्॥
देशिको मूर्तिपैः सार्धं होमकर्म समाचरेत्।
पञ्चाक्षरेण मन्त्रेण मूलमन्त्रेण वा पुनः॥
अष्टोत्तरशतं चादौ घृतेन जुहुयुर्द्विजाः।
द्रव्यं मन्त्रं प्रवक्ष्यामि विशेषेण यथाक्रमम्॥
समिधः सद्यमन्त्रेण मूलेनाज्यं तु होमयेत्।
अघोरेण चरुं हुत्वा लाजास्तत्पुरुषेण तु।
61a हृन्मन्त्रेण च सिद्धार्थान् यवं नेत्रेण होमयेत्।
तिलं वामेन हुत्वा तु शालीमीशानमन्त्रतः।
सक्तुं कवचमन्त्रेण दशान्ते [णैः] न पुनर्घृतम्।
तारपूर्वं च जुहुयुः अष्टोत्तरशताहुतिम्॥
तदर्धं वाथ तस्यार्धं जुहुयाच्च पृथक्पृथक्।
घृतेनाष्टाहुतिं हुत्वा पुनः पूर्णाहुतिं सुत॥
शैवादि दैविकानां च दिनभेदादिकं सुत।
होमं च शान्तिसंहं च प्रायश्चित्तं तथैव च।

कुण्डाधिवासहोमादि नवकलशसंयुतम्।
दिनसंख्याक्रमेणैवं कृत्वा होमं जपादिकम्॥
वेदपारायणं दिक्षु विदिक्षु चतुरस्त्रकम्।
मण्टपे गेहपरितो जपेयुर्ब्राह्मणोत्तमाः॥
गेहाग्नेय्यां सूक्तजालं ग्रहमन्त्रांश्च दक्षिणे।
रक्षामन्त्रांश्च नैर्ऋत्यां पञ्चगुर्वादितः परम्॥
वारुण्यामथ वायव्यां सोमे चैवाथ शाम्भवे।
मन्त्रन्यासं तत्त्वसंज्ञं वेद वो(पा)न्तयैव च॥
एवं क्रमेण परितो मन्त्रान्प्रतिदिनं पुनः।
उत्सवं कारयेद्भक्त्या पुष्पकादिरथं स्तुत॥
ब्राह्मणान्भोजयेद्भक्त्या चूर्णोत्सवमतः परम्।
तीर्थस्नानादिकं कृत्वा कुण्डहोमं समापयेत्॥
61b आचार्यं पूजयेद्भक्त्या धनधान्यैः प्रभूतमैः।
शय्यावस्त्रन छत्राद्यैः तोषयेच्छिवतृप्तये॥
सूत्रपानस्तथा व्यूह कलशान्मण्टपादिकान्।
गां महीं दक्षिणावत्सं आचार्याय निवेदयेत्।
ब्राह्मणं ऋत्विजश्चैव जपकर्तॄंस्तथैव च।
घोषकांश्च तथा भक्त्या दक्षिणाभिश्च तोषयेत्॥
प्रतिष्ठा शिवलिङ्गस्य मयेत्युक्त्वा चमूपते।
सर्वपापहरा दिव्या ज्वरापस्मारनाशिनी॥
अनन्त ब्रह्महत्यादिपातकादि विनिर्दहेत्।
सर्वयज्ञफलं पुण्यं सर्वदानफलं लभेत्॥
गोदानानियुतं चैव कन्यादानायुतं फलम्।
प्रयुतं गजदानं च हयदानायुतं फलम्॥

लभते विविधान्भोगानैहिके च न संशयः।
अन्ते विमानमारुह्य दिव्यस्त्रीशतसंयुतम्॥
शिवभक्तैः परिवृतो गच्छेत्कैलासमन्दिरम्।
तत्र भुक्त्वाऽखिलान्भोगान् अन्ते सायुज्यमाप्नुयात्॥
मन्त्रहीने गुरुं हन्ति क्रियालोपे तु कारकम्।
द्रव्यलोपे तु कर्तारं न प्रतिष्ठासमो रिपुः॥
तस्माज्ज्ञात्वाथ षड्वक्त्र प्रतिष्ठां विधिनाचरेत्।

इति श्रीवृद्धमतङ्गे शिवस्कन्दसंवादे लिङ्गप्रतिविधि-
एकोनविंशतिः पटलः॥

—×—

[ई पटलवन्नु यादिगू तोरिसलागदु। संदेहवेड।]

शुभमस्तु। शिवाय नमः॥

—×—

62a कीर्त्याख्यासुरवक्त्रस्य रूपं सर्वहितौकसमम्।
आलये च तदङ्गादौ योजयेत्कर्मसाक्षिणे॥
कर्मपूर्णकलावाप्त्यै शैवे तद्धस्तसंयुतम्।
हस्तयुक्तवशाच्छम्भोर्नैवेद्यं वर्जयेद्बुधः॥
कीर्त्याख्यो हस्तयुक्तश्चेच्छिवनिर्माल्यमश्नुते।
चण्डेश्वरेण सहितस्तस्मात्तं वर्जयेत्सदा॥
विना तत्कीर्तिहस्तेन चण्डनाथेन च प्रभोः।
नैवेद्यं सर्वपापघ्नं भुञ्जतां विप्रपुङ्गवैः।
कीर्तिवक्त्रयुतानां च विष्ण्वादीनां स्वनैवेद्यम्॥
विधिर्हस्तविहीनस्य त्वचण्डीमान्न युज्यते।
इति मातङ्गपारमेश्वरे॥

श्री:॥ वक्ष्ये ध्वजारोहणाख्ये काले दोषं फलं क्रमात्।
पूर्वाह्णे तु ध्वजारोहे राष्ट्राधिपविवर्धनम्।
मध्याह्ने तु ध्वजारोहे वर्षधान्यविवर्धनम्।
अपराह्णे ध्वजारोहे स्थानकर्ता विनश्यति॥
सन्ध्याकाले ध्वजारोहे पूजकानां विनश्यति।
मध्यरात्रौ ध्वजारोहे स्थानग्रामादिनाशनम्॥
चरराशौ ध्वजारोहे स्थाननाशनमेव च।
62b स्थिरराशौ ध्वजारोहे राजा राष्ट्रविवर्धनम्॥
उभयराशौ ध्वजारोहे स्थाननाशनमेव च।
मध्याह्ने सर्वरात्रान्ते ध्वजमारोपयेत्ततः॥

इति बिम्बे ध्वजारोहणकालः॥

देवारोपितवेलायां शिबिकापतने सति।
नृपस्य मरणं शीघ्रं तदङ्गेषु वा भवेद्ध्रुवम्॥
तद्दोषशान्त्यै विधिवत् पूर्वोक्तार्धं वरानने।
प्रायश्चित्तं प्रकुर्वीत नृपः शीघ्रेण बुद्धिमान्॥
तदङ्गं वा तथोपाङ्गं फलकं तत्र योजितम्।
पट्टिका चोपपट्टी वा पादमाधारदण्डकम्॥
वलयं बद्धरज्जुर्वा दण्डमध्यप्रलम्बितम्।
गुच्छञ्च चतुरश्रस्य झल्ली वा किङ्किणी वृतिः॥
उपधानं च शय्या वा दण्डाग्रमकरास्यकम्।
तत्तिरस्करणी वस्त्रं चोर्ध्वाच्छादिकाता चित्रकर्तिका॥
एवमादीनि वस्तूनि भिन्ने वा पतिते यदा।
यथा दोषं च ज्ञात्वा तथा शीघ्रेण बुद्धिमान्॥

पूर्वप्रोक्तदशांशं तु प्रायश्चित्तं समाचरेत्।

इति वातुले शिबिकापतनप्रायश्चित्तम्।

—x—

अथातः संप्रवक्ष्यामि प्रायश्चित्तं महत्तरम्।
रथोत्सवादिमध्यान्ते तथा नैमित्तिकोत्सवे।
काम्यादिकोत्सवे नित्ये सर्वमङ्गल्यकोत्सवे।
632 गमनागमने काले पुरवीथ्यां शिवस्य तु॥
एकस्मात्पतिते भूमौ वातिवृष्टिजलादयः।
तेन पृष्ठे ध्वजाग्रस्य वृषभस्य परं शिवे॥
तथेन्द्रादिपताग्र्येवं स्खलिते निर्मलीकृते।
उत्सवार्थं दीपवृक्षं तथा वाहनकादिकम्।
विद्युज्ज्वालानिलोद्भूते तेन पाते जलेन ते॥
एवमद्भुतमुत्पाते राजा भङ्गत्वमाप्नुयात्।
चतुरङ्गबलं हन्ति पुत्रपौत्रादिनाशनम्।
तस्मात्तद्दोषशान्त्यर्थं प्रायश्चित्तं तु कारयेत्।
गणेशार्चनपूर्वं हि नान्दीपुण्याहवाचनम्।
पञ्चविंशतिकुम्भांश्च पूजयेन्मूलमन्त्रतः।
तेन मन्त्रेण होतव्यं तथा वृषभमन्त्रतः॥
तथेन्द्राध्वजनामन्त्री दशाङ्गैर्हुनेद्गुरुः।
सहस्रं वा तदर्धं वा अष्टोत्तरशतं तु वा॥
जपपारायणं कुर्यात्तत्संख्यं ब्राह्मणोत्तमैः।
पूर्वोक्तकलशैर्देवं पञ्चाभिः सेचयेत्ततः॥
पूर्वोक्तदोषयुक्तेन पटयानादिके गुरुः।
दोषैः संस्नापयेद्यत्र दोषं तत्र यथा क्रमम्॥

दद्याद्दानानि बहुधा भोजयेद्ब्राह्मणांस्ततः।
एवं कृतेऽत्र देवेशि तद्दोषं नश्यति ध्रुवम्।
ततः पूर्वोक्तविधिना कर्मशेषं समाचरेत्।
63b उत्सवे त्वालयं शीघ्रं गच्छेन्मूलाणुना जपेत्।
देवमन्त्रः प्रविश्याथ प्रायश्चित्तं ततश्चरेत्।

इति वातुले प्रायश्चित्तखण्डे ध्वजपतनप्रायश्चित्तविधिः॥

—x—

वृषस्य रोपणे काले तच्छिरो यदि लभ्यते।
दक्षिणं चोत्तरं देवि दिशं च विदिशं तथा॥
तदा राज्यादिके देवि दुर्भिक्षं जायते ध्रुवम्।
तस्माद्विचार्य मनसा गुरुस्तान्परिवर्जयेत्॥
पूर्वसंस्थशिरः कुर्यात् तथा प्रत्यक्शिरः क्रमात्।
अनेन प्राप्नुयाद्देवि राज्यकोशधनं फलम्।
दैवादुदग्दक्षिणं च प्राप्ते तत्र विधानतः।
शान्तिहोमं च कलशान् हुत्वा देवं समर्चयेत्॥

इति वातुले ध्वजपट चित्र निम्न फलशान्तिः॥

—x—

विश्वेदेवस्तथा वसुसंज्ञकोऽथ मरुद्गणः।
देवानामादिभूतत्वात्तस्मात्तौ पूर्वमर्चयेत्॥
गन्धाद्यैः स्वस्वमनुना विप्रयोर्दापयेत्सुधीः।
भुक्तवत्सु सताम्बूलं ताभ्यां दक्षिणया सह॥
नान्दीमित्येव संवाच्य पुण्याहं विधिनाचरेत्।
समस्तस्य च वस्तूनां शुद्ध्यर्थं सर्वकर्मणि॥
शालामथो घटेऽभ्यर्च्य तज्जलैः प्रोक्षयेद्गुरुः।

तत्र तत्र विशुद्ध्यर्थं लिङ्गबिम्बादिके तथा।
इत्यंशुमते पुण्याहविधिः।

*

64a नित्यहोमं तदङ्गं च प्रायश्चित्तं सस्रुक्समकम्।
स्थण्डिले चुल्लिकायां वा हुनेदुक्तविधानतः॥
विरिञ्चिपक्षपरिधिप्रणीताभिर्विना तथा।
जयादिकं विना मन्त्री लौकिकाग्नौ विशेषतः॥
इति मातङ्गपरमेश्वरे॥ (चुल्लियन्दरे बले)

*

अथातः संप्रवक्ष्यामि प्रायश्चित्तं यथोदितम्।
बल्युत्सवादिकाले वा तथा नित्यं बलौ यदि॥
अन्यमङ्गल्यकाले वा सर्वमासे महोत्सवे।
भग्ने च पतिते भक्ते वाहकेन प्रमादतः॥
तथा तेन विनाशं च याने वा शिबिकादि वा।
तद्दिशाभिमुखो भूत्वा कलशान्पञ्चविंशतीन्॥
अङ्गन्यासादिकं कृत्वा पूजां बिम्बादिकानपि।
संस्नाप्य कलशान्पूज्य सहस्रं व्योममन्त्रकम्॥
सहस्रं जपमासाद्य होमयेच्छतमष्टकम्।
पुनर्देवं समायोज्य देवेशं निजमूर्तिकौ॥
अभिषिच्याथ कलशान् प्रतिमामेधिरोपयेत्।
उत्सवं शेषकर्माणि कुर्याद्देवस्य भक्तितः॥
स्नपनं मूलबिम्बस्य कुर्यात्संपूजयेत्ततः।
इति कारणे यानशिबिकापतनप्रायश्चित्तविधिः॥

*

प्रासादानां ततः प्रोक्तं मण्टपानां ततः शृणु।
आस्थानमण्टपे देवि यदि भूमौ निपातिते॥
भग्ने भिन्ने खण्डिते च दग्धे वा स्फुटिते सति।
राजा राष्ट्रसुखं हन्ति भूताबाधा भविष्यति॥
64-b तद्दोषशमनार्थाय प्रायश्चित्तं शृणु प्रिये।
आदौ नान्दीं च पुण्याहं विघ्नेशार्चनपूर्वकम्॥
अष्टोत्तरशतैः कुम्भैः पूजयेत्स्नपयेद्गुरुः।
अघोरेणायुतं होमं मूलमन्त्रेण होमयेत्॥
तत्त्वहोमं दिशाहोमं प्रायश्चित्तं तु शान्तिकम्।
यथापूर्वोक्तमार्गेण मण्टपं कारयेद्गुरुः॥
दानं च दशधा दद्या ब्राह्मणान्भोजयेद्गुरून्।
शान्तिकर्म मयेत्युक्तं राजाराष्ट्रसुखावहम्॥
मण्टपानां ततः प्रोक्तं गोपुराणां —— शृणु प्रिये

इति कारणे आस्थानमण्टपपतनादि प्रायश्चित्तविधिः॥

*

स्वस्ति मङ्गलवाद्यैश्च देवीमारोपयेद्रथम्।
रथमध्ये तु विन्यस्य देवीं सावरणां यजेत्॥
तामभ्यर्च्य रथस्याथ प्रदक्षिणनमस्क्रियाम्।
कृत्वा रत्नसुवर्णानि रथोपरि विकीर्य च॥
नयेद्रुस्सुपदं मन्त्री तत्काले तद्रथं गुरुः।
भुक्तान्ते सूर्यसन्तापे शान्ततां गमिते सति॥
सर्वभक्तजनैः सार्धं ध्रुववस्त्रविभूषणैः।
जनकोलाहलैः पश्चाद्देव्या रतकं विलासतः॥
ग्रामान्तं नगरान्तं वा रथं नीत्वोत्सवं चरेत्।

अनुव्रजन्ति ये मर्त्यास्तदा देवीं पदे पदे।
हयमेध सहस्राणि लभन्ते नात्र संशयः॥

इति श्रीप्रागमे देवीरथोत्सवपटले उत्तमम्।

—x—

साधकस्य कुलजातिमन्त्रविद्रोम बिम्बयजनं सुशोभनम्।
65a अन्यपूजनम दीक्षितैः क्रमात्कर्तृभृत्यनृपराष्ट्रनाशनम्॥
आचार्यलक्षणं पूर्वं तद्विधानमथोच्यते।
स्थापने प्रोक्षणे दीक्षे स्नपने चार्चने तथा॥
आचार्य लक्षणे हीने तत्कर्मासुरमुच्यते।
सर्वलक्षणसंपन्नमादिशैवकुलोद्भवम्॥
वेदशास्त्रार्थतत्वज्ञं सदाचारं सुशान्तकम्।
दीक्षाभिषेकसंपन्नं सदाकरणकोविदम्॥
यः षोडशाब्दादूर्ध्वमधः सप्ततिवत्सरात्।
सर्वानयैव (ले) संपन्नं साग्निकं काहवादिकम्॥
एवंलक्षणसंपन्नमाचार्यं वरयेत्ततः॥ श्रीः॥
द्विपुणा संगृहीतं च लिङ्गं वा प्रतिमादिकम्।
तद्दोषनाशो नृपतिः शत्रुभिः परिपीड्यते॥
सर्वयत्नेन सासाय चनैव स्थापनाय च।
लब्धं च लिङ्गबेरादीन् गृहदेशे निधायच॥
लिङ्गे [ङ्गा] द्यारक्रदोषस्य शान्त्यर्थं घोरमन्त्रतः।
सहस्रं होमयेदाज्यतिलाभ्यां चरुणा शतम्॥
मध्यत्रयेण संयुक्तं सहस्रं पूर्णाहुतीः।
कृत्वा तु लिङ्गबेरादीन् स्थापयेत्पूर्वभूतले।
लक्षणोद्धरणं चाक्षि मोचनं जलवेशनम्॥

विहायान्यत्प्रकर्तव्यं स्थापकैस्तत्र दर्शिभिः।
अलब्ध्वं लिङ्गबेराद्यं प्रयत्नात्स्थापयेन्नवम्॥
मासादर्वाक्तदूर्ध्वं वा यावन्मासत्रयावधि।
656 प्रत्यहं शान्तिहोमं च कर्तव्यं स्थापनान्तिकम्॥
तदूर्ध्वं स्थापनं बाणलिङ्गाद्यैश्चात्र चोदितम्।
तस्मात्सर्वप्रयत्नेन मासत्रितयमध्यमे॥
संस्थाप्य बाणलिङ्गाद्यं बाणस्थापनवर्त्मना।
(गृ) कैर्गृहीकृतञ्चोराद्यैः लिङ्गं कीदृशं तु तत्।
प्रतिमा मुखलिङ्गं वा बाणलिङ्गादिके तु वा।
प्रत्यहं चैवमन्वेष्य स्थितमन्यत्र चेद्धृतम्।
तथा युद्धेन जित्वा वा नित्यं दत्त्वाथवादरात्।
लब्ध्वा तु लिङ्गबेराद्यं स्वस्थाने स्थापयेद्भृशम्॥
संवत्सरत्रयादर्वाक् संलब्धं तु प्रयत्नतः।
संवत्सरत्रयादूर्ध्वमलब्धं चेन्मुनीश्वराः॥
मूलस्थाने यथापूर्वं तद्द्रव्यैस्तत्प्रमाणतः।
संस्थाप्य मूललिङ्गाद्यमर्चयेदर्चनोक्तवत्॥
अज्ञातं पूर्वमानं चेदायतिर्वा गुरूत्तमैः।
तत्प्रासादानुरूपेण यजमानानुरूपतः॥
लिङ्गमापाद्य विधिना स्थापयेदुक्तवर्त्मना।
बाणलिङ्गं तु वा तत्र स्थापयेत्सर्वसिद्धये॥
बेरं वा पीठिकां वापि मानेनानेन कारयेत्।
देवीं विहाय देवो वा देवी वा केवला यदा॥
शत्रुभिः संगृहीतं चेत्स्थितस्यैवानुरूपतः।
तदेवान्यतरं तस्य प्रतिष्ठां च समाचरेत्॥

कल्याणं कारयेदन्ते विधिना देशिकोत्तमः।
देशे संस्थाप्य विधिना पूजयेन्नित्यमादरात्॥
इति सिद्धान्तरत्नावल्यां चौरापहृतप्रायश्चित्तविधिः[illegible]

—×—

मध्ये मध्याह्नतः पूर्वं मुहूर्तात्तु दशात्परम्।
ग्राह्यं न देतहृद्धीया नत्र कुर्यात्तथोत्सवम्॥

— ॥ —

66a स्वस्ति॥ शुभमस्तु॥
अथातः संप्रवक्ष्यामि नवभेरीक्रमं शृणु।
भेकारो भीतिनाशाय रीकारो ऋद्ध्यावाहनम्॥
अक्षरद्वयसंयुक्तं भेरीरित्यभिधीयते।
त्रिहस्तायामदीर्घा स्याच्चतुर्हस्तेन विस्तृतम्॥
वक्त्रद्वयं च वलयौ ताम्रकांस्येन वा कृतः।
भेर्या च जयघण्टा च कांस्यपात्रं च योजयेत्॥
चर्मणा माहिषेणापि कृतसंस्कारकेण च।
वक्त्रयुग्मं तथाच्छाद्य बन्धयेच्चर्मतन्तुना॥
नवसप्तादिकीलेषु यन्त्ररज्ज्वा च बन्धयेत्।
सुमुहूर्ते सुनक्षत्रे सुमासे च सुलग्नके॥
देवमुद्दिश्य देवाग्रे स्थण्डिलं विलिखेद्बुधः।
द्रोणमानमितं शालिं तदर्धं द्रोणं च तण्डुलम्॥
तस्मिन्संपूर्य संपूज्य कूर्चं न्यस्त्वा तदन्ततः।
मूलमन्त्रेण तां भेरीं स्पृष्ट्वा संप्रोक्षयेज्जलैः॥
तैलमालेप्य तां भक्त्या नववस्त्रेण वेष्टयेत्।
विनायकं यजेदादौ नान्दीपुण्याहवाचनम्॥

भेरीमन्त्रेण होमं च समिदाज्यादिकैर्गुरुः ।
भेरीदक्षिणदेशे च सर्वस्त्रप्रतिमादिभिः ॥
मनकुण्डान्यजेन्मन्त्री सिञ्चेत्पञ्चामृतादिकैः ।
सुधाधारणया लिङ्गं पूजय पूर्वोक्तवत्प्रिये ॥
तत्र शय्योपरि न्यस्त्वा भेरीदेवान्समर्चयेत् ।
666 रुद्रं च मध्यमे पत्रे ब्रह्माणं दक्षिणे तथा ॥
विष्णुं च वामपत्रे तु वलये वामदक्षिणे ।
चन्द्रादित्यौ यजेन्मन्त्री मातॄः कीलेषु सप्तसु ॥
नवैकादशकीलेषु ग्रहान्नु ज्ञान्यथा क्रमम् ।
भेर्यष्टदिक्षु संपूज्य दिगीशाननुक्रमः ॥
वासुकीं चर्मसं[तं] तौ तु प्रहारे चार्चयेद्गुरुम् ।
नैवेद्यान्तं समभ्यर्च्य मूलेन प्रार्थ्य घोषयेत् ॥
नागराज नमस्तुभ्यं देव (देव) संतोषकारक ।
सान्निध्यार्थं सुभिक्षार्थं संध्यां घोषय घोषय ॥
नागाधिप नमस्तुभ्यं त्रिसन्ध्यां देवतालये ।
योजमानं तदर्धान्तं कौशान्तं च प्रबोधय ॥
देवप्रिय नमस्तेऽस्तु दैत्यदुष्टालकप्रभो ।
आलयेऽस्मिन् त्रिसंध्यासु घोषैर्घोषय घोषय ॥
त्रिवारमिति संप्रार्थ्य चैकद्वित्रयमार्गतः ।
ताडयेद्बुधा भक्त्या मूलमन्त्रेण मन्त्रवित् ॥
पश्चाद्युदकमाहूय गन्धमाल्यांश्च दापयेत् ।
कटिवस्त्रं यज्ञसूत्रमुत्तरीयं सुवस्त्रकम् ॥
उष्णीषं तत्र दत्वा तो वेष्ट्या ताडयेत्पुनः ।
पुनर्दानं दशविधं दत्वा विप्रांश्च भोजयेत् ॥

दक्षिणां दापयेत्पश्चाद्देशिकादि यथाक्रमम्।
679 भेरीघोषार्पणं शम्भोः कृत्वा तच्छङ्करे दिशि॥
भेरीं रज्ज्वावलम्ब्यायां ध्वजयष्ट्यान्विता प्रिये।
यावच्चन्द्रश्च सूर्यश्च यावद्देवश्च तिष्ठति॥
तावत्संप्रीतिभावेन सान्निध्यार्थं च घोषय।
तवभेरीताडनोक्तं क्रियते त्वच्यते मया॥
सर्वसंपत्प्रदा देवी सर्वमङ्गलदायका।
सर्वसान्निध्यदा शम्भोः पुत्रपौत्रप्रपौत्रदा॥
सुभिक्षदा शोकहरा सर्वशान्तिप्रदायका।
गणतृप्तिकरा सद्यः सर्वकल्याणकारका॥
फलान्येवं निरीक्षस्व यत्र यत्र सुरालये।
ग्रामे देशे पट्टणे च राजधान्यां च खर्वटे॥
खेटके ग्रामनारे च सर्वमङ्गलसंपदे।
भेरीघोषं सुरश्रेष्ठ श्रावयेयुर्निचक्षणः॥
भेरीशब्दः श्रुते यावद्दिशान्तं च सुरेश्वरि।
तद्दिशान्तं सुभिक्षं च भवत्येव न संशयः॥
भेरीघोषं विना यत्र तत्र दैत्याश्च वृद्धयः।
तस्माद्भेरीक्रमं ज्ञात्वा विधिना ताडयेद्गुरुः।
विधिं विना यदि कृते भेरीघोषे सुरेश्वरि।
दरिद्रं संभवेत्सद्यो लक्ष्मीर्ग्रामाद्बहिर्व्रजेत्॥
तदर्थं विधिना भेरीं घोषं कुर्याद्विचक्षणः।

इत्यादिमहापुराणे सूक्ष्मतन्त्रे शिवपार्वतीसंवादे

विविधवाद्यभेदे कर्मकाण्डे

भेरीताडनविधानकथनं नाम एकाशीतिः पटलः श्रीः

67b अष्टबन्धं तत्र दीक्षां पवित्रं चापवीतकम् ।
संप्रोक्षणं कलां चैव मौढ्यकाले तु वर्जयेत् ।
श्वानं शूद्रं खरं काकं सरटं कुक्कुटं तथा ।
कृमिणो चौर्यिणां च स्पृश्य शोणितं देवतालये ॥
गृहान्तरगते चैव मौढ्यदोषो न विद्यते ॥ श्रीः ॥
तथोपरिस्थिते काले पुरवीथ्यां गते शिवे ।
अर्चयेद्धन्तिनो भक्तैः फलाद्यैश्चैव ताडयेत् ॥
सर्वकर्माणि ये कुर्युः ईर्षका बाधका जनाः ।
सर्वपापैः प्रमुच्यन्ते निर्मोका इव पन्नगाः ॥

[इति रथगमनदळि फलादिगळिन्द इडुवदु]
अर्चिते तु पवित्रस्य छिन्ने भिन्ने यथा यदि ।
अग्निदग्धादिदोषेषु प्रायश्चित्तं समाचरेत् ॥
तत्सूत्रं पूर्ववत्कृत्वा पूर्वोक्ताश्चैव देवताः ।
तत्सूत्रेषु समावाह्य पूजयेद्गन्धपुष्पकैः ॥
स्पृष्ट्वा तु मूलमन्त्रेण पञ्चब्रह्मानुवाककैः ।
अघोरास्त्रेण मन्त्रेण अष्टोत्तरशतं जपेत् ॥
न्यूनमच्छिद्रतां याति नित्यपूजाफलं ततः ।
तत्सूत्रं धारणेनैव शिववन्मोदते भुवि ॥ श्रीः ॥

वैखानसागमे —
स्थिरमूर्तिविभेदे तु पतिते चाग्निदग्धके ।
खण्डिते स्फुटिते चैव छेदिते च विभिन्नके ॥
उत्पाता बहवस्तत्र स्वेदे रुधिरता भवेत् ।
68a शिरश्छेदे विभिन्ने तु राजा राष्ट्रं विनश्यति ।
कण्ठनाशे [ले] विभिन्ने तु राजा दुर्जयमाप्नुयात् ।

हस्तच्छेदे विभिन्ने तु परराष्ट्रभयं भवेत्।
पादच्छेदे विभिन्ने तु व्याधिशोकभयं भवेत्॥
नखे च पतिते भिन्ने दुर्भिक्षं जायते ध्रुवम्।
कटिनाशे विभिन्ने तु ग्रामनाशो भविष्यति॥
नासाक्षिकर्णयोरेव परचक्रापहारकः।
शिरश्छेदे कण्ठनाशे कटिनासाक्षि जानके॥
नवमूर्तिं प्रतिष्ठाप्य स्थिरमूर्तिं विसर्जयेत्।
हस्ताग्रे आयुधादीनां संधानं कारयिष्यति॥
हस्तनाशे नखच्छेदे धातुभिः सन्धिमिच्छति।
ततः शान्तिं प्रकुर्वीत प्रायश्चित्तं विधीयते॥
हस्ताङ्गुलौ च हस्ते च नखरे शोकमाप्नुयात्।
शत्रुभावा राज्यनाशः चोरराजभयं भवेत्॥
तस्मादष्टबन्धेन स्वर्णरौप्यं च बन्धयेत्।
हस्ताङ्गुष्ठाभिमन्त्रेण प्राणमन्त्रेण मान्त्रिकः॥
686 अयुताद्याहुती हुत्वा समिदाज्यादि सर्षपैः।
सहस्रं बिम्बमूलेन संपातं प्रोक्ष्य भक्तितः॥
अष्टयुग्माधिकं बेरं लिङ्गं वा प्रतिमादिकम्।
सेचयेत्कुम्भसाहस्रैः सहस्रार्धशतैस्तु वा॥
दानं दद्याद्विधिं दृष्ट्वा भोजयेद्ब्राह्मणोत्तमान्।

इति श्रीविष्णुतन्त्रे स्थिरमूर्तिभिन्नपतनादि-
दोषप्रायश्चित्तविधिः॥

—×—

पूजाकाल्यां नवा कुर्या द्वात्रौ भूतबलिं हरेत्।
दानं दद्याद्विधिं कुर्या द्देवाग्रे मण्टपेऽपि वा॥

ततः प्रातः समुत्थाय पुण्याहं वाचयेदथ।
पूर्णया शान्तिकं कृत्वा यात्राहोमं समाचरेत्॥
देशिको मूर्तिपैः सार्धं स्थापयेत्कौतुकं त्यजेत्।
पूर्णाहुतिं हुनेत्पश्चात् ध्वजामामवरोहणम्॥
दक्षिणां दापयेत्पश्चात् मूलबिम्बं नियोजयेत्।
ततः प्रातः समुत्थाय प्रायश्चित्तं तु शान्तिकम्॥
मूर्तिं पीठे न्यसेत्स्नानं कुम्भैर्वित्तानुसारतः॥ श्रीः।

इति उत्सवान्ते श्रीबलिक्रियाविधिः॥

*

67a भिन्नमूर्तिं समादाय भूमौ वा सलिलेऽपि वा।
निक्षिप्य मूलमन्त्रेण हुनेत्संहारमार्गतः॥
प्रोक्षणं प्रतिमूर्तीनामथ वक्ष्ये फलं गुह।
देवालयं नवं कुर्याज्जीर्णसंस्थानकं तु वा॥
उद्धरेयः पुमान्वत्स शिवत्वं प्राप्नुयात्परम्।
वापीकूपतटाकं वा लिङ्गं वा मूर्तिमेव वा।
निधीशत्वं च भूलोके प्राप्नुयात्परमं गुह।
इति वातुलतन्त्रे॥

अथ क्रमलक्षणाचरितं जननयनप्रमोदजं भवनम्।
परिगृह्णन्तु यजमानो बहुधनतुष्टेन शिल्पिना दत्तम्॥

— इदं गेहपरिग्रहद श्लोकः॥ —

अतः परं प्रवक्ष्यामि ध्वजं संस्थापयेद्गुह।
उत्सवे स्नपने चैव प्रोक्षणे स्थापने तथा॥
ध्वजं संस्थापयेत्पूर्वमुत्सवं च समाचरेत्।
वृषध्वजं च हीनं स्यान्नोत्सवं तत्र कारयेत्॥

वृषध्वजसमायुक्तमुत्सवं तत्र कारयेत्।
जीर्णे च खण्डिते वापि पतिते भग्न एव वा॥
राजा राष्ट्रभयं तत्र व्याधिशोकभयंकरी।
तस्माद्वृषध्वजं स्थाप्य उत्सवं च यथा भवेत्॥
ब्राह्मणस्य यथा यज्ञसूत्रविच्छेदनं तथा।
तदेव क्रियते यत्नात्तथा क्षिप्रं च कारयेत्॥
तस्मात्तत्रोचिते काले ध्वजं संस्थापयेद्बुधः।
दिने मुहूर्ते कुर्वीत तत्र दोषो न विद्यते॥

*

698 अथ वक्ष्ये विशेषेण नीराजनविधिक्रमम्।
सर्वकृत्रिमनाशार्थं सर्वलोकहितावहम्॥
नित्यं नैमित्तिकं चैव द्विविधं तदुदाहृतम्।
रात्रौ लिङ्गाय तत्काले कर्तव्यं नित्यमुच्यते॥
अन्ये च मङ्गले कार्ये चोत्सवे परिवेषके।
रात्रौ बिम्बाय कर्तव्यं यत्तं नैमित्तिकं स्मृतम्॥
प्रासादस्याग्रतः कुर्यात्स्थण्डिलं चतुरश्रकम्।
संप्रोक्ष्य हृदयेनैव पात्रं तत्रैव विन्यसेत्॥
पूर्वोक्तलक्षणोपेतं पात्रं नीराजनाय च।
संप्रोक्ष्य पुरुषेणैव दीपमारोपयेत्ततः॥
त्रिराधारे शराधारे त्वेकाधारे तथैव च।
कपिलाज्येन दीपं तु कन्यसादिसमायुतम्॥
दीपयेद्धृदयेनैव अग्निबीजेन पूरयेत्।
दर्शयेच्च अमुद्रां च शूलमुद्रां तथैव च।
दीपपात्रं समुद्धृत्य प्रविशेद्गर्भगेहकम्।

पात्राणि शुद्धतोयैश्च संप्रोक्ष्य हृदयेन तु।
विन्यसेन्मण्डले मध्ये पात्रं नीराजनाय च॥
गन्धपात्रं तथाग्नौ तु निर्ऋतावर्घ्यपात्रकम्।
वायव्ये पुष्पपात्रं स्यादीशान्ये भस्मपात्रकम्॥
दीपानारोपयेत्पश्चात् अग्निबीजेन पूरयेत्।
रुद्रस्य गणिकाभिर्वा ब्राह्मणैर्वा विशेषतः॥
१०१ वाहयित्वा तु पात्राणि सर्वातोद्यसमन्वितम्।
स्वस्तिसूक्तसमायुक्तं ततो मङ्गलवाचकैः।
अर्घ्यप्रदक्षिणं कृत्वा प्रविश्यास्थानमण्डपम्।
विज्ञाप्य देवदेवस्य तदग्रेस्य विशेषतः॥
स्थापयेद्दीपपात्रादीन् मण्डलोपरि मन्त्रवित्।
ततः पूर्ववदभ्यर्च्य गन्धपुष्पादिना सह॥
पाद्यमाचमनं दत्वा देवदेवस्य बुद्धिमान्।
गन्धं दद्यात्तु शिरसा चार्घ्यमीशेन दापयेत्॥
पुष्पं तु शिखया दद्यात् धूपं नेत्रेण दापयेत्।
पुनराचमनं दत्वा दिग्बन्धं चास्त्रमन्त्रतः॥
पात्रेण दीपमादाय देवदेवशिरोपरि।
परिभ्राम्य त्रिधा मन्त्री शिखामन्त्रमनुस्मरन्॥
दर्पणं दर्शयेत्पश्चात् छत्रचामरयुक् सुधीः।
ताम्बूलं दापयेत्तस्मै मुखवाससमन्वितम्॥
पीठाग्रे वा जलाग्रे वा दीपं तु परिवर्जयेत्।
दीपाधारं तु ताम्रादि पञ्चत्रीण्येकपात्रकम्॥
अलाभे त्वेकपात्रे वा दीपाधारं तु पञ्चकम्।
इति श्रीकारणे प्रतिष्ठातन्त्रे नीराजनपटलः षट्त्रिंशः॥

70 b अतः परं प्रवक्ष्यामि रथसंग्रहणादिकम् ।
सर्वपापहरं पुण्यं सर्वदुःखनिवारणम् ॥
जयदं भूतिदं चैव सर्वेषां रक्षणार्थकम् ।
अङ्गप्रत्यङ्गसंयुक्तं स्यन्दनं वीक्ष्य दैशिकः ॥
गत्यागतिं ततो ज्ञात्वा स्थिरत्वं चाथ शिल्पिना ।
नष्टाङ्गानि पुनः शोध्य स्थपतिः स्थापकाज्ञया ॥
रथस्थितं तु तत्रैव निवेद्य गुरवे ततः ।
यात्रायोग्यमिदं शम्भो ज्ञात्वा संस्कारमाचरेत् ॥
उपाङ्गान्यस्य चाङ्गानि शोधयेदस्त्रता पुनः ।
मूलेन शिवतीर्थैश्च स्यन्दनं प्रोक्ष्य संस्पृशेत् ॥
रथसंस्कारसंयुक्तं सर्वकामफलप्रदम् ।
अधिदैवं समावाह्य रथस्याङ्गेषु योगतः ॥
चक्रदण्डद्वये माया शक्रेषु शशिभास्करौ ।
आधारशक्तिमाख्याता नन्तश्चैव दण्डमध्यमे ॥
वृषरूपधरो विष्णुर्मध्यदण्डादिपरितः ।
पट्टिका मूलेशानरुद्राः प्रकीर्तिताः ॥
गात्रेषु गात्रकम्भेषु धर्माद्याः श्वेतरादिकाः ।
71 a गात्राङ्गात्रान्तरेष्वपि सत्त्वादिगुणसंयुताः ॥
रथप्रासादके चोर्ध्वे स्तूपिकायां सदाशिवम् ।
स्कन्दो वै दक्षिणामूर्तिर्विष्णुर्ब्रह्मा यथाक्रमात् ॥
पूर्वादिषु चतुर्दिक्षु न्यस्तव्यास्तत्र यत्नतः ।
चतुर्वेदमयाश्चैव वरुणाग्निस्तथानिलः ।
शालव्यादिक्रमेणैवं तन्मुखे जठरेऽश्रिके
अग्रे नागा नियोक्तव्या वेदात्मा धर्मदैवतः ।

ब्रह्मा सारथिरूपेण चाग्रे वा पार्श्वमद्भवेत्।
रथप्रान्तं समाश्रित्य लोकपाला व्यवस्थिता:॥
तदग्रपार्श्वयोश्चैव जया च विजया तथा।
तावे संकल्प्य देवांश्च रथपूजां क्रमाद्यजेत्॥
स्यन्दनं गन्धमाल्यैश्च चित्रमार्गेण भूषितम्।
देवेश प्रार्थयेत्पूज्य रथस्यारोहणं प्रति॥
उत्सवे स्थापने चैव अयने विषुवे तथा।
दिनच्छिद्रे तु संक्रान्तौ त्वमावास्यामथापि वा॥
राज्ञो जन्मदिने वाथ रथमारोपयेत्प्रभुम्।
रथारोहणपूर्वं तु रात्रौ कौतुकबन्धनम्॥
युवं वस्त्रेति मन्त्रेण नववस्त्रं प्रदापयेत्।
उत्तरीयं तथा दत्वा प्रागुक्तविधिना यजेत्॥
अग्निकार्यं ततः कुर्यात् अग्निकार्योक्तमार्गतः।
71-6 आचार्यं पूजयेत्पश्चात् वस्त्रहेमाङ्गुलीयकैः।
योगिनां ध्यानयुक्तानां शिवज्ञानार्थवेदिनाम्।
पूजयित्वा ततो दद्यात् वस्त्रकाञ्चनभूषणम्।
विघ्नेशं विघ्नशान्त्यर्थं गन्धपुष्पादिभिर्यजेत्।
भक्ष्याणि विविधानि स्युः भोज्यानि विविधानि च॥
पात्रेषु विविधा पूर्य गणानां त्वेति मन्त्रतः।
गणेशस्य निवेद्याथ निर्विघ्नं प्रार्थयेत्ततः,
प्रयत्नेन गणेशाज्ञां शिरसा गृह्य देशिकः।
भूषयेद्देवदेवेशं नानाभरणसंयुतम्॥
क्षुद्रिकाभिः समायुक्तं नानापुष्पैरलंकृतम्।
नानागन्धसमायुक्तं पूजयेत्परमेश्वरम्॥

नैवेद्यं दापयेत्पश्चात् ताम्बूलादि प्रदापयेत्।
रौप्यपात्रं समानीय शिवाग्रे स्थण्डिले न्यसेत्।
चन्दनागरुकर्पूरं श्लक्ष्णपिष्टं सकुङ्कुमम्।
केवलं वारिणा योज्य मथित्वा पङ्कमन्वया॥
मल्लिकोत्पलपुष्पाणि जातीपुन्नागचम्पके।
पङ्के निक्षिप्य संपूज्य कामबीजेन मन्त्रवित्॥
आर्द्रं पङ्कं हृदेकर्तुः देशिकः शंकराज्ञया।
तत्पङ्कं तु शेषेभ्यश्च दापयेत्पठितस्तथा॥
सुमुहूर्ते सुलग्ने तु स्वस्तिसूक्तं समुच्चरेत्।
रथस्थानं क्रमैर्नीत्वा रथमारोपयेत्प्रभुम्॥
कूटं वाऽथ प्रपां वापि रथ्यासन्ने च रथार्भकम्।
72a सर्वालंकारसंयुक्तं कारयेत्तु विचक्षणः॥
स्यन्दनस्य समन्तात्तु सौवर्णैर्वापि भूषयेत्।
आबद्ध्य रत्नदामैश्च पुष्पमालाभिरन्वितम्।
रथमध्ये तु देवेशं लोकरक्षार्थकं यजेत्।
तरङ्गेण समावेष्ट्य नैवेद्यान्ते यजेत्प्रभुम्।
अपनीय तरङ्गं तु पुष्पवृष्टिं यथा कुरु।
गन्धवारि समायुक्तं विकिरेद्रत्नपुष्पकम्।
भूगतानां सुवृष्ट्यर्थं विकिरेत्स्वर्णपुष्पकम्।
नामकस्य जनाकीर्णे प्रभूणां च बलान्विते॥
अन्यानि च भवं चात्र चा ददेत्परमेष्ठिना।
षडध्वैस्समयमार्गस्थास्तत्तन्मार्गफलं लभेत्॥
यथार्हं वस्त्रहेमाद्यैः पूजनीयात्क्रमेण तु।
सर्वातोद्यसमायुक्तं गेयनृत्तादिभिर्युतम्॥

नानादीपसमायुक्तं दर्शयेच्छिवसन्निधौ।
गवादिषु यथालङ्कृत्य रथयात्रां तु कारयेत्॥
नानालंकारसंयुक्तं नानादीपसमायुतम्।
दर्शये ग्रामादिषु वाद्यान्त रथयात्रां तु कारयेत्॥
नानालंकारसंयुक्तं नानायन्त्रसमायुतम्।
शनैः प्रदक्षिणं कुर्यात् विशेषात्स्थानमण्डपम्।
परिवेषक्रमोपेतं पूजायाः सम्यगाचरेत्।
72b एवं यः कुरुते मर्त्यो रथयात्रां शिवस्य तु॥
एकविंशत्कुलोपेतैः शिवलोके महीयते।
मुच्यते सर्वपापेभ्यो रथवासे पराजयः॥
स्यन्दनारोपणं ह्येवं तज्जीर्णोद्धरणं शृणु।
जीर्णताङ्गं सुसंवीक्ष्य नवं कृत्वा सुदारुभिः॥
तक्षकं वस्त्रहेमाद्यैः पूजयित्वा विसृज्य च।
रथं गन्धैः सुसंप्रोक्ष्य पावमानमुदीरयेत्॥
पुण्याहं वाचयित्वान्ते शान्तिहोमं तु कारयेत्।
आचार्यं पूजयेत्पश्चात् रथारोहणमाचरेत्॥

इति श्रीकारणे प्रतिष्ठातन्त्रे रथारोहणपटलः सप्तत्रिंशः॥

* * *

प्रायश्चित्तविधिं वक्ष्ये उत्सवस्य क्रमेण तु।
वृषभागविहीने तु ध्वजवेदिविहीनके॥
ध्वजदण्डविहीने तु मानोन्मानविहीनके।
तच्छिन्ने पतिते छिन्ने छत्रादिपतितेपि च॥
बलिपात्रविहीने च बलिदानविहीनके।
बलिदीपविहीने च कालातिक्रमणे हि च।

उत्सवे वाद्यहीने च तत्काले कलहप्रदा।
पूजापर्युषितैर्द्रव्यैः संकरे लिङ्गबिम्बयोः।
प्रतिमायानकाले तु पतिते चाङ्गहीनके।
शयान्तरस्पर्शने शूद्रैः प्रतिमास्पर्शनेऽपि च॥
तैरेव यागशालायां संप्रविष्टे शुना तथा।
उत्सवे त्वथ तद्ग्रामे वास्तौ च मृतिसंभवे॥
परिवेषविहीने च अस्त्रराजविहीनके।
प्रपादर्पणविहीने तु अर्घ्यदानविहीनके।
रक्षासूत्रविहीने तु कौतुकस्नानहीनके।
चूर्णोत्सवविहीनेऽपि तु तीर्थकर्मविहीनके।
तथा स्थापितकर्मेषु अभिषेकविहीनके।
हीनाधिके तथा न्यूने उत्सवे कल्पकालतः॥
पीठे तु शयनहीने तु चक्रयागविहीनके।
उक्तकाले कृतयागे तु अन्यकाले कृतं यदि॥
73a आरब्धा द्रव्य, कृतेगकृते तथा। ?
मन्त्राणां संकरे चैव यथागमविधानहीनके।
एवमादिषु कर्तव्यं निष्कृतिं शृणुमे च।
वृषयागविहीने तु गावो नश्यन्त्यसंशयम्॥
वृषभस्थापनं कृत्वा गन्धपुष्पादिभिर्यजेत्।
निवेद्योत्सवहीने तु शान्तिहोमं तु कारयेत्॥
नृत्ययागे ततः पूर्वं त्वाङ्गुलतिविधानात् सह।
ध्वजारोहणहीने तु राज्ञो दुर्नयमाप्नुयात्॥
शान्तिहोमं ततः कृत्वा विधिवत् शेषमेव तत्।
ध्वजादिविहीने च मानोन्मानविहीनके॥

परचक्राद्भयं भीमं शिल्पिनां हानि देशिकः
पुनस्तत्स्थापनेनैव कृत्वा शान्तिद्वयं नयेत्॥
ध्वजदण्डविहीने तु देशान्तरं नृपक्रमात्।
शान्तिहोमं ततः कृत्वा पुनः सन्धानमाचरेत्।
ध्वजस्तम्भे ध्वजे ध्वजपटे नष्टे वा पतितेऽथवा।
ध्वजलेष्टविहीने च स्कन्दवेगविहीनके।
प्रवर्तते महामारी पुण्याहं वाचयेत्ततः।
शान्तिहोमं ततः कृत्वा पुनः सन्धानमाचरेत्॥
घण्टाहीने च पतिते तालानां च क्षयो भवेत्।
पुण्याहं वाचयित्वा तु मूलेनैव शतं जपेत्॥
अस्त्रमन्त्रेण संप्रोक्ष्य पुनः संधानमाचरेत्।
भेरीताडनहीने तु कर्ता विधुरतामियात्।
स्नपनं कारयेच्छम्भोः ततो भेरीं तु ताडयेत्।
धान्यकाले नगकोणे छेदे वा पतितेऽपि च॥
चर्मच्छेदे विशेषेण सस्यनाशं विनिर्दिशेत्।
नन्दिमन्त्रमनुस्मृत्य हुत्वा जप्त्वा शतं ततः।
नवनूत्नं परिगृह्य वितनं ताडयेद्बुधः।
यागशालाविहीने तु कुण्डवेदिविहीनके॥
73b एतेषु लक्षणे हीने तद्ग्रामस्य क्षयं भवेत्।
प्रमादेन पुनः कुर्यात्पुण्याहं वाचयेत्ततः॥
शान्तिहोमं ततः कृत्वा तत्र कर्म समाचरेत्।
तेषां स्थापितहीने तु सस्यनाशो न संशयः॥
पञ्चगव्येन संप्रोक्ष्य मूलमन्त्रशतं जपेत्।
विधिना स्थण्डिलं कृत्वा तत्रैव स्थापयेद्वरान्॥

यागशालाग्निदग्धे च स्थापितास्तु यथास्थया।
परत्यक्त्वाद्रयं भूमौ भूपतेश्च महद्भयम्।
तान्विसृज्याथ सर्वांश्च पुनः संधानमाचरेत्।
पुनर्विम्बमारभ्य लिङ्गमादि विशेषतः।
केवलं यागशाला तु अग्निदग्धे तु पूर्ववत्।
कृते पुण्याहयुक्तं तु शान्तिहोमं तु कारयेत्॥
स्नपनं कारयेच्छम्भोः पूजयेत्तु विशेषतः।
वितानध्वजहीने च तोरणादिविहीनके॥
राजराष्ट्रविनाशाय महामारी प्रवर्तते।
पूर्वोक्तविधिना कुर्याच्छान्तिहोमविधानतः॥
स्रुक्स्रुवादिविहीने तु ज्वरमारी प्रवर्तते।
लक्षणेन विहीनेपि शान्तिहोमं तु कारयेत्॥
दर्भमालाविहीने तु अस्त्रावधकरं नृणाम्।
मूलमन्त्रशतं जप्त्वा दर्भमालां तु योजयेत्॥
होमद्रव्यविहीने तु अनावृष्टिर्न संशयः ~~अस्त्रावधकरं नृणाम्~~
~~मूलमन्त्रशतं जप्त्वा दर्भमालां तु योजयेत्~~
अस्त्रमन्त्रं शतं जप्त्वा महाशान्त्याहुतिं ततः,
७५१ तद्रूपं होमयेद्धीमान् पूर्वोक्तविधिना सह।
आयुधेन विहीने तु तस्करात् भयं महत्।
दशाक्षरेण मन्त्रेण होमयेच्छतसंख्यया।
तेन संप्रोक्षणं सर्वं प्रोक्षयेत्तु शिवाम्भसा॥
अष्टमङ्गलहीने तु जयोनाशनमादिशेत्।
शान्तिहोमं ततः कृत्वा कारयेदष्टमङ्गलम्।
पञ्चगव्येन संप्रोक्ष्य स्थापयेत्पूर्ववत्क्रमम्।

अङ्कुरार्पणहीने च पालिकादिविहीनके।
सर्वे च लक्षणे हीने सस्यनाशो न संशयः॥
शान्तिहोमं ततः कृत्वा स्थापनं कारयेत्क्रमात्।
यागादिवासनं तत्र कुर्यान्मूलमन्त्रतः॥
कुम्भस्थापनहीने तु कुम्भे भिन्ने च निर्जले।
रत्नहेमविहीने च सूत्रवेष्टविहीनके।
पिधानकूर्चहीने च वस्त्रहीनादिके ततः।
नैवेद्यादिविहीने च दुर्भिक्षं जायते ध्रुवम्॥
शान्तिहोमं ततः कृत्वा स्थापनादि पुनस्ततः।
दुर्भिक्षं जायते कुम्भे होमविच्छेदनेऽपि च॥
भस्माङ्गारकमुद्धृत्य निधायाग्निं च पूर्ववत्।
समिदाज्येन चरुणा जुहुयान्मूलमन्त्रतः॥
प्रत्येकं तु शतं हुत्वा द्रव्यान्ते व्याहृतीर्हुनेत्।
प्रणीताचालिते भिन्ने ज्वरव्याधिस्तु जायते।
मूलेनैव शतं हुत्वा विधानं होममाचरेत्।
परिधीध्महीने तु जनाः दुःखमवाप्नुयात्।
७५६ शान्तिहोमं ततः कृत्वा पुनः सन्धानमाचरेत्।
बलिद्रव्यविहीने च पतिते च विशेषतः॥
सस्यानां नाशनं चैव ग्रामनाशं तथा भवेत्।
तद्द्रव्यं च निरस्याथ नवद्रव्यं परिग्रहेत्॥
मूलमन्त्रं जपित्वा तु मूलेनैव शतं हुनेत्।
बलिद्रव्यं समादाय बलिदानं समाचरेत्।
बलिलिङ्गविहीने च भिन्ने च पतितेऽपि वा।
भग्ने चैव तथा कर्तुर्विनाशं भवति ध्रुवम्॥

कृत्वा च शान्तिहोमं च मूलेनैव शतं हुनेत् ।
तत्तल्लिङ्गे प्रकुर्वीत पुनर्बलिमथाचरेत् ॥
कुण्डास्ये पतिते चैव भिन्ने नष्टे तथैव च ।
तद्ग्रामस्य च नाशः स्यात् शान्तिमन्त्रमादिशेत् ।
पतिते भिन्नपात्रे कृत्वा शान्तिहोमं समाचरेत् ।
अस्त्रमन्त्रेण मतिमान् जुहुयाच्च तत्संख्यया ॥
शोधस्थानबलिं दद्यात् प्रतिशोधागमस्थपम् ।
छत्रदण्डे तु विच्छिन्ने वर्जयेत्तं प्रयत्नतः ॥
अस्त्रमन्त्राभिजप्तं हि यागशेषं समापयेत् ।
छत्रं तद्दण्डं कृत्वा स्थापयेद्ध्वजपूर्वकम् ।
आद्ये तु पतिते होमे च पुनः सन्धानमाचरेत् ।
तदस्त्रच्छेदने होमं पूर्ववत्कारयेत्सुधीः ॥
प्रतिमा पूजनं ... जलाधिवासनं विना ।
आद्यन्तानि प्रणष्टे तु भिन्ने वा पतितेऽपि वा ॥
वर्तते तु महामारी ग्रामे नश्यन्ति संशयः ।
75a बिन्दुयोनिमन्त्रेण जपेदष्टशतं सुधीः ॥
नष्टे भिन्ने च कलशे पूर्ववल्लक्षणान्वितम् ।
बलिदानविहीने च देवनाशमिति भवेत् ॥
मूर्तिहोमं ततः कृत्वा शान्तिमन्त्रशतं जपेत् ।
बलिदानविहीने च सर्वग्रामा हि हिंसका ॥
दृष्ट्वा बीजमनुं चैव प्रत्येकं तु शतं जपेत् ।
द्विगुणं होमतो येन बलिं शान्तं समापयेत् ।
कालातिक्रमणे प्राप्ते बलिदानविहीनके ।
तद्ग्रामस्य नाशः स्यात् शान्तिहोमं तु कारयेत् ॥

पुण्याहं वाचयित्वा तु बलिदानं समेद्बुधः।
उत्सवे यानहीने तु कर्तुः क्षयकरं भवेत्
मूर्तिहोमं ततः कृत्वा स्नपनं कारयेत्सुधीः।
पुनर्यानं क्रमेणैव कुर्याद्ग्रामप्रदक्षिणम्॥
वाद्यादिभिर्भयैश्च यथाकाल भवेद्यदि
दिशाहोमं ततः कृत्वा मूलेनैव शतं जपेत्
काले होने तु न काले ग्रामे चोरभयं भवेत्।
शान्तिहोमं ततः कृत्वा प्रतिष्ठा [illegible] प्रीति॥
बलिप्रदानमानं तु अन्यथा यानमाचरेत्
यानपूर्वं तु यानं वा केवलं ग्रामयात्रकम्॥
शान्तिहोमं ततः कृत्वा मूलेनाष्टशतं जपेत्
75 पूजापर्युषिते द्रव्ये संकटे विफलि द्रुमे॥
परचक्रभयं चैव महामारी प्रवर्तते।
मूर्तिहोमं ततः कृत्वा स्नपनं कारयेत्प्रभोः॥
पुण्याहं वाचयित्वा तु जपे[illegible]शतं मनुम्।
प्रतिमायानकाले तु पतिते चाङ्गहीनके।
चाण्डालादिस्पृष्टानां च नाशनं भवति ध्रुवम्।
शिरो बाहू तथा पादौ हीने तत्परिवर्जयेत्
नासाकर्णाङ्गुलीयादि स्थूलभागादिहीनके॥
पद्मबन्धविहीने च जटाकेशविहीनके।
संधाने योग्यबिम्बं संधानेच्च तथा सुधीः।
चलिते स्खलिते किंचित्स्थापिते स्फुटितेऽपि च॥
तद्दिने संधानसंयुक्त्या पादादौ पूर्ववन्नयेत्
संप्रोक्षणं ततः कृत्वा पुनः पूर्ववदाचरेत्।

संधानयोग्यं नो चेत्तु शिल्पादिभिरनन्विते।
धामान्तरगते बिम्बे उक्तं कार्यं सुधीः।
यद्ग्रामोत्सवबेरादि लघुकाय महद्यदि
अनुकूलेऽस्थाने न्यस्य कृत्वा चोत्सवमाचरेत् ॥
धामान्तरगतं बिम्बं सानुकूल्यं भवेद्यदि।
लिङ्गादिमानयुक्तं चेद्विकाले बालधामकम्।
कारयित्वा विना सर्वं देवेशं पूजयेत्तु वा।
76a प्रथमं शान्तिहोमं तु कुर्यात्तीर्थावसानकम् ॥
दीक्षान्तरसमापने दीक्षाविरहितैरपि।
शूद्रैः स्त्रीभिरस्पाप्य प्रतिमायां शिवे यदि ॥
तैरेव यागशालायां स्पृष्टे कुम्भाधिवासनम्।
कृत्वा वा शयिते तत्र तत्काले मनुष्याणां मृतिर्यदि ॥
राष्ट्रस्य दूषणं तस्य शीघ्रं त्यक्त्वा तु तद्गृहम्
मूर्तिहोमं ततः कृत्वा अस्त्रेणाष्टशतं हुनेत्।
परिवेषक्रमाहीने दुर्भिक्षास्तत्प्रजास्तथा।
शिवमन्त्रशतं जप्त्वा व्योमव्यापिशतं जपेत्।
नीराजनविहीने तु वह्निना वा भयं भवेत्।
महेशस्य तु बीजेन शतं जप्त्वा विशेषतः।
नीराजनं ततः कुर्यात्पूर्वोक्तविधिना सह।
पुष्पाद्यैश्चापि संदग्धे क्षु[द्र]भयं ग्रामवासिनाम् ॥
तदागारं विसृज्यापि पूर्ववत्कारयेत्सुधीः।
मूर्तिहोमं ततः कृत्वा बिम्बस्य स्नपनं चरेत् ॥
मृगयात्राविहीने तु सस्यानां नाशनं भवेत्।
मूर्तिहोमं ततः कृत्वा यात्रां तत्र समाचरेत्।

रक्षासूत्रविहीने च बालानां नाशनं भवेत् ।
पुण्याहं वाचयित्वा तु कौतुकं पुनराचरेत् ॥
708 कौतुके स्नानहीने च अनावृष्टिर्भविष्यति ।
मूर्तिहोमं ततः कृत्वा कौतुकस्नानमाचरेत् ।
तीर्थे हीने महाशोकं तद्राष्ट्रं जनवर्जितम् ।
पूर्वोक्तविधिना चैव पुनरुत्सवमाचरेत् ॥
स्नपनं तु ततः कृत्वा त्वभिषेकं तु तैर्नयेत् ।
ध्वजावरोहणे हीने महावातप्रकोपना ।
मूर्तिहोमं ततः कृत्वा कुर्यात्तस्यावरोहणम् ।
मूर्तिस्नपनहीने तु अभिचारिकं संभवः ॥
शान्तिहोमं ततः कृत्वा स्नपनं कारयेत्सुधीः ।
आयने विषुवे चैव पुनस्तीर्थमाचरेत् ॥
न्यूने चैव तथा राष्ट्रग्रामयोर्नाशनं भवेत् ।
मूर्तिहोमं ततः कृत्वा पुनरुत्सवमाचरेत् ॥
[illegible] नास्ति चेन्नास्ति [illegible] मासप्रयोगः ।
प्रायश्चित्तादिकं नास्ति यथासंभवतो नयेत् ॥
पीठोद्वासनहीने तु न प्रीताः संधिदेवताः ।
मूलेनैव शतं जप्त्वा पश्चादुद्वासनं कुरु ॥
चण्डयागविहीने तु पराक्रमेष्टं भवेत् ।
स्नपनं कारयेत्पश्चात् चण्डयागं समाचरेत् ॥
आरब्धाद्यज्ञशालायां बान्धवे देशिकः पुनः ।
शिवयागादिकं कृत्वा चान्यत्कर्मासमेव वा ॥
तत्तौद्गिर्भवेदानां तथैव पुनराचरेत् ।
मन्त्रसंस्कारलोपेण महामारी प्रवर्तते ॥.

समित्क्रियं च पलाशाद्यैः सर्पिषा चरुणा ततः।
मूलेनाष्टशतं हुत्वा तत्तत्स्थले जपान्वितम्।
आचार्यदक्षिणाहीने कर्तुरेव विनश्यति।
७७९ अन्यथा यागकर्माणि निष्फलं भवति ध्रुवम्।
शान्तिहोमं ततः कृत्वा मूलमन्त्रं शतं जपेत्।
ततः स्नात्वा तद्द्विगुणं पश्चात् दक्षिणां तत्र दापयेत्।
यागोपकरणं सर्वं दैशिकाय प्रदापयेत्।
अनुक्ते सर्ववेदज्ञ शान्तिहोमेन नश्यति॥
मूर्तिहोमं दिशाहोमं कृत्वा निष्कृतिमाप्नुयात्।
यागाग्नौ जुहुयाद्धीमान् प्रागुक्तविधिना सह।
प्रायश्चित्ते कृतेऽप्येवं सर्वं सफलमाप्नुयात्।

इति श्रीकारणे प्रतिष्ठातन्त्रे उत्सवप्रायश्चित्त-
पटलो षट्त्रिंशः॥

*

श्रीकारणोत्सवो देव सम्यगुक्तस्त्वयाऽनघ।
प्रभायांतोत्सवं तत्र तद्विधिं ब्रूहि मे प्रभो।
ईश्वरः —
शृणु देवि प्रवक्ष्यामि प्रभायां बाह्योत्सवम्।
नवार्धचक्राणां तथा सम्यक् शृणु षण्मुख।
सहस्रायतं मूलपीठं तिर्यक् तथा समम्।
पञ्चहस्तेन तदर्धेन चतुर्हस्तं तु मध्यमम्।
तथा त्रिहस्तमधमं मुख्यतः त्रिविधं भवेत्।
त्रितारं च तथा कुर्यान्मातृकाङ्कं कलाकृतिम्।
वृत्तैः पत्रसमूहाद्यैः पद्मसारैः प्रकल्पिताम्।

द्व्यङ्गुलपञ्चमिचन्द्राभां प्रभां लक्षणलक्षिताम्
द्वाराकारं कल्पयित्वा तदन्तमध्यदेशके॥
77b तद्द्वारपार्श्वयोर्देवि मण्डपं सार्धमानतम्।
तत्प्रमायास्त्रिभागेषु द्विभागेन तदुन्नतम्।
चतुःस्तम्भसमायुक्तं प्रागुक्तद्वारसंमितम्।
त्रिकोणं मेखलायुक्तं द्विकोणेनायतानतोन्नतम्॥
तदग्रे कल्पयेद्देवि हैमं च कलशाश्रयम्।
तदग्रे मध्ये मणिमालं महाकीर्तिमुखं न्यसेत्।
द्वादशाङ्गुलविस्तारस्वर्णचक्रं तदग्रके
तन्मूले शोभनं यन्त्रपत्रीं देवश्रीनिग्रहान्वितम्॥
नानाशोभासमायुक्तान् सर्वलक्षणलक्षितान्।
तदन्तर्द्वारकाष्ठं तु शोभनाकारलिङ्गकम्।
तद्बाह्ये कुसुमाकारं परितश्च स्थलीसमम्।
सपक्षिपक्षजाकारं तन्मध्ये कल्पयेद्दृढम्॥
नवरत्नमयं नाकशोभं पुष्पस्रग्जालादिभूषणम्।
अथवान्यन्मृदन्यैस्तु अन्तर्यामादिभूषितम्।
कारयेच्छिल्पिना चैवं प्रभां पूर्वोक्तलक्षणैः।
ततस्तत्र न्यसेद्यानं स्वर्णाद्यं मध्यमण्डपे॥
त्रिचतुष्पञ्चतालोच्चं तदूर्ध्वं मानयोच्छ्रिते।
तत शाखाः पञ्चकोणं पुंसि पुंवत्स्त्रियां स्त्रियम्।
78a कृत्वैवं वाहनं सर्वं यथा विध्युक्तमार्गतः।
तस्याधारे दृढे बद्ध्वा वाहकैर्धारणार्थकम्।
दण्डानि पञ्चहस्तानि चतुर्हस्तानि वा शिवे।
यत्प्रमाणं महामेरुं वाहनं वाहनं तथा॥

सर्वत्र भावयेद्देवि तदङ्गे देवतामयम्।
तत्र संप्रोक्षणं प्रारभ्य कृत्वा पश्चात्ततः परम्॥
इतीरित प्रभायाने देवेशमधिरोपयेत्।
उत्सवं च ततः कुर्याद्ग्रामसीमान्तमीश्वरि॥
इत्थं यानोत्सवं प्रोक्तं रथाद्युत्सवकर्मणि।
नियमं चाप्यबन्धं च विशेषेण समाचरेत्।
शिवारम्भे काम्यमङ्गल्ये वृषं वा स्वस्ववाहनम्।
प्रभायां विन्यसेन्मन्त्री कारयेत्तत्र चोत्सवम्॥
प्रभायानोत्सवं प्रोक्तं शैवादीनां महोत्सवे।
यः कुर्यात्सोऽपि देवेशि चतुर्वर्गफलं लभेत्।

इति श्री चन्द्रज्ञानागमे उत्सवखण्डे
प्रभायानोत्सवविधिः।

*

यदुक्तं महाप्राज्ञ देवेश तव शंकर।
सुमस्रग्गन्धवस्त्रादिभूषणानां समर्पणम्।
कथं कार्यं च तत्कालं विस्तरेण जगत्पते।

786 ईश्वरः -

शृणु देवि प्रवक्ष्यामि तत्कालं तद्विधिं क्रमात्।
मदर्पणार्थमानीतं जलगन्धसुमादिकम्॥
स्रग्वस्त्रावरणे भक्तैः देशिकः कृतनैष्ठिकः।
उद्वर्तने कर्ममध्ये प्राणसंस्थापने तथा।
नैवेद्ये पात्रिकायां च कालेत्यक्त्वान्यकालके।
स्वयं स्वीकृत्य तद्द्रव्यं शुद्धिं कृत्वा विचक्षणः।
जलेक्षेप्तु तदुत्पूय वीक्ष्य दृष्ट्या निरीक्ष्य च

तेनैमां सेचयेन्मन्त्री तद्भक्तश्रेयसे शिवम्।
गन्धं च दत्त्वा ततः प्रोक्ष्य विन्यसेन्मम मस्तके॥
तस्योपरि तथा पुष्पं विन्यस्याभ्यर्च्य मूलतः।
वस्त्राभरणके चेत्तु शुद्धिं कृत्वास्य मूलतः॥
संभूष्य मम सर्वाङ्गं तद्वस्त्राभरणैर्मुदा।
तद्भक्ताहृतनैवेद्यं फलं वा पक्वमेव वा॥
समर्प्य तोषणं कृत्वा श्रीराज्याभ्यर्च्य मां ततः।
तस्मै भक्ताय संदद्यात् तत्तीर्थं तत्सुमं गुरुः॥
सुमसत्फलपक्वं चेत् चतुर्धा विभज्य च।
एकभागं स्वयं कर्ता स्वीकृत्यान्यं द्वितीयकम्॥
79a आचार्याय प्रदद्याद्धन्यं द्विजेभ्योऽथ द्विभागकम्
एवं विभज्य तत्कर्ता मम संतुष्टिहेतवे॥
वस्त्राभरणकं चेत्तु धनागारे समर्पकः।
संरक्ष्य भूषयेन्नित्यं यथायोग्यं विभूषणैः॥
इत्युक्तविधिना देवि द्रव्यजालं समर्पयेत्।
ग्रामान्यवासिनो भक्त्या परे तद्द्वारबन्धनात्॥
तद्दर्शनार्थमायाता यद्यकस्माज्जटाधर।
कथं कार्यं तदा देव वद तत्त्वं महेश्वर॥
ईश्वरः —
धावन्तो वेगतश्चेत्तु राज्ञिकाद्दैविकादपि।
तदा द्वारशाखास्थाने दौवारिकमुखाद्विवम्।
मां स्मृत्वा फलपक्वाद्यं समर्प्य विनिवेद्य च।
साष्टाङ्गं प्रणमेत्तत्र देवांशं फलपक्वकम्।
निक्षिप्य शेषं स्वीकृत्य गच्छेद्ग्रामप्रदक्षिणात्॥

इत्येवं धावतं प्रोक्तो विधिरन्येन कारयेत्।
द्वारोद्घाटन पर्यन्तं स्थित्वाचोद्घाटनात्परम्।
मां दृष्ट्वा फलपक्वाद्य माचार्य प्रमुखान्नत:।
समर्प्यानम्य ते भक्त्या ममानुग्रहकारिण:॥
निवर्तयेद्यथाकामं स्वयस्तेऽभीष्टमाप्नुयात्।

इति रौरवसंहितायां फलपक्वादिसमर्पण मालविधि:॥

शिवाय नम:॥

*

71b देशिकं वृणुयेत्कर्ता तस्मात्पूर्वं तु कर्मण:।
तदृत्विग्जनं तथा चैव विहीने यदि तत्र तु।
प्रयत्नात्परिगृह्णान्यं तत्काले वृणुयाद्गुरु:।
कृतक्षौराभ्यञ्जनाद्यं शिष्णान्मन्त्रकौशलाम्॥
ब्राह्मणांश्च स्वयं मन्त्री वपनस्नानपूर्वकम्।
तत: प्रकुर्यात्तत्कर्म विधिप्रोक्तं यथाक्रमम्।
प्राप्तकाले विधिस्त्वेवं तदलाभे विधिं शृणु।
सर्वत्र ऋत्विग्जने हीने प्रारम्भे दैवयोगत:।
तदा कुर्यात्तदारम्भमुत्सवादेर्यथाक्रमम्।
धनदकालहीने तु तथा तत्र गुरूत्तम:॥
एकस्मिन्मूर्तिपे हीने द्वयं वा त्रितयेऽपि वा।
उक्तकाले तदा प्रोक्तं प्रकुर्यात्कर्म देशिक:।
आहूय चारप्रमुखान्ग्रामान्यस्थं द्विजं द्रुतम्।
क्षौराद्यं कारयेत्तस्य पुनस्तत्युक्तकालके॥
निशायामथवा कुर्यात् पूर्वं कौतुकबन्धनात्।
एकद्वित्रितयेष्वेवं मूर्तिपे तान्स्तु योजयेत्।

वरणं मधुपर्कार्थं तत्काले तस्य कुर्ववित्।
कृत्वा प्रकौतुकं मन्त्री बन्धयेद्विधिना ततः॥
यद्यकस्मात्ततो देवि सूतके समुपागते।
देशिकादिजनानां तु तद्विधं शृणु शैलजे॥
त्रिपौरुषाद्ये संजाते देशिकेन्द्रस्य वा यदि।
809 जाते मृते वा तच्छिष्यं सुयोग्यं तदनुज्ञया॥
वपनाद्यं कारयित्वा तत्क्षणे यजमानकः।
कलशैः पञ्चविंशद्भिः तस्य स्नपनमाचरेत्॥
पञ्चगव्यं प्राशयित्वा बद्ध्वा तद्देवकौतुकम्।
ततस्तेनैव तत्कर्म कारयेच्छेषमुक्तवत्॥
लेपभाक्सूतके प्राप्ते तथा यदि गुरूत्तमः।
तथा प्रकुर्यात्तत्कर्म तद्वदं नाचरेत्क्वचित्॥
देशिकस्योत्यमेवोक्तं तथा ध्यातृसदस्ययोः।
ब्राह्मणस्य तथा कुर्यादार्यस्योक्तप्रकारवत्॥
मूर्तिपस्य समायाते तथा जातादिसूतके।
तथा प्रकारयेन्मन्त्री सदस्येन्द्रेण साङ्गतः॥
तत्कर्मशेषं तस्यापि सप्तपौरुषसंभवे।
सस्मृती सूत्रमुत्सार्य तथान्यौ द्वौ निक्षिपेद्बुधः॥
अथवा पुनरेकस्य क्षौराद्यैः संस्कृतस्य च।
तत्सूत्रं बन्धयेन्मन्त्री बद्धत्वैवं तथाचरेत्। श्रीः॥

इति चिन्त्यतन्त्रे प्रायश्चित्तखण्डे सूतकनिर्णयः।

*

अलाभे वरणे काले दैवात्कर्त्रादि मूर्तिपे।
उक्तकर्म तथा कार्यं स्वयं क्षौरादिसंस्कृतः॥

देशिकस्तु तथा रात्रौ पूर्वं कौतुकबन्धनात्।
पुनरेकं समारुह्य यत्नात्क्षौरादिकं तथा॥
मधुपर्कादिकं तस्य कारयित्वा विधानतः।
80-6 कौतुकं बन्धयेत्पश्चाच्छेषकर्माणि कारयेत्॥ श्रीः॥
ग्रन्थान्तरे—
संदिग्धकार्ये दीक्षार्थी मात्रादिमरणेऽपि च।
अशक्ये वपनं कार्यं कर्त्रा हन्त्री [नि] शिवमया। श्रीः॥
भिन्ने यदि बलौ बिम्बे तदा सन्धाय यत्नतः।
मूलेन देशिकः पश्चाच्छेषं कर्मसमाचरेत्॥
मूर्तिद्वयस्थिते गेहे वर्तमाना प्रशस्तका।
नान्यमूर्तिः प्रशस्ताः स्यादन्यथा दोषभाग्भवेत्॥
इत्यनिले॥ श्रीः॥
कुर्यान्मन्त्री स्थापनं चाष्टबन्धं शुक्ले पक्षे सर्वनिश्चयशुभवासरे।
सूर्योदये चाभिजिल्लग्नकाले दोषैर्व्यक्ति संयुतेपी श्वरादेः॥
इति तन्त्रार्णवे॥
उत्तरायणकाले तु शुक्लपक्षे सुनिर्मले।
बन्धं प्रतिदिनं कुर्याल्लिङ्गे स्वायम्भुवादिके॥ इति शेखरे।
शम्भौ शास्तरि विष्णौ च कठिनं बन्धमेव च॥
दुर्गायां गणनाथे च मृदुबन्धं इहोच्यते।
षण्मुखे विधिवन्मन्त्री तीक्ष्णमार्दवमिश्रितम्।
अन्येषु सर्वदेवेषु बन्धं कुर्याद्यथारुचि।
लक्ष्मीशे गिरिजापतौ समुदितं तैक्ष्ण्यं तथा शास्तरि
तु" वैश्वानतितीक्ष्णमार्दवयुतं स्कन्दे शिवे श्रीपतौ।
दुर्गायां गणनायके च मृदुलं बन्धं विदध्यात्तथा।

विज्ञानव्यसुरेषु चात्रविधिवद्बन्धं यथेष्टं तथा॥

81a लिङ्गपिण्डिकयोश्चैव स बन्धं प्राप्यते यतः।

तस्मादेव तदङ्गत्वाद्दृष्टबन्धमिहोच्यते॥

यदिबन्धोत्सवात्पूर्वं पूर्वं संप्रोक्षणाङ्कुरः।

श्रेयस्कामी न कुर्वीत तन्मध्ये वत्सरोत्सवम्॥

तस्मात्कुर्याद्बन्धकर्म वत्सरोत्सवतः परम्।

शेषकर्माणि कुर्वीत तन्मध्ये न च दोषभाक्॥

संरक्षणमथो वक्ष्ये बन्धसंस्करणात्परे।

चतुर्थस्नपनं कुर्याल्लिङ्गं सूच्यग्रधारया।

सम्यग्वेष्ट्य तदा बन्धं मधुसारपटेन वै। "मेणकप्पटवस्त्र" इत्यर्थः।

बन्धमस्पर्शनं यत्नात्साहस्रस्नपनं चरेत्॥

अभिषेकं विना पूजां कुर्यान्नित्यं दिने दिने।

बल्युत्सवादिकं चैव दृढसंप्रोक्षणान्तकम्।

बन्धादारभ्य लिङ्गस्य मस्तके देशिकोत्तमः।

यावद्दृढपर्यन्तं नवनीतेन लेपयेत्॥

अष्टबन्धे दृढीभूते सम्यग्वीक्ष्य यथाक्रमम्।

संप्रोक्षणं तथा कुर्यादभिषेकादिकानि च॥

मद्यान्नलवणैर्वर्ज्यं कुर्याच्छेषाणि पूर्ववत्

द्वादशाब्दात्परो देवि यदि बन्धे दृढस्थिते॥

तदुत्सार्य पुनर्बन्धं नवीनं पूर्ववच्चरेत्।

पूजालोपविशुद्ध्यर्थं प्रत्यब्दं सूत्रमर्पयेत्॥

तथा बन्धोत्सवे कुर्यात् द्वादशाब्दात्परं शिवे।

अथवा षोडशाब्दान्ते दृढे बन्धेऽपि कारयेत्।

81b शङ्खं च शङ्खपाषाणं कलधौतं च मौक्तिकम्।

शङ्खस्ताबगताश्चैव कार्पासं नवनीतकम् ।
श्वेतद्रव्यमितं प्रोक्तं सर्वदा सिद्धिमिच्छते ।

इति श्वेताबबन्धद्रव्यविवरणम् ॥

*

शङ्खं च शङ्खजाणं कलधौतं च मौक्तिकम् ।
श्वेतमाला श्वेतगुञ्जं माहिषं नवनीतकम् ।
ससर्जाष्टमिह श्वेतबन्धनं समुदाहृतम् ॥ श्रीः ॥
वृद्धरूपः प्रतिष्ठाग्निरुत्सवाग्निस्तु यौवनः ।
दीक्षाग्निर्बालरूपश्च वह्निरूपमिति स्मृतम् ॥ श्रीः ॥

शान्तिके वरदो नाम पौष्टिके बलवर्धनः ।
वैश्वानरोऽग्निः सर्वत्र तन्त्रकर्मणि शस्यते ॥
यद्वा — दीक्षा शान्तिस्तु बालाग्नौ नवाग्नौ प्रोक्षणोत्सवः ।
जीर्णोद्धारस्थापनञ्च वृद्धाग्नौ नैत्यिकं तथा ॥

इति कामिके मकुटे च ॥ श्रीः ॥

पूर्वोत्तरमुखं श्रेष्ठं दक्षिणं पश्चिमास्यकम् ।
मध्यमं तु विजानीयाद्विदिग्वक्त्रं तु कन्यसम् ॥
यदि चेद्राजवीथ्यादौ ग्रामनद्यादिसंभवे ।
संमुखीकृत्य कुर्वीत लिङ्गस्थापनमादरात् ॥
तत्रोक्तदोषो नास्त्येव सत्यमुक्तं मयानघ ।
पूर्वास्यं धर्मकामाय चार्थार्थी दक्षिणास्यकम् ॥
कामार्थी पश्चिमास्यं हि मोक्षार्थी चोत्तरास्यकम् ॥ श्रीः ॥ //

यदि पीठे क्षिप्तकाले शस्त्राद्यैः खण्डिते सति ।
भेदिते स्फुटिते वापि अङ्गुलोर्ध्वं तदा गुरुः ॥
३२० तत्पीठं त्याज्यमेवोक्तं सर्वादिष्टप्रदं नृणाम् ।

भिन्नादिके त्वङ्कुलान्तं तत्पीठं तु परिग्रहेत्।
तद्भिन्नदोषशान्त्यर्थं पूर्वोक्तं त्रिगुणं गुरुः॥
होमं च कलशं दानं तथा ब्राह्मणभोजनम्।
कारयेद्यदि पूर्वोक्ते त्वङ्कुलोर्ध्वे समागते॥
तत्क्षणे पीठमुद्धृत्य तच्छिन्नं कलशं घसेत्।
ततः प्रकारयेन्मन्त्री शिल्पिना तन्मितेन च॥
तद्रूपेण तु संपीठं यथाविध्युक्तमार्गतः।
तत्क्षणे तद्दिने वापि द्विदिने त्रिदिनेऽपि वा॥
तदूर्ध्वं न च कर्तव्यं तत्साक्षिध्ये कृते सति।
नाशमाप्नोति देवस्य तद्ग्रामं नश्यति ध्रुवम्॥
तस्मात्प्रकारयेत्पीठं त्रिदिनान्तं न संशयः।
जाते पीठे नवे मन्त्री बन्धयेत्पूर्ववत्तदा॥
न विचार्य कालदोषं दुर्दिनेऽपि गुरूत्तमः।
पीठनिष्पत्तिमारभ्य पीठसंस्थापनान्तकम्॥
कुम्भस्थदेवतां यत्नात् लिङ्गस्थां स्थिरादिके।
न दर्शयेत्सकृल्लिङ्गं तद्देहत्वमिति श्रुतम्॥
निशावद्वैजागरं कुर्याद्देशिकाद्विजमाः पृथक्।
यावत्पीठेन सहितस्तावदेवं दिने दिने॥
देवस्ततः प्रकुर्वीत अष्टबन्धादिकः क्रियाः।
पूर्ववद्विधिना मन्त्री अङ्कुरार्पणपूर्वकम्॥
उत्सवं कारयेद्भक्त्या देशिकः साम्प्रदायकः।
82b इति सहस्रकालोत्तरे अष्टबन्धसमये पीठजीर्णसन्धानविधिः।

*

वास्तुशोत्सववत्कुर्यात् अष्टबन्धाख्यकर्मणि।

रथोत्सवं चोत्सवादिना चन्द्रशाहनसंयुतम्।
पूर्वोक्तभेदतोऽन्यस्मिन् कस्मिंश्चिदुत्सवं चरेत्॥
तथा तीर्थोत्सवं कुर्यात् समभागे प्रकीर्तितम्॥ श्रीः। //

पश्चाद्दिनवाहान्ते बन्धकर्मणि सांप्रतम्।
शृणु शैवादिदेवानां दैशिकस्य क्रियामिमम्॥
प्रथमं क्षौरकर्माणि द्वितीयं विकृतार्चनम्।
नन्दीमुखादिवरणं तृतीयं तु चतुर्थकम्॥
मृत्तिकाहरणं प्रोक्तं पञ्चमं रज्जुबन्धनम्।
षष्ठं च बीजवापानि सप्तमं मण्डपक्रियाः॥
अष्टमं वास्तुशान्त्युक्तं नवमं कलशार्चनम्।
कलशसंकोपनं चेति दशमैकादशं तथा॥
शय्यादिहवनं प्रोक्तं द्वादशं मालशोधनम्।
त्रयोदशं तु पुण्याहं अष्टबन्धार्चनं परम्॥
चतुर्दशं पञ्चदशं बन्धसंपूरणं शिवे।
ततः प्राणादिहोमं तु षोडशं ध्वजकर्म च॥
प्रोक्तं सप्तदशं पश्चात् देवस्यावाहनं पुनः।
अष्टादशं तथैकोनविंशकं तु निरीक्षणम्॥
विंशकं स्नपनं चैकविंशत्पटहताडनम्।
83a गणानां बलिदानं तु द्वाविंशत्परिकीर्तितम्॥
त्रयोविंशच्चतुर्विंशं होमं तत्कुम्भपूजनम्।
यानोत्सवं पञ्चविंशं चूर्णोत्सवमतः परम्॥
षड्विंशं तीर्थयागं तु सप्तविंशं ततः परम्।
पूर्णाहुतिं चाष्टविंशं चैकोनत्रिंशकं ततः॥
वृषभोत्सर्जनं पश्चात्त्रिंशत्कं सेचनं शिवे।

मण्डपस्य पदैः पश्चात् द्वात्रिंशं ततः परम्।
शुद्धस्नपनकं चेति द्वात्रिंशत्परिकीर्तितम्॥
द्वात्रिंशद्धि केन्द्रस्य मया बन्धक्रियेरिता।

इति कालोत्तरे क्रियाभागे अष्टबन्धक्रियाभेदविधिः॥

—x—

कलासंकोचनस्याथ विधिं वक्ष्ये मनन्तरम्।
संहृत्यादौ कलाः पश्चात् तत्त्वसंहृतिमाचरेत्॥
जीवतत्त्वं प्रधानाख्यं ततः संहृत्य कुम्भके।
दक्षिणे सुसमीपस्थे पीठशक्तिं ततोऽसृजेत्॥
नाडीसंशोधनं चेत्येवं चरे वरकृतौ शिवे।
स्वायंभुवे च लिङ्गे च तथा देवर्षिसंस्थिते॥
कलासंकोचनं तत्र संशयच्छेदमुच्यते।
पीठशक्तिं निसृज्यादौ कलाः पश्चात्समाहरेत्॥
83 प्रधानाख्यं जीवतत्त्वं बिम्बात्त्वमशेषतः (क?)।
संहृत्याभ्यर्च्य तत्कुम्भं तल्लिङ्गं कुसुमादिभिः।
ततः प्रपूज्य वस्त्राभ्यां वेष्टयित्वा सकूर्चकम्।
पीठमङ्गजपत्पश्चान्नाडीशोधनमाचरेत्॥
प्रनाडीशोधनात्पूर्वं कलासंकोचमिष्यते।
पुनरावाहनं कृत्वा कार्यं निरीक्षापूर्वतः प्रिये (मद्विजे)॥
बन्धान्ते पूर्ववत्तत्र भक्त्या चार्वाह्यं गुरुः।
उत्सवे च प्रतिष्ठायां स्नपने चाष्टबन्धने॥
प्रायश्चित्तादिके देवि प्रवक्ष्ये गुरुदक्षिणाम्।
अधमा दश निष्काः स्याद्विंशन्निष्कं तु मध्यमम्॥
निष्कत्रिंशं चोत्तमेति त्रिविधा दक्षिणेरिता।

अथवा वित्तशाठ्येन रहितस्तु स्वशक्तितः।
गुरवे दक्षिणां दद्याद्यजमानः प्रसन्नधीः॥
गोभूतिलहिरण्यानि रत्नानि वस्त्राण्याभरणानि च।
यानच्छत्रगजाश्वादीन् क्रियान्ते दापयेद्गुरोः॥
कलशप्रतिमावस्त्रधान्यरत्नफलानि च।
यागोपकरणं चान्यद्ध्वजतोरणमण्टपान्॥
यानि यागोपयुक्तानि द्रव्याण्यन्यानि पार्वति।
तत्सर्वं यजमानस्तु करोत्याचार्यसात्तदा॥
दद्यान्मोहेन चान्यस्मै गृह्णीयाद्यदि वा स्वयम्।
तत्सर्वं निष्फलं कर्म कृतं स्यादुत्सवादिषु॥
क्षीणायुश्च भवेत्कर्तुः सर्वसंपद्विनाशनम्।
ज्वरग्रहादिपीडाश्च भवेयुश्च न संशयः॥
तस्माद्यागोपयुक्तं यत्तत्सर्वं च विशेषतः।
आचार्यायैव दातव्यं मत्प्रीतिस्तेन जायते॥
आचार्यस्त्वहमेवात्र आवयोः किञ्चिदन्तरम्।
यो भेदं विन्दते सोपि रौरवं नरकं व्रजेत्॥
तत्प्रीतिश्चैव मत्प्रीतिः तस्माद्देवि वरानने।
यदा गुरौ तु संतुष्टे सर्वं सम्पद्विवृद्धये [वर्धते]।
सर्वाभीष्टफलानि स्युः नात्र कार्या विचारणा॥
इति चन्द्रज्ञाने आचार्यदक्षिणाविधिः॥

—×—

उत्सवे त्वन्यमङ्गल्ये दधिकुम्भप्रमर्दने।
काले तद्दण्डपतना दृष्टे जाते मृणौ यदि॥
प्रायश्चित्तं शान्तिहोमं तदा कुर्वीत पूर्ववत्।
इति मसर अक्षदक्षि प्रायश्चित्तविधिः

—×—

846 देवार्थं संस्कृतो योसौ देवतानिकटे स्थितः।
अन्येन भाविनाशौचं न तस्य स्पृष्टिकारणम्॥
आगमश्रुतिमध्ये तु आगमः प्रबलो भवेत्।
कर्मान्ते सूतकं मन्त्री तस्मादुक्तं समाचरेत्॥
इति देवालयदल्लि इरुवाग सूतकश्रवण॥

*

अथ वक्ष्यामि देवेशि सर्वदोषविनाशिनीम्।
बलिबिम्बस्य पतनशान्तिं शृणु सुरवाहये॥
उत्सवे बलिकाले वा तथा ग्रामप्रवेशने।
कालेष्वस्मिन् तथैवापि यानाद्वा वाहनात्तु वा॥
पतिते बलिबिम्बे तु प्रमादाद्वाहकेन च।
बहुविघ्नं भवेद्देवि राज्ञो राष्ट्रस्य चोभयोः।
पतिते चैन्द्रदिग्भागे नृपतेर्मरणं भवेत्।
पतिते बलिबिम्बेग्निदिशि वह्निभयं भवेत्॥
प्रजानाशो याम्यदिशि दुर्भिक्षो नैरृते दिशि।
वारुण्यां शत्रुपीडा स्याद्वायव्यां रोगसंभवम्॥
सर्वसंपद्विनाशः स्यात् कौबेर्यां दिशि निश्चयम्।
शत्रुभिर्बहुपीडा स्यादीशान्यां बहुपीडनम्॥
प्रासादे पुत्रनाशः स्यात् प्राकारे स्त्रीविनाशनम्।
बहिः प्राकारदेशे तु सर्वसौख्यविनाशनम्।
859 गोपुरे कीर्तिहानिः स्यात् वीथ्यां सेनाविनाशनम्।
देशनाशो मध्यवीथ्यां वीथ्यन्ते प्रभुनाशनम्।
मण्डपे पतिते बिम्बे नानादुःखं भवेत्प्रिये।
दानं दुःखं निरीक्ष्याथ नृपः शान्तिं च कारयेत्॥

दोषशान्तिं प्रयाणे तु तदा देवालये गुरुः।
शान्तिं कुर्याद्युत्सवार्थं बलिमूर्तिं पुनर्नयेत्॥
वीथीमध्येऽथ पतिते शान्तिं कार्याथ तत्र तु।
आह्वानमण्टपे बिम्बे पतिते यदि पार्वति॥
तत्रैव बालये वापि शान्तिः कार्या यथोदिता।
पुनरागमने काले मण्टपाद्यालयं प्रति।
शान्तिं देवालये कुर्यात् तद्विधिः प्रोच्यतेऽधुना।
आदौ विनायकं पूज्य सर्वविघ्नविनाशनम्॥
पुण्याहं वाचयित्वाथ वेदमङ्गलनिस्वनैः।
अघोरमनुना चैव सहस्राहुतिमाचरेत्।
मृत्युञ्जयेन मन्त्रेण तावत्संख्यं हुनेत्तथा।
तदर्धं मूलमन्त्रेण तत्त्वमन्त्रैः शतं शतम्।
प्रायश्चित्तार्थमप्यत्र हुनेद्दोषोपशान्तये॥
85b समिदाज्यचरुव्रीहितिलसर्षपराजकैः।
क्षीरेण मधुना दध्ना साष्टोत्तरशतं पृथक्॥
होमसंख्यजपः कार्यो मन्त्रैरेभिर्द्विजोत्तमैः।
वेदसूक्तसुमन्त्राणां जपं कुर्युर्द्विजास्तथा॥
यत्र स्यान्मूर्तिपतनं तद्दिशीशं प्रति प्रिये।
यजनं प्रार्थनं चैव साष्टोत्तरशतं तथा॥
तन्मन्त्रेणैव होतव्यं जपस्तन्मनुना तथा।
बलिदानं प्रकर्तव्यं दिक्पालमनुना ततः॥
पञ्चामृतैः पञ्चगव्यैः कुशतीर्थजलैस्तथा।
सेचयेद्बलिमूर्तिं तां चकाशीतिघटैर्गुरुः॥
साष्टोत्तरशतैः कुम्भैः तथा लिङ्गं विषेचयेत्।

भक्ष्यभोज्यादिनैवेद्यं भक्त्या देवस्य दापयेत्।
दीपान्प्रबोधयेद्रात्रौ कर्ता दानं च दक्षिणाम्॥
दद्याच्चैव दशभ्यो द्विजेभ्यो गुरुपूर्वकम्।
भोजयेद्बहुनिष्टान्नं ग्राहयेदाशिषं ततः॥
एवं कृते महादेवि सर्वदोषं विनश्यति॥ श्रीः॥

इति श्री मुकुलागमे बलिमूर्तिपतनप्रायश्चित्तविधिः॥

*

आचार्यस्य करेणैव बलिद्रव्यं प्रमादतः।
धृत्वादि बलिं कुर्यात् तद्ग्रामस्य क्षयो भवेत्॥
86 a [बलि अन्न आचार्य हिडिदु बलि माडलागदु]
एकवस्त्रेण संयुक्तश्चैकयज्ञोपवीतकः।
ललाटशून्यको मुक्तशिखावान् रिक्तमस्तकः॥
एकैकेनापि हीनः सन् न कुर्याद्यदि देशिकः।
पूजादिसर्वकर्माणि नित्यनैमित्तिकादि च॥
प्रमादात्सोऽपि कुर्वीत तत्सर्वं निष्फलं भवेत्॥ श्रीः॥
आदौ कर्ममुखात्सिद्धि साकारस्तन्मुखात्परः।
तस्मात्कर्म प्रकर्तव्यं सिद्ध्युक्तविधिना जनैः।
इति सूक्ष्मकालोत्तरे॥
ध्वजारोहात्परं येन देशमन्यं स्वकं यदि।
गम्यते सोऽपि मद्द्वेषी जायते नरकार्णवे।
आवयोरुत्सवं येन निवार्य गमयेत्स्वकम्।
यद्यपि स्थूलकार्यार्थं देशं द्वेषी ममोऽस्तु सः॥
[इति ध्वजारोहात्परदल्लि मत्तोन्दु ग्रामक्के होगबारदु]
चणकं पृथुकं लाजं पानीयं फलपक्वकम्।

तुलसीदलमस्तेण प्रोक्षयेद्धेनुमुद्रया।
परिषेकं ततः कृत्वा प्राणशक्त्यादिमन्त्रकैः॥
186-b समर्पयेन्महेशाय देशिको हृष्टमानसः।
समर्पितं तं नैवेद्यं चण्डेशाय निवेदयेत्।
एवं फलादिनैवेद्यं कारयेद्धविषं विना।
इति कामिके फलादिसमर्पणविधिः।

*

भृगुऋषिः निचृद्गायत्रीच्छन्दः श्रीदेवता। श्रीं बीजम्।
ह्रीं शक्तिः। ऐं कीलकम्। श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे
जपे विनियोगः। ह्रामित्यादि षडङ्गम्।
कान्त्या काञ्चनसन्निभां हरगिरिप्रख्यैश्चतुर्भिर्भुजैः
हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम्।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलाम्
क्षौमाबद्धनितम्बबिम्बललितां वन्देऽरविन्दस्थिताम्॥
ओं श्रीं महालक्ष्म्यै स्वाहा। इति महालक्ष्मीमन्त्रः॥

*

देवयागार्चनादौ तु चान्द्रमानं मुनीश्वर।
सर्वोत्सवं कचिदिच्छन्ति केचिन्नन्तु सावनम्॥
चान्द्रमानेन पर्वाख्यमुत्सवं कारयेत्सुधीः।
सौरमानेन नित्यं च क्षयाधिकविवर्जितम्॥
इति चान्द्रसौरमास उत्सव। श्रीः।

*

871 जीर्णयोरुभयोस्तत्र लिङ्गप्रासादयोर्यदा।
देवं प्रवाहयित्वा तु जीर्णोद्धारं समारभेत्।

लिङ्गं वस्त्रेण संछाद्य विज्ञाप्येदमुदीरयेत्।
देवदेव महादेव यत्कर्तव्यं क्षमस्व च ॥
आगमस्य प्रमाणेन जीर्णोद्धारं करोमि ते।
प्रासादं परिगृह्य तत्र व(चे?)पनं कुर्याच्च पुण्याहकं
मूर्तीं तां परिगृह्य पूजयतु तत्प्रासादशुद्धिं पुनः।
स्थाने शुद्धिकृतं गतां निलयने मृत्संग्रहं चाङ्कुरं
रक्षोवास्तुबलिं तथा च नयनोन्मीलयं जले संस्थितम्।
स्थाने संस्कृतिसूत्रबन्धनसंवेशनं चाष्टकां
वह्नेर्मण्डपसंस्कृतिं च जननं पीठाधिवासं पुनः।
होमं वेदपरायणादिकमथोऽन्मीलयेच्च स्वपां
बिम्बस्थापनमष्टबन्धनमथो न्यासं सजीवं न्यसेत्।
कृत्वा तत्र कलाविकास्य शयनाद्धियेश्वरादीञ्जलं
कृत्वा सेचनकं क्रमेण सुमनो नीराजनं सुस्तुतिम् ॥
स्नानं च ध्वजकेतुरोहणमथो होमं दिशः सर्वतः।
87-८ कुम्भारोहणमूर्ध्निवस्त्रविसृजन्कुम्भान्महाभोजनम्।
भेरीघोषमथोत्सवं च परितो भूतस्य संतोषितं
रात्रौ जागरणं यथाविधि हुतं स्नानादिकं मन्त्रवित्।
तीर्थस्नानमतः परेषु दिवसे कृत्वा ध्वजानुद्रहेत्
दानं कौतुकनिष्कृतिं विधिविदः शान्तिं च शुद्धिं तथा ॥
पश्चात्तत्स्नपनं च कार्यकरणे कृत्वा कलावृद्धिकं
एतेषां च वदामि साङ्कुधु सदसन्नीत्यै महीमूर्तयोः।

इति पद्मसंहितायां प्रतिष्ठाक्रियाविधिः। श्रीनृसिंहाय नमः॥

*

उत्सवास्थिरलिङ्गानां नित्यशः क्रियते यदि।

तत्रान्य देवतोत्साहः कर्तव्यो वा न वा शिव ॥
यत्र प्रादुरभूल्लिङ्गं स्थिरलिङ्गं तदेव हि ।
तत्र सार्धशते हस्तपरिमाणमितस्ततः ॥
शिवक्षेत्रं विजानीयादथवा शतहस्ततः ।
तत्रान्य देवतोत्साहो न कर्तव्यः कदाचन ॥
प्रतिष्ठालिङ्ग बिम्बानामुत्सवे यः करोति सः ।
तत्रेतरेषां कर्ता स्याद्दुर्भिक्षादि प्रपीडितम् ॥
४४० यद्यन्य देवतोत्साह दर्शने मतिरस्ति चेत् ।
नित्योत्सवं देवगृहे कारयित्वावलोकयेत् ॥
तस्मात्सर्वप्रयत्नेन स्थिरलिङ्गे तदोत्सवः ।
वर्जये ग्रामवीथ्यां यो मदनुग्रहकारिणा ॥
यस्त्वन्य देवतोत्साहं कारयिष्यति भूमिपः
विमुखः सर्वदेवानां भूयादेव न संशयः ।
तस्मात्प्रयत्नतो वर्ज्यः स्थिरलिङ्गे तदोत्सवः ॥

इति मूलतन्त्रे अन्य देवता उत्सव वर्ज्य विधि ।

×

षण्मासात्परतस्तु गर्भिकपतिर्नैमित्तिकं वर्जयेत्
नित्योक्तं च यथा षष्ठ्यादियजनं स्यात्सप्तमासात्परम् ।
पित्रोर्निष्क्रमणेऽब्दके केवले यदि गुरुर्वैवाहिकी वत्सरे
नित्योक्तार्चनमाचरेन्न च पुनर्नैमित्तिकाद्युत्सवम् ॥

इति गर्भिणी पति विवाह मातापितृ मृत वर्ष कर्म वर्ज्य ॥

×

दिनद्वयगते पर्वे परे पर्वोत्सवो भवेत् ।
मध्याह्नादिगते वापि उत्सवः पूर्व वत्सरे ॥ शुभमस्तु ॥

कुर्वीत विधिना देवि ।शिवस्स्थापनान्तरे।
प्रोक्षणं तत्र वक्ष्यामि यथाविध्युक्तमार्गतः॥
स्नात्वा मन्त्री स्वकृत्यं च निवर्त्यादौ विचक्षणः।
88b गणेश्वरं समभ्यर्च्य नान्दीं संवाच्य भक्तितः॥
वरयेद्भूसुरान्पश्चान्मधुपर्कक्रियान्ततः।
सद्योङ्कुरार्पणं देवि भोजयेद्भूसुरोत्तमान्॥
कृच्छ्रं तुअ[दत्वा] तु तद्रात्रौ शोधयेन्मण्टपस्यकम्।
होमयेद्वास्तुराक्षोघ्नं बलिं वास्तोः प्रदापयेत्।
रक्षाबन्धं च परितो रक्षासूत्रं च बुद्धिमान्।
ततः प्रासादमन्त्रो[ण] पञ्चगव्यैः कुशोदकैः॥
शुद्धोदकै रत्नजलैः गन्धपुष्पोदकादिकैः।
वेदघोषैः स्वस्तिसूक्तैः वाद्यगानैर्द्विजैः सह॥
पञ्चवृक्षजलाद्यैश्च क्षालयेच्छिखरं गुरुः।
तैलेनालेप्य तं देहं नववस्त्रैर्दुकूलजैः।
दर्भदाम्ना समाच्छाद्य तन्मन्त्रैर्होमयेत्तदा॥
ततो विसृज्य तं वस्त्रमुपचारैः समर्चयेत्।
सेचयेत्कुम्भसाहस्रैः सहस्राद्यैस्तदर्धकैः।
पूजयेद्गणवच्छृङ्गं वक्ष्यमाणविधानतः
तद्देवपीठपूजादि पूजां कुर्वीत भक्तितः।
शिवप्रदा लोकदृशा शृङ्गिणी शिखरेश्वरी॥
शान्तात्मा शङ्खिनी काली शांभवी शंख[क]रप्रिया।
89a शक्तयो नव शृङ्गस्य क्रमादेताः प्रपूजयेत्॥
शृङ्गेश्वरायेति पदं दिव्यरुद्राय धीमहि।
तन्नः शृङ्गः पदं पश्चादुपसर्गादि चोरयात्॥

इत्यर्थ मनुना प्रोक्ता ऋष्यादीन्युच्यते शिवे।
नारायण ऋषिः प्रोक्तो ऽनुष्टुप्छन्द उदाहृतः॥
देवता परमात्मेति न्यासित्यादि षडङ्गकम्।
शृङ्गेश्वरं कुम्भधरं त्रिणेत्रं
गेहोपरिस्थं च विचित्रगात्रम्।
चतुर्मुखं चारुभुजैश्च पाणौ
वराभये द्वे दधतं भजेऽहम्॥

ओं ह्रीं ह्रूं ह्रैं ह्रौं ह्रः शृङ्गेश्वराय हुं फट् स्वाहा॥

पञ्चमावरणैः शृङ्गं पूजां कुर्वीत भक्तितः।
ततोऽपहारमखिलं शृङ्गेशाय निवेदयेत्॥
दिशामन्त्रेण तद्दिक्षु होमयेत्परितो बुधः।
दानं दद्याद्दशविधं शृङ्गाग्रे शांकरे दिशि॥
पुष्पं फलं च नैवेद्यं ताम्बूलं शयनादिकम्।
शृङ्गाग्नेय्यां प्रदातव्यं शिलाशीर्षहराय च॥
दध्योदनं यज्ञसूत्रं कन्यादानं च दक्षिणे।
सखड्गं च तिलतैलं च तिलपात्रं च राक्षसे॥
स्वर्णरौप्यकृतान्कुम्भान् शृङ्ग पश्चिमगोचरे।
शृङ्गवायौ वीजनं स्यात्पादुकां छत्रचामरम्॥
शृङ्गसौम्ये वाहनादि भूषणं द्रविणानि च।
89 b गृहदानं च तत्रैव ईशान्यां विविधानि च।
दानानि दत्त्वा विधिवत्कलशारोपयेत्क्रमात्।
रहस्यमत्र वक्ष्यामि कुम्भारोपणकर्मणि॥
शिलाघटेन निर्विघ्नो दारुणा निष्फलं भवेत्।
स्वर्णरौप्यादिताम्रोत्थघटे शृङ्गाग्रके यदि॥

भक्त्या संस्थापिते देवि स्ववंशो वृद्धिरिष्यते [-द्धिमेष्यति]
भोजयेद्भूसुरान्पश्चात्त्रिपञ्चदिवसे ततः ॥
कल्युत्सवं च कुर्वीत पञ्चवाद्यरवैः सह ।
भूसुराणां देशिकादि दक्षिणां विधिवत्पुनः ॥
पञ्चविंशतिनिष्कं च वीजनं वाहनं तथा ।
छत्रं च चामरं चैव तन्त्रोपकरणैः सह ॥
गृहदानं च दासं च देशिकाय प्रदापयेत्
त्रिंशन्निष्कं पादुकं च सदस्याय प्रशस्यते ॥
सपञ्चदशनिष्कं च सुवस्त्रं ब्रह्मणेऽपि च ।
दशनिष्कं स्वयं गृह्य पर्यङ्कं शय्यया युतम् ॥
मूर्तीशानां पञ्चनिष्कं पृथग्दद्यात्सकुण्डलम्
सार्धनिष्कद्वयं वेदघोषकानां प्रदापयेत् ॥
जापकानां सार्धनिष्कं चाराणां निष्कमुच्यते ।
दीनान्धबधिरादीनां यथाशक्त्याथ दक्षिणाम् ॥
इति क्रमाद्धापिते यः संपूर्णफलमश्नुते ।
उक्तार्धेन फलार्धं स्यादुक्तांशे च फलांशकम् ।
ज्ञात्वा धर्म इति प्राज्ञः स्ववंशो[श्रे] वृद्धिहेतवे ।
९०१ उक्तदक्षिणां दद्यात्तत्फलं श्रावयेत्तदा ।
शिखरे प्रोक्षणं प्रोक्तं सर्वसंपत्करं परम् ।
सर्वदुःखोपशमनं सर्वदा मङ्गलप्रदम् ॥
सर्वशान्तिकरं ज्ञेयं पुत्रपौत्राभिवृद्धिदम्
तुष्टिपुष्टिप्रदं देवि कीर्तिदं कान्तिवृद्धिदम् ॥
वंशवृद्धिकरं सौख्यं जयवृद्धिकरं मुहुः ।
भूमिदानेन यत्पुण्यं यत्फलं बहुभिर्मखैः ॥

कोटिकन्याप्रदानैश्च कोटिभूसुरभोजनैः।
दानेन विविधेनेपि यत्फलं लभते नरः॥
तत्फलं लभते सिद्धं त्वैहिके धनवान्भवेत्।
देहान्ते विष्णुसायुज्यं त्रिसप्तकुलसंयुतः॥
दुर्गायाश्चैव सामीप्यं शैवे सारूप्यमाप्नुयात्।
षण्मुखे चैव सालोक्यं सारूप्यं च गणेश्वरे॥
उमेश्वरे च सायुज्यं सामीप्यं शास्तरि प्रिये।
इति ज्ञात्वा फलं मर्त्याः सर्वपापक्षयाय च॥
शृङ्गयुङ्नवगेहं च बोधयेद्भक्तितो नरः।
शृङ्गयुक्तं नवं गेहं यः कुर्यान्मनुजेश्वरः॥
तस्य पुण्यफलं वक्तुं न शक्यं सुरदुर्लभम्।
१०६ फलान्येवं च शृङ्गस्य कलशारोपणं शृणु॥ श्रीः।

येश
पुण्याहं वाचयित्वादौ प्रोक्षयेत्कलशं गुरुः।
देवाग्रे स्वस्तिकां लेख्य शालिं संपूर्य तण्डुलम्।
गोधूमं शिम्बमाषौ च पूरयित्वा तु मण्डले।
सर्षपं च तिलं चैव सार्धहस्तमितं परम्॥
घृतं संगृह्य संपूज्य तस्मिन्राशौ निधापयेत्।
शालीं धान्यं च रत्नं च स्वर्णं पद्मं च शर्करा॥
घटान्तः पूरयेन्मन्त्री तदङ्गं परिकल्पयेत्।
मातृकां गोलकन्यास षट्त्रिंशत्कलान्यपि॥
चतुर्नवति पीडा च पीडामुत्तरमीरितम्।
शरगायत्रिमन्त्रेण कल्पयेन्मस्तके घटे॥
तच्चक्षुरिति मन्त्रेण चक्षुमन्त्रं प्रकल्पयेत्।

श्रोत्राय चेति मन्त्रेण श्रोत्रमन्त्रः समीरितः।
विश्वतो ऊतेति मन्त्रेण त्वङ्मन्त्रः परिकीर्तितः॥
खट्फण् मन्त्रेण जिह्वायां तत्वमन्त्रं च नासिके।
अग्ना हेति च मन्त्रेण दन्तमन्त्रमुखं ततः।
अवन्तयेति मन्त्रेण मुखमन्त्रः समीरितः।
हृदिस्था देवतामन्त्रं हृदये सन्निधापयेत्॥
नीलग्रीवेति मन्त्रेण ग्रीवामन्त्रं प्रकल्पयेत्।
विष्णुर्योनीति मन्त्रेण गुह्यमन्त्रमुदीरयेत्॥
सविता पश्चेति मन्त्रेण हस्तमन्त्रः समीरितः।
यो रुद्र इति मन्त्रेण पार्श्वनाभिषु कल्पयेत्।
91a इदं विष्णुरिति मन्त्रैः पादमन्त्रं प्रकल्पयेत्।
गुल्फयोर्जानुजङ्घाभ्यां स्योना मन्त्रमुदीरयेत्॥
विष्णोरराटमन्त्रेण अस्थिपृष्ठे समीरयु।
तद्विष्णोरिति मन्त्रेण सर्वाङ्गं मन्त्रमुच्यते॥
पूजयित्वा ततो मन्त्री कलशं सर्वदेवताः।
आवाह्य होममूलेन सहस्राहुतिभिर्हुनेत्।
होमयेद्वास्तुराक्षोघ्नं शान्तिं प्रवरहोमकम्।
प्रायश्चित्तादि सर्वाणि जुहुयात्सर्वमन्त्रतः॥
कलशं तु समादाय मूर्तिपैः सह देशिकः।
वाद्युत्सवादिकैर्गेहं ग्राममन्त्रगरं प्रति॥
आचार्यो मूर्तिपैः सार्धं दैवज्ञैर्भूसुरैः सह।
वेदघोषैर्वाद्यघोषैः स्वस्तिसूक्तैः प्रभूतमैः।
सर्वभक्तजनैः सार्धं कलशारोपयेत्ततः।
शिखरे कलशं योज्य उत्तिष्ठ ब्रह्मणेति च॥

पूजयेद्‌ रूपमाणाद्यैः नामभिः कलशं गुरुः।
प्रार्थयेदुध्या भक्त्या पूजयेत्कलशं ततः॥
यावच्चन्द्रश्च सूर्यश्च यावद्धरा च तिष्ठति।
ग/
अ-6 तावत्त्वं प्रीतिभावेन शृङ्गेऽस्मिन्सन्निधौ भव॥
नमस्तुभ्यं चतुश्शृङ्ग यावत्तिष्ठति भूतलम्।
तावत्त्वं प्रीतिभावेन शृङ्गेऽस्मिन्सन्निधौ भव॥
कुम्भेश्वर नमस्तेऽस्तु कुलवृद्धिकरोत्तम।
शिलामयेन शृङ्गेऽस्मिन् सदा सन्निहितो भव॥
यावद्देवाश्च तिष्ठन्ति ऋषयो वसवस्तथा।
तावत्त्वं नवशृङ्गेऽस्मिन् तिष्ठ तिष्ठ परेश्वर॥
इति संप्रार्थ्य संपूज्य नवशक्त्यादिकैर्गुरुः।
कुशला कामिनी काली कल्याणी च कलाधरा।
कान्तिश्च कीर्तिश्च कुब्जा कामितार्थप्रदायिनी।
देवशृङ्गस्य कुम्भस्य कथिता नवशक्तयः।
इति शक्तिपदैः कुम्भं समभ्यर्च्याथ मन्त्रतः।

पुनः षण्मुद्रां दर्शयित्वा। अर्घ्यम्। कुम्भेश्वराय विद्महे। देवगर्भाय धीमहि। तन्नः कुम्भः प्रचोदयात्॥ इत्यर्घ्यम्।

ब्रह्मप्रजापति ऋषिः। विराट्‌छन्दः कुम्भेशो देवता। ओं हृदयाय। ह्रीं शिरसे। ह्रौं शिखायै। कुं कवचाय। कुम्भेश्वराय नेत्रत्रयाय हुं फट् स्वाहा अस्त्राय फट्॥ ध्यानम्।
कुम्भेश्वरं चामरपरं च धान्यं वरामयं चैव रसकपालम्।
शृङ्गाग्रबालं दधतं हसन्तं भजेद्ध्रदक्राशि शिलासमेतम्॥

इति ध्यात्वा ततो मन्त्रं प्रवक्ष्येऽहं महेश्वरि।
ओं ह्रीं ह्रौं कुं कुम्भेश्वराय हुं फट् स्वाहा

92a इति मन्त्रेण संजप्य यजेत्पुष्पाञ्जलिं ततः।
शतार्धनामभिः सार्धं पूजयेन्नटेश्वरः॥
स्वर्णरत्नादिकैः पद्मैः स्वर्णपुष्पैश्च शौक्तिकैः।
कुम्भस्य परितो दिक्षु विकिरेच्छालिनो बुधः॥
तद्दिग्विदिक्षु कुर्वीत काष्ठदीपान्प्रबोधयेत्।
दशधान्यादिराशींश्च भूतान्नं फाल्गुनीयुतम्॥
दानं दशविधं तत्र कुम्भदानं प्रदापयेत्।
भूसुरान्भोजयेत्पश्चाद्दक्षिणां पूर्वमुक्तवत्॥
कलशारोपणं कर्म मयेत्युक्तं सुखप्रदम्।
सर्वसंपत्करं दिव्यं शान्तिदं च यशःप्रदम्।
सर्वव्याधिहरं सौख्यं सर्वमङ्गलदायकम्।
पुत्रपौत्रप्रपौत्रादिवंशवृद्धिकरं प्रिये॥
ऐहिके बहुभोगांश्च सम्यग्भुक्त्वा नरोत्तमः।
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्॥
तत्पदं समवाप्नोति कलशारोपणात्प्रिये।
ब्रह्महत्यादि पापानि विनश्यन्ति न संशयः॥
वाञ्छितार्थं भवेदाशु परमैश्वर्यवान्नरः।

इति श्री परमरहस्य वातुलतन्त्रे नित्यखण्डे पार्वतीशिवसंवादे
पञ्चमभेदे सर्वदेवयोग्यशिखरप्रोक्षणकलशा-
रोपणकर्मविवरणं नाम सर्व(?) शतोत्तरः पटलः।

श्री शिवाय नमः।

—x—

92-b शिवादिसर्वदेवानां कथितं गेहलक्षणम्।
तत्परिग्रहणं तेषां विस्तराच्छृणु पार्वति॥

शिलाद्यैर्निर्मितं गेहं संपूर्णे लक्षणान्विते।
सम्यक्समीक्ष्य तं गेहं शिल्पिनं प्रति देशिकः॥
गेहबन्धनकर्माणि जायन्ते वा नवानघ।
प्रतिष्ठादिवसासन्नः शीघ्रं कुरु मनोहरम्॥
इत्युक्त्वा तं निवार्याथ प्रतिष्ठासाधनं पुनः।
संगृह्य सर्वसंभारं ततो गेहं परिग्रहेत्॥
प्रतिष्ठादिवसात्पूर्वं देशिको मूर्तिपैः सह।
नित्यकर्माणि निर्वर्त्य वपयेत्क्षुरमन्त्रतः॥
सुतक्ष्णां मृत्तिकाद्यैश्च सुस्नात्वा तद्विधानतः।
द्विजो द्विजेतरो वापि क्षत्रियो वैश्यजोपि वा॥
शूद्रो वा चैव तत्कर्ता शिल्पिना सह भक्तितः।
सर्वाङ्गं वपनं कुर्याद्विधिवत्स्नानमाचरेत्॥
यजेद्विघ्नपतिं चादौ नान्दीकर्म तयोः पृथक्।
पृथक्तयोश्च पुण्याहं वाचयेत्तदनन्तरम्॥
सेचयेद्भूसुराः सर्वा देशिकादि द्विजोत्तमाः।
प्राशयेन्मधुपर्कं च मृत्तिकाहरणं तथा॥
ध्वजं संस्थाप्य संभोज्य भूसुरान्भूतवित्तमान्।
यागभूमिं च तद्रात्रौ संशोध्योक्तविधानतः।
93a बीजानि वापयेद्विद्वान् लक्ष्मीबीजेन कौतुकम्।
कर्तुर्दक्षिणहस्ते तु बद्ध्वा तन्मूलमन्त्रतः।
त्वष्टुः प्रजापतेर्मन्त्रं स्मृत्वा सूत्रं यजेत्परम्।
वामहस्ते तु तच्छिल्पी बिना मन्त्रेण बन्धयेत्॥
शिल्पिदेशिकयोः पश्चान्मकुटं कुण्डलादिकम्।
अङ्गुलीयं चोत्तरीयं हारकेयूरकङ्कणम्॥

हेमयज्ञोपवीतं च सुवस्त्रं च दुकूलजम् ।
यथेप्सितं धनं दासीदासं गां महिषीं गृहम् ॥
ग्रामागारं च रत्नानि शय्यां सर्वाङ्गभूषणम् ।
दत्वा तयोश्च संतोष्य प्रार्थयेच्छिल्पिनं पुनः ॥
प्रार्थनां शिवगेहाग्रे दुर्गागेहाग्निगोचरे ।
दक्षिणे स्कन्दगेहस्य विघ्नगेहस्य पश्चिमे ।
वायव्यां शास्तृगेहस्य शिवविष्णोर्विवर्जिते ।
शांकरे विष्णुगेहस्य शेषे देवालये पुनः ॥
दैत्यदेशे च संप्रार्थ्य वक्ष्यमाणविधानतः ।
शिलाभिर्निर्मितं गेहं दृढं सौम्यं त्वया कृतम् ॥
देहि मे शिल्पिशास्त्रज्ञ स्थापनार्थं हरेरिति ।
93b त्वया संस्थापितं पुण्यं दशांशं देहि मे वि(प्र)भो ॥
तद्गृहीत्वा मुदा गेहं प्रदास्यामि नरोत्तमः ।
हरेः संस्थापनं पुण्यं न दास्यामि कदाचन ।
त्वयेप्सितं धनं रत्नं गृहाणालयकारक ।
मया कृतमिदं गेहं दृढं सौम्यं शिलालयम् ।
गृहाणाहं प्रदास्यामि प्रतिष्ठार्थं हरेर्विभो ।
इत्युक्त्वा कारको भक्त्या छेदनीं मर्दनीं पुनः ॥
मानदण्डं च संपूज्य तत्र तत्र यथाक्रमम् ।
स्वबीजं विलिखेत्ताभ्यां तत्र पूर्वोक्तके स्थले ॥
प्रतिष्ठाकर्तृकर्मज्ञः अग्निं गेहोत्तमोत्तमे ।
उदीरयन्स्वमन्त्रांश्च दद्याद्गेहं प्रहर्षितः ॥
तद्गेहं च स्वयं कर्ता गेहमन्त्रैः परिग्रहेत् ।
ततः स्वभूषणं सर्वं कुण्डले मकुटादिकम् ॥

शिल्पि देशिकयोर्दत्वा देशिकं प्रार्थयेत्पुनः।
नमस्ते सर्वमन्त्रज्ञ तत्त्व मन्त्र प्रबोधिका॥
नवीकृतमिदं गेहं शुद्धिं कुरु मन्त्रतम।
हरेः संस्थापनं विप्र कुरु मन्त्रक्रियां गुरो॥
९५a देशिकेन्द्रमिति प्रार्थ्य तस्य हस्ते च तं विसृजेत्।
इति संप्रार्थ्य विप्रेन्द्रं प्रतिष्ठाकर्म कारयेत्।

इति श्रीवातुलोत्तरे नवगेहपरिग्रहलक्षणम्॥

*

अथ नवगेहपूजाविधिरुच्यते। गेहपरिग्रहानन्तरं गेहपूजां कुर्यात्। तत्प्रयोगः — गुरुगणपत्यादि आधारशक्त्यादिपीठं संपूज्य नवशक्तिः। ओं जयायै। अभयायै। क्षमायै। सौम्यायै। ध्रुवकलायै। मङ्गलप्रदायै। श्रीप्रदायै। भोगदायै। विश्वायै। ओं नमो भगवते इत्यादि। ओं विष्णुगेहमूर्तिमावाहयामीत्यावाह्य। आवाहनादिसप्तमुद्राः प्रदर्श्य। क्रुद्धोल्कायेति पञ्चाङ्गं विधाय। नारायण ऋषिरित्यादि ध्यानान्तं कृत्वा। नारायणाय विद्महे इत्यादि आसनादि उपचारान् कुर्यात्। अङ्गपूजां करिष्ये। ओं विष्णुपञ्जराय नमः। पादौ पूजयामि। विष्णुनिलयाय जङ्घे। विष्णुपदे। जानुनी। वैष्णवालयाय ऊरूम्। वैकुण्ठनारायणवनाय। कटिम्। विष्णुस्थानाय। गुह्यम्। विष्णुगेहाय नाभिम्। विष्णुगर्भाय हृदयम्। सर्वगोत्तमाय कण्ठम्। हरिनिवा-
९५b साय मुखम्। विष्णुगणसेविताय नासिकाम्। विष्णुलीलाय नेत्रम्। सर्वदेवगणावृताय ललाटम्। सर्वमुनिगणान्वितायः शिरः। सर्वात्मालयाय। सर्वाङ्गम्। इत्यङ्गपूजा॥

अथावरणम्। अङ्गैः प्रथमावरणम्। शान्तात्मने। शान्तिदाय। चक्रदण्डाय। पद्मदण्डाय। हरये। पद्मप्रियाय। पद्मोपमाय। इति द्वितीयम्॥

विष्णवे। भवविष्णवे। प्रभविष्णवे। महाविष्णवे। विश्वभर्त्रे। विशालाक्षाय। विश्वमणये॥ ३॥ हरये। हर्षवर्धनाय। हविर्भुजाय। होमनिरताय। हेमवर्णाय। नरप्रियाय। हुंकारयुक्ताय॥ ४॥ कुमुदाय। कुमुदाक्षाय। पुण्डरीकाय। वामनाय। शङ्कुकर्णाय। सर्वनेत्राय। सुमुखाय। सुप्रतिष्ठिताय॥ इति पञ्चमम्॥ ब्राह्म्यादि ६॥ इन्द्रादि॥ ७॥ वज्रादि॥ ८॥ केशवादिद्वादशनामपूजामन्त्रं धूपदीपनैवेद्यताम्बूलनीराजनमन्त्रपुष्पं कृत्वा परितः अष्टदिक्षु बलिं दत्वान्तः प्रविश्य प्रार्थ्य समापयेत्॥

तन्त्रान्तरे –

अङ्कुरं प्रथमं प्रोक्तं ध्वजं स्थाप्य द्वितीयकम्।
तृतीयं तु प्रतिष्ठां च चतुर्थं चोत्सवक्रिया॥
एवं चतुर्विधं भेदं ज्ञात्वा कर्म समारभेत्।
95a आचार्यलक्षणं वक्ष्ये सर्वतन्त्रानुसारतः॥
गुरुपुत्रो गुणातीतो मेधावी कुशलक्रिया।
संप्रदायी चोपदेशी सर्वतन्त्रविशारदः॥
मितभाषी सत्यवादी दयालुश्च जितेन्द्रियः।
एवं गुणज्ञो तन्त्रेषु आचार्यं कल्पयेद्बुधः।
गन्धपुष्पैः समभ्यर्च्य वसनाभरणादिभिः।
दद्यान्मद्दक्षिणां चैव तेन तन्त्राणि कारयेत्॥
उत्सवार्थे ध्वजं कुर्यात्क्रमुकं वैणवं तथा।

वृषमूर्तिं पटे कुर्यान्दग्ने मूर्तिं न कारयेत्।
दण्डाग्ने स्थिरमूर्तिः स्यात् ग्रमूर्तिं पटे लिखेत्॥
पटं नियोजयेदग्रे अग्रे मूर्तिं न कारयेत्॥श्रुतिः॥
स्वस्तिकं विलिखेदग्रे श्रीहिलव्धुव्नशालिभिः।
सर्वोपकरणं स्थाप्य गन्धपुष्पैः समर्चयेत्॥
ततो गर्भगृहं गृत्वा यजमानस्त्वलंकृतः।
कटकं यज्ञसूत्रं च वस्त्ररत्नाङ्गुलीयकम्॥
सर्वोपकरणं दद्याद्दाराय शिवमन्दिरम्।
संतोष्य शिल्पिमुख्यांश्च ततः कर्माणि कारयेत्।
पुण्याहवाचनं पश्चात्ततः कर्माणि कारयेत्।

इति नवागारपरिग्रहविधिः॥

—×—

आचार्यः तोषितो येन तोषिताः सर्वदेवताः।
आचार्यं दूषितो येन दूषिताः सर्वदेवताः॥
तन्त्रमन्त्रविहीने तु अरिष्टं चागमज्ञयोः।
शिल्पिशास्त्रे कृतं हीन मरिष्टं शिल्पिनो भवेत्।
द्रव्यहीने कृतं कर्म अरिष्टं यजमानयोः।
यदि दूषितबिम्बेषु अरिष्टं यजमानयोः॥
तद्दोषपरिहारार्थं दोषशान्तिं च कारयेत्।
तस्मात्सर्वप्रयत्नेन कुर्यादाचार्यतोषणम्।
सन्तोषेण तु सान्निध्यं भवतीत्यागमोदितम्॥
आगमज्ञं कुलीनं च कुटुम्बिं कुशलान्वितम्।
साम्प्रदायी गुणातीतं सर्वमन्त्रोपदेशिनम्।
मितभाषी सत्यवादी शिवभक्तात्मको गुरुः।

शिवस्याद्धिकं प्रोक्तं शिवभक्तस्तु तात्त्विकः।
९८a स एव शिवरूपः स्यात् मन्त्रराजसुरद्रुमः॥
विम्बस्य शक्तिर्महती च मूलमाचार्य शक्ते र्बलवान्प्रभावः।
आचार्य मन्त्रोऽपरतस्तु भेदो नैवास्ति तस्मादर्च्य गुरुं तम्।
धनेन धान्येन च गोकुलेन
यानेन छत्रेण परिच्छदेन।
आचार्यमत्युन्नत दक्षिणाभिः
संपूजयेन्मूर्तिधनैः कृतं तम्॥
आचार्यं पूजयेत्पश्चात्कर्ता कर्मान्ते गोधनांशुकैः।
स भवेत्तत्फलं कर्तुः वर्षाभूमिरिवाफलम्॥
आचार्यमवमन्ये चेत्पूजयेत्सर्वकर्मसु।
न भवेत्तत्फलं तस्य नार्द्रवृक्षफलं यथा॥
गवामभावे निष्कं स्यात्तदभावेंऽशुकं स्मृतम्।
अन्यैर्नानाविधैर्द्रव्यैः कर्तव्यं चार्यपूजनम्॥
आचार्यं नार्चितं कर्ता कर्मान्तेषु द्विजोत्तमम्।
तत्सर्वं निष्फलं याति तस्यायुर्निष्फलं ध्रुवम्॥
आचार्ये नार्चिते मूढा मन्त्राणां वर्णसंख्यकम्।
यावद्वर्षसहस्राणि तावद्दुर्गतिमाप्नुयात्॥
आचार्यमर्चितं कर्मान्ते यः कर्ता दक्षिणादिभिः।
संपूर्णं कुरुते तस्य प्रजा सोग्यान्वितं भवेत्॥
शतकोटिस्वर्णदानैः धेनुभिः शतसंयुतैः।
आचार्ये नार्चिते तस्य तत्सर्वं निष्फलं भवेत्॥
हिरण्यं गां महीं चैव रत्नवासांसि कुञ्जरम्।
आसनं चित्रवस्त्रं च भूषणं छत्रचामरम्॥

96b अर्चनाद्युचितं कार्यं तत्तद्द्रव्यादिभिः स्थितैः।
आचार्याय ददेत्सर्वमलंकारादिभिः सह।
यदि हीनेन तत्कर्ता प्रायश्चित्तं पुरोदितम्।
यजमानोऽथ संध्यात्म आचार्यं शिवरूपिणम्॥
उक्तद्रव्यैश्च संपूज्य नमस्कृत्य पुनः पुनः।
सिद्धान्तशेखरे —
मण्डले गन्धपुष्पाद्यैः शिववन्मूर्तिपादिकान्।
यजमानस्ततो दद्याद् गुरवे दक्षिणां यथा॥
मूर्तिपेभ्यस्तथान्येभ्यो दक्षिणां प्रोच्यते बुधाः।
एकद्वित्रिकराणां च लिङ्गानां दैर्घ्यमानतः।
निष्कैरङ्गुलिसंख्यातैस्तत्पादोनैस्तदर्धकैः।
दक्षिणा देशिकस्योक्ता ज्येष्ठमध्यकनिष्ठितः॥
प्रत्येकं त्रिविधाश्चेति नवधा दक्षिणोदिताः।
चतुर्हस्तस्य लिङ्गस्य तथा पञ्चकरस्य वा॥
षट्करस्य च दैर्घ्यस्य निष्कैरङ्गुलसंख्यया।
द्विगुणैस्तत्पदन्यूनैः सहार्धैर्दक्षिणात्रयम्॥
प्रत्येकं त्रिविधं चैव नवधा चोत्तमादिकम्।
सप्ताष्टनवहस्तानां लिङ्गानामपि दैर्घ्यतः॥
तत्तदङ्गुलसंख्योक्तैर्निष्कैराचार्यदक्षिणाम्।
पादादित्रिद्विलिङ्गानां तद्दैर्घ्याङ्गुलसंख्यया॥
निष्कैरुक्तप्रकारेण कल्पनीयं च दक्षिणा।
97a लिङ्गानां बहुमूल्यानां रत्नजानां विशेषतः॥
स्वर्णराजतजातानां बाणदेवादिकस्य च।
सर्वप्रासादयोग्यत्वात्प्रासादार्धेन दक्षिणा॥

आचार्याय प्रदातव्यं पादोनं वा तदर्धतः।
रत्नजे चललिङ्गे तु निष्कैरष्टभिरुत्तमम्।
एकाङ्गुलप्रमाणेऽपि तत्पादीन तदर्धतः।
अङ्गुलादिषु लिङ्गेषु रत्नभेदादिकेष्वपि॥
द्वित्रिनिष्कविहीना स्याद्दातव्या गुरुदक्षिणा।
अथवान्यप्रकारेण प्रोच्यते गुरुदक्षिणा॥
उत्तमे निष्कसाहस्रं लिङ्गे मध्ये तदर्धकम्।
तदर्धमधमो ह्येव मष्टोत्तरशतं तु वा॥
अथवाल्पवित्तानां प्रोच्यते गुरुदक्षिणा।
उत्तमं स्यात्तु षष्टिनिष्कं मध्यं तदर्धतः॥
तस्यार्धतः कनिष्ठं स्यादथवान्यप्रकारतः।
लिङ्गप्रतिष्ठाधनार्धं त्रिधा तद्विभजेद्धनम्॥
भागेनैकेन कुर्वीत प्रासादमपरेण तु।
नित्यपूजा प्रकर्तव्या शेषं तु विभजेत्त्रिधा॥
अत्रैकदक्षिणा प्रोक्ता द्वितीयं भोजनार्थकम्।
१७८ संभारार्थं तृतीयं स्याद्बुधा दक्षिणोदिताः॥
निष्कैः षट्त्रिंशता पादमध्यपञ्चाशतं तथा।
शकाशीत्युत्तमाः प्रोक्ताः दक्षिणास्त्रिविधा गुरोः।
एवं बहुप्रकारास्तु दक्षिणा ह्युदितास्वपि।
तत्रैकदक्षिणां दद्यात्कर्ता आचार्यभक्तितः॥
वित्तशाठ्यं विना भूमिं धनधान्ये गृहं गजम्।
रत्नं च दासीदासांश्च गृहोपकरणानि च॥
गोवस्त्राभरणादीनि दद्याच्छक्त्या विचक्षणः।
सोपस्करं तथा तल्पमपि वाहनमष्टपम्।

यथा संतोषमायाति गुरुः कर्ता तथाचरेत्।
मूर्तिपेभ्यो गुरोरर्धं तदर्धं द्वारजापिषु॥
शास्त्रज्ञे पिषु दैवज्ञे तत्समा शिल्पिने तथा।
द्वारजापिसमा देया दक्षिणा वास्तुपूजके॥
वेदाध्यायनकादिभ्य स्तत्समं वा तदर्धतः।
गृहयागे तथोक्तस्य स्वशक्त्या परिवारके।
दीनान्धकृपणादिभ्यो भूरिदानं यथोचितम्।
प्रतिष्ठा दक्षिणाहीनं यजमानं निहन्ति हि॥
१४० आचार्यो मन्त्रहीनाच्चोर्त्विजस्तिनं मानहीनके।(त)
अन्नहीनं दहेद्राष्ट्रं गोहीना यदि रैध्रुवम्॥
पुष्पहीनं तु पूजां च सा तृप्तिर्होमहीनतः।
वासोहीनं तु भर्त्यां च दीपहीनं दृशो हरेत्॥
तस्मात्सर्वप्रयत्नेन सर्वसंभारसंभृतम्।

इति सिद्धान्तशेखरे प्रतिष्ठाविषये गुर्वादि
दक्षिणाविधिः समाप्तः।

—×—

अङ्कुरादि यथोक्तेन कर्तव्यं चोत्सवक्रियाम्।
भक्तोत्सवान्तिकं कुर्यादिष्टानां सर्वसिद्धिदम्।
भाग्यप्रदं शान्तिकरं शिवप्रीतिकरं परम्।
शत्रुनाशकरं राज्ञः राज्यवृद्धिं च जायते॥
आयुरारोग्यवृद्धिः स्यात्सर्वसंपत्समृद्धिदम्।
तस्मादुत्सवं कुर्याद् दृङ्पूजां समारभेत्।
क्रमेण चोत्सवं कुर्यात् पुनः सूर्योदयान्तिके।
त्रार्पणं ततः कुर्यात् प्रसादं शुद्धनादृतः॥

पश्चात्संप्रोक्षणान्ते तु नित्यकर्म समाचरेत्।
इति शिवरहस्ये काम्यांतदीपमालाप्रयोगे
रङ्गपूजाकालनिर्णयम्॥

* [Fol 98b is blank]

99a स्वस्ति॥ निरीक्षाविधिरुच्यते॥
अष्टबन्धस्थितेः प्रोक्ते निरीक्षाकर्म उच्यते।
पुण्याहं वाचयेदादौ गुरुर्लिङ्गाग्रके स्थले।
स्वस्तिकासैति लिखेत्पश्चात् द्रव्यजालं न्यसेत्ततः।
ध्वजमूलं च गां बद्ध्वा सवत्सां मण्डनैर्युताम्॥
बोधयेद्रुद्रदीपौघान् वादयेत्पणवादिभिः।
पूजयेद्देवदेवेशं योजयेत्तत्त्वमञ्जिकान्।
भोजयेद्द्विजमुख्यांश्च दक्षिणां दापयेत्ततः।
निरीक्षाकर्म इत्युक्तं तस्याः कालं वदाम्यहम्।
त्रिकालस्या निरीक्षायां बन्धान्ते तत्परे दिने।
चतुर्थे स्नपने कुर्यात् कार्या निरीक्षा लिङ्गभेदतः।
स्वायम्भुवे साम्भलिङ्गे महालिङ्गादिके स्थले।
बाणलिङ्गे चादिशक्तौ ऋषिदेवप्रतिष्ठिते॥
सद्यो निरीक्षा कर्तव्या बन्धान्ते बुद्धिमान्नरः।
तदृते कर्म भङ्गत्वं निष्फलत्वं भवेद्ध्रुवम्॥
चरलिङ्गाद्यन्यलिङ्गे तत्परे स्नपने तथा।
तस्मात्सद्यः प्रकर्तव्यं निरीक्षाकर्म देशिकः।
कालभेदो मयेत्युक्तं द्रव्यमान वदाम्यहम्।
व्रीहिं च तण्डुलं चैव गोधूमं चणकं तथा॥
मुद्गमाषकुलित्थांश्च ग्रीवकं सर्षपं तथा।

99 b आढकाङ्कुङ्कुलीवारं नालिकेरं गुडादिकम् ।
घृतं तैलं च शुभ्राभं नानाभक्ष्यसमन्वितम् ॥
कूश्माण्डं सफलैर्युक्तं दीपवर्तिसमन्वितम् ।
हरिद्राचूर्णसंयुक्तं दधिक्षीरादिवस्तकम् ।
सप्ताधिकदशद्रव्यं निरीक्षायां मयेदितम् ।
द्रव्यसंख्या च वक्ष्यामि संक्षेपेण सुरेश्वरि ॥
दशद्रोणमितं धान्यं तदर्धं तण्डुलं भवेत् ।
गोधूमं च चतुर्द्रोणं चणकं द्रोणयुग्मकम् ॥
द्रोणत्रयं मुद्गमाषं सार्धद्रोणं कुलित्थकम् ।
शिम्बकं सर्षपं द्रोणं तिलं द्रोणार्धमुच्यते ॥
आढकं कङ्कुलीवारं द्रोणं द्रोणं प्रशस्यते ।
सप्ताधिकदशद्रव्यमाचार्याय प्रदापयेत् ॥

इति श्री वातुले प्रतिष्ठादिकर्माणि निरीक्षाविधिः ।

—x— [Space for 4 lines is left on 99 b]

[स्वस्ति]

Copied from a ms. with no. RE. 43228 belonging to IFI. Pondicherry.

Fol. 99, 12.6. 34x5.2cm. 8-11 lines on a page. Telu medium writing in more than one hand. Kept in smoke. about 1700 AD.

[At the end of this ms. there are twelve fol. with separate serial numbers in letters. The title is not found. The subject is muhūrta] [The title may be मुहूर्तागम. See the first colophon.

मुहूर्तागमः

1a स्वस्ति। गर्भाधानं पूर्वमारभ्य पुंसो
वेदोक्तं यत्प्रति कार्यावसानम्।
कर्मान्तेकं विद्यते तस्य पूर्वैकर्त्तुं॥
ख्यातिमासो मुहूर्तम् ? ॥१॥
(नै) दोषाध्याय निरूपितान्कालयुतान्दोषानशेषां स्त्यजेत्
अध्यायं कथिता निजे शुभगुणा ग्राह्या यथासंभवम्।
अत्यान्योन्य गणाः शुभा निगदिताः सर्वत्र सामान्यतः
तं तत्राभिदध्मे पुरा यदि पुनः काश्चिद्विशेषः क्वचित् ॥२॥
विभावरी षोडश भामिनीनां ऋतुः क्रमाद्या ऋतुकालमाहुः।
नाद्याश्चतस्रोऽत्र निषेकयोग्याः परास्तु युग्माः सुतदाः प्रशस्ताः।
शीतज्योतिषि योषितोऽनुपचयस्थाने कुजेनेक्षिते
जातं गर्भफलप्रदं खलु रजस्त्वन्यथा निष्फलम्।
दृष्टेऽस्मिन्गुरुणा निजोपचययुगे कुर्यान्निषेकं पुमान्
अव्याज्ये च समूलभे शुभगणे पर्वादिकालोज्झिते॥
वीर्याढ्यौ तनवांशगावुपचये पुंसोऽर्कशुक्रौ यदा
योषायाश्च तदा निशाकरकुजौ गर्भस्तदोत्पद्यते।
वायौ दक्षिणभागगे सुरगुरौ लग्नत्रिकोणाश्रिते
पुंराशौ सुतरांशके पुरुषभे तत्कर्म पुत्रप्रदम्॥
भास्वत्सूर्योज्जीवौ वीर्यवन्तौ विलग्ना
द्वौजे राशा ओजराश्यंशके वा।
जीवेन्दू वा पुत्रदौ लग्नसंस्था-

वन्ध्ये चास्मिन् ईदृशाः सन्ति योगाः ॥
कुर्यात्पुंसवनं स्मारमणभे पुष्येपि वा सङ्ग्रहे
लग्नस्थे निधने ग्रहेण रहिते मासे तृतीये बुधः।
शस्तौ दृश्युदयौ सितामृतरुचोर्नाग प्रमाणं ततः
क्षीणार्कर्क्ष . . . . . रुशायोऽन्ये शुभाः।
चित्राश्विवायुवसुवारुण मैत्रयुक्तं
त्याज्यं गणं च परिहृत्य गणाः शुभोऽन्यः।
सीमन्तकर्मणि न कीटनृहरी प्रशस्तौ
कालोपि नामकरणे च निषेकतुल्यः ॥ ८ ॥
उच्चस्थितेन विहगेन युतेच दृष्टे
लग्ने कृतं भवति नाम भुवि प्रसिद्धम्
नीचस्थितेन विफलं सुहृदृक्षकेण
लोकप्रियं परमप्रीत्यवदत्र सिद्धः ॥ ९ ॥
गृहान्निष्क्रमणं पूर्वमेव निष्क्रामणं शिशोः
चतुर्थे मासि कर्तव्यं कालप्राशनवत्स्मृतम् ॥ १० ।
मासस्यजननादिकोर्कगतिजः षष्ठोऽष्टमो वा समः
कैश्चित्पावनसंज्ञितो निगदितः स्याद्यन्तसौ रुक्तमम्
बालस्य प्रथमान्नभोजनविधावत्याज्ययुक्तो गणः
त्याज्यस्तोऽपि शूर्पनैर्ऋतमघा ग्राह्यान्नवान्नाशने ॥ ११ ॥
अष्टौ मुक्तिषु राशयोतिशुभदा नीचाधरो मध्यमौ
मीनः सङ्गमसंगमे क्षणयुतो ग्राह्योऽन्यथा निन्दितः।
नीचाजौ न शुभान्वितावपि शुभौ शस्ता शुभस्यांशकाः
द्रेष्काणा अशुभस्य दर्शा हिमरुचे मध्या परस्या शुभाः ॥ १२ ॥
द्रेष्काणमिन्धो रुदयांशवारान्

भुक्तान्निष्ठानवरद्रुसिद्धः।
मध्यान्युक्तानि पतिरप्रशस्तान्।
क्षीणस्य पूर्णस्य च तान्प्रशस्तान्॥ १२॥
सौम्यान्तसेमे चन्द्रबुधौ च धर्मे
षष्ठे च शुक्रस्सहजे च दीवः।
लग्ने च चन्द्रो गगने च सर्वे
कालस्य नेष्टाः प्रथमान्नभुक्तौ॥ १४॥
सौम्यांशे त्रिहीष्टकर्मणि गुरौ केन्द्रत्रिकोणाश्रिते।
पापे नैरिभवान्त्यजेषु बलिनि प्राप्ते च केन्द्रे शुभे।
भ्रान्तृस्यन्तमस्तु भास्करस्तगुरुः चन्द्रोऽपि सत्कर्मकृत्
तृष्मान्त्यादिषु शुक्रचान्द्रवयो भौमेऽर्कजे वा भवेत्।
केन्द्रे जीवोऽर्कशुक्रौ भवादौ शुक्रः केन्द्रे सौरिः दिन्दुस्त्रिकोणे।
याते योगाः श्लोकपादादिता षट् भुक्तौ कुर्वन्त्यायुरारोग्यपुष्टिम्॥ १६॥
वस्त्रकेन्द्रचतुष्ककोणमुरजि त्रित्रा परैश्चोन्त्रराः।
प्रोक्ता नक्रेयुताः शुभाः शुभग्रहाः त्याज्याः परे राशयः।
तिथ्युक्षाणि शुभानि सन्धिरहितान्यग्नीन्द्रयुक्तांस्त्यजेत्
पापानात्मनि कर्णवेधनविधौ सर्वाङ्ग्रहांश्चायुषि॥
कुर्वीत चौलं विषमे तु वर्षे त्याज्यं समेऽत्रं च सपर्वनन्दम्
हित्वा यणं वेष्मसु सद्गृहाणां नुयाद् हीनेषु मृगान्तिलेषु॥ १९॥
चौलविधौ व्यसनं मृगराजे योगभयं क्रियकीटघटेषु।
२० धान्विनि राजभयं युक्तौ चापहरी चशुभौ निदुरन्ये॥ २०॥
चौलकर्तृपञ्चमे जन्मलग्ने जन्मानिष्टं मध्यमं लग्नमेके।
प्राहुस्ताभ्यामष्टमौ भे विवर्ज्यौ ग्राह्यं लग्नादष्टमं स्वामिमैत्र्यम्।
पुत्रो भार्या गर्भिणी यस्य नासौ सूनोश्चौलं क्षौरकर्मामनश्च।

गेहारम्भं स्तम्भसंस्थापनं च वार्धौ स्नानं दूरयात्रां च कुर्यात् ॥
स्वजन्ममासे विलासां चौलमायुः क्षयावहम्।
तत्रापि केचित्कुर्वन्ति सहोपनयनेन तत् ॥
चौले भयं दिनकृतो दिवसांसकेषु
चन्द्रस्य कान्तिरवनीतनयस्य मृत्युः।
चान्द्रेस्तु राज्यविभवो विजयो गुरोस्तु
व्याधिः शमे रुशमसो भुवनप्रियत्वम् ॥ २४ ॥
नागेन्द्रद्रिमितान्कुजार्कशनिजा दोषाश्च वारादयो
मासांश्चौलविधौ हरन्त्यथ नृणां तान्वर्धयन्त्यायुषि।
रुद्राक्षीषु हरिन्मितान्कविशशी स्वाचार्यजाता गुणाः
कुर्युर्दिग्त्रिगुणं शुभाः पुनरिदं स्वर्क्षस्य तुङ्गस्थिताः ॥
३० रोगं लग्नगतः करोति दिनकृच्छस्त्रां मृतिं भूमिजः
लावं शीतकरो दिवाकरसुतः चौले विनाशं शिखाः।
तच्चन्द्रकेण सुताङ्गशांकरहितः मृत्युप्रदः सप्तमे।
गेह
सर्वेप्यष्टमगानुजा न्तु शुभजाद्या शुक्रोच संप्रत्प्रदः ॥ १ ॥ ?
क्षौरेपि चौलविहितः समयः समानो
ज्ञेया द्विजस्य च रवेरुदयांशवाराः।
इन्दोस्सिता यक्षितिपतेः क्षितिजस्य सौरे
विट्सुतयो रुशानसो न शुभास्तु वारे ॥
राजाज्ञायां प्रत्यये मूर्धरोगे प्रायश्चित्ते यज्ञदीक्षा व्रतान्ते।
प्राप्तेन्यस्मिन्दुर्निमित्ते बलिष्ठं कुर्यात्सद्यः क्षौरमास्मिन्नदोषः ॥
अशुभे समये समये क्षौरे कृते पुनः क्षिप्रमाचरेत् सुशुभे।
शुभनक्षत्रे सुदिने श्मश्रु क्षौरं विधीयते केचित् ॥ ३० ।
मीनस्थे भृगुजे तनौ भवगते भानौ गुरुः कर्कटे

लग्नेन्दू आपती सलाभपतिदृग्योगौ भवेत्सद्गृहे।
लाभेऽर्के यदि मीनमेषवृषभे लग्ने सिते वापि वा।
(स्त्रेणा) ङ्के मिथुनादिकत्रिके सिते भानुर्व्यये वा भवे॥
पापैरुत्तमलाभशत्रुषु शुभे केन्द्रत्रिकोणेऽपि वा।
सत्कर्माहिमगुस्त्रिकोणभवने केन्द्रे गुरुर्वा बली॥
देवज्ञाय निरूपितान्खलयुतान् श्लोकैकपादोदितान्।
योगान्प्रादुरिमान् प्रयोक्तसमयान् लाभेऽपि चौले शुभान्॥
इति त्रिंशता पद्यबन्धैः सुबन्धैः
मुहूर्तागमे शुक्तिकाध्याय एषः।
निषेकादि चौलान्त कर्माभिधायी
समाप्तिं प्रपन्नोऽत्र षष्ठो वरिष्ठः।

—×—

विप्रस्याभिहितं द्वितीयजननं वर्षे शुभे सप्तमे
राजन्यस्य चतुर्भिरत्र सहिते वैश्यस्य च द्वादशे।
सूर्ये सौम्यमिथुनाश्रिते तदधमं कुम्भेणगे मध्यमं
श्रेष्ठं मेषझषाश्रिते सुरभिगे स्त्रीक्षे शरद्यन्यमाः॥ १॥
कर्तुर्जन्मगृहाद्धनागमसुतत्रिसप्तमकर्मे स्थितो
जीवो रिष्फसुहृत्पराभवरिपुस्थश्च त्वन्यथा चन्द्रमाः।
पापाः शत्रुभवान्त्यजेषु शुभदा रिष्फाहृते चन्द्रजः
शुक्रः सप्तमतोऽन्यराशिषु बन्धं परं श्रेष्ठो द्वितीयोद्भवे॥ २॥
कर्तुर्द्वयोर्जन्मविलग्नराश्योः
स्तत्काललग्नस्य हिमत्विषश्च।
स्थानेऽष्टमे सद्भिरसद्भिरैच्य
विशुद्धिमेके निलयादिनाहुः॥ ३॥

भूभौमाभिहिते यदत्र नियतं तत्काललग्नाष्टमे
शुद्धिं मित्रुन कर्तृजन्मनि धने शुक्रेन्दुपुत्रौ शुभौ।
आयुर्भङ्गकृतः परे सुरगुरुः दुःखप्रदश्चन्द्रमा
५१ रन्ध्रर्क्षोऽपि तथैव मध्यमफला पापाः स्ववर्गोऽशगाः॥ ४॥
कर्तुर्विलग्नाग्रहगो मृगेन्द्रः पापोऽपि पूजार्थिरुपैति शान्तिम्।
जन्माष्टमस्थस्य न तस्य शान्तिः कालात्ययं नामपि केचिदाहुः।
वर्गोऽशे बलिनी द्वितीयजननं त्रैवर्णिकानां शुभं
सर्वेषामपि वीर्यशालिनि तथा जीवेन्दुनीदृशां शुभ्रु।
शाखास्वामिनि केन्द्रगे बलयुते वारे च तस्योत्तमं
तस्मिन्क्षीणबले तथा सुरगुरौ शुक्रे च तन्नेष्यते॥ ६॥
चित्रामित्रवसूत्तरादितिविधिब्रध्नेन्दवः पूजिताः
पुण्यान्त्याच्युतवारुणाश्विमरुतो मध्या द्वितीयोद्भवे।
क्षौणीमङ्गलसामिचैन्यमरराट् संख्यातिथिर्निन्दिता
त्याज्योऽनध्ययनोऽपि लोऽपि समयः शुक्ले च षष्ठी शुभा॥ ७।
मूर्खो निद्रान्वीधवान्वेदवादी शल्पी धीमांल्लब्धवाणिज्यवृत्तिः।
पापी पूज्यः क्रूरदृगी राजदूतः शास्त्रार्थज्ञः स्याच्च संबादिलग्ने॥ ८॥
शस्त्राजीवरतिस्वजातिसमया भ्रष्टो महापातकी
विद्यासुखमतिप्रकर्षसहितस्वायुष्य विद्याधनः।
विद्याज्ञानसुखायुरादिगुणवान् विद्यायुरर्थोज्झितः
५६ सूर्याद्यंशगते कृतोपनयन श्चान्द्रक्रमाज्जायते॥
क्रौर्यं जडत्वं बहुपापबुद्धिः सुवाटवं यज्ञरतिः सुबुद्धिः।
मौरर्व्यं च पुंसां क्रमशो विलग्ने दिनेश्वराद्यंशफलं प्रदिष्टम्॥ १०॥
वैश्यवृत्तिरिह केन्द्रगे विधौ भूपदेवनरतो दिवाकरे।
शस्त्रवृत्तिरवनीसुते पुमान् जायतेऽन्त्यजसमाश्रितः शनौ॥ ११॥

कवित्वं गुरुत्वं बुधत्वं च केन्द्रे
शुभाः स्त्रीन् गुणान् संप्रयच्छन्ति नृभ्यः
गुणाख्य स्वकीयस्य दानेन चित्रं
यदत्रान्ययोर्दानमत्यद्भुतं तत् ॥ १२॥
लग्नस्थो मरणं नृपादि न रविः शस्त्राच्च तद्भूसुतो
विध्यस्ते रविजस्तमोऽङ्गविनतिं कुष्ठादिरोगाञ्छिखी ।
विद्यासुख्य सुखार्थबन्धुसुपचयं जीवज्ञशुक्रा नृणाम् ।
शाक्ले शुक्रफलं करोति बहुधा मन्दोऽपमध्यं चन्द्रमाः ॥ १३॥
क्रूरं सुखं रादभयं विपदं समृद्धिं
नाशम्मृतिं व्यसनमापदमर्थसिद्धिम् ।
हानिं च दद्युरशुभाः क्रमशो धनादि-
स्थाने षडष्टरहितेषु शुभास्त्वभीष्टाः ॥ १४॥
कुजार्कजौ बन्धनदौ व्ययस्थौ
विद्याच्छिदौ तौ धनबन्धुसंस्थौ ।
5a व्ययस्थमर्कक्षितिजाभिपश्यन् ।
आचार्यमन्धं कुरुते बलाढ्यः ॥
वित्तान्त्यगौ द्रविणगौ व्ययगौ रवीन्दोः
ताराग्रहैर्दुरुधुरा सुनभामनभाख्याः ।
तस्य द्विषण्मदनमृत्युगतैश्च सौम्यैः
प्रोक्ताधियोग इह ते शुभदास्तु योगाः ॥ १६॥
ये ये योगा जन्मनिष्ठाः प्रदिष्टाः ते ते सर्वे चोपनीतौ प्रशस्ताः
तत्रानिष्टा ये च तेऽत्राप्यनिष्टा भावस्थानं लोकनादीनि तद्वत् ॥ १७॥
केन्द्रे देवगुरौ भवे दिनकरे चन्द्रे शुभांशस्थिते
लग्नार्यानुजगे सिते गुरुबुधौ केन्द्रेऽनुकूलाः परे ।

स्वर्क्षस्योच्चगते सिते यदि गुरुः केन्द्रे त्रिकोणे बली
सौम्यांशेषु विधौ बुधार्कभृगुजाः कर्माय लग्नस्थिताः ॥ १८ ॥
गोमेषेन्दुगृहेषु शुक्रदिनकृच्चन्द्रेषु वीर्योदये
मीनेन्द्वास्पद मेषपश्चिममुखत्र्यंशेषु शुक्रेन्दिना ।
चेत्स्थे वापि मनोभवे तनुगतः शुक्रो गुरुर्वा क्षपे ·
योगाः सप्त नृणामिहोपनयने प्रोक्ताः शुभाः सिद्धिदाः ॥ १९ ॥
विद्यापक्रमणे द्वितीयजननं प्रोक्ता· समानो विधिः
क्षिप्राः श्रोत्रतमाश्च शसभ्र दवचच्छेषा स्थिरा मध्यमाः ।
तारानत्पितराः शुभाः स्थिरग्रहा वर्ज्याः स्थिरा मध्यमाः
श्रुतमानः शुभदाश्च सूर्यशशिनो वर्गौ हनी मध्यमे ॥ २० ॥
56 करोति विघ्नं किल तत्र सप्तमी त्रयोदशी चेति वदन्ति सूरयः ।
मतो न पापः शुभदो विशेषतो बुधस्त्वव गौदयवासराः शुभाः ॥
नेमं मीनराशिं शुभमाह गार्ग्यो
वशिष्ठजीवौ प्रशशंसतस्तुम् ।
अतः समध्यो वसितः शुभश्च
शुक्रान्वितो जीवयुतेक्षिते वा ॥ २२ ॥
~~कृ~~(कृ?)षिविद्यायां मन्त्रिन्त्यजेभं वेदे च शकुनविज्ञाने ।
सङ्गीते च विशेषाद्ज विद्यायां च शस्यते सौम्यः ॥ २३ ॥
गन्धर्वे दितिपवनौ सामुद्रनीतिनाट्यनायेषु ।
वसुरेवतीन्दुकमलजमित्रादितयस्त्वशेषशास्त्रेषु ॥ २४ ॥
शास्त्राभ्यासमद्यानशनि युद्ध कौटिल्य कूपशास्त्रेषु ।
रौद्रोन्त राज विष्णुस्वात्यश्विनाश्च चित्रशास्त्रेषु ॥ २५ ॥
अति पूजिता धनिष्ठा आयुर्वेदे धनुर्वेदे ।
गजतुरगा वैद्यशास्त्रे मित्रभ भारोहणे तयोद्भवमम् ॥ २६ ॥

मूलान्त्य मातृवारुणपनवेदाङ्ग शास्त्र विद्यासु।
वरुणस्तु योगशास्त्रे वसुमित्रमहेशपूषणो गणिते॥ २८॥
वारुणोन्त्य प्राजापति पवनादितिविष्णवो र्थशास्त्रेषु।
विषशास्त्रेऽन्त्यभोगः श्रावणं आयास्तु चौर्यशास्त्रेषु॥
सर्वास्ववि(पि) विद्यासु क्षिप्रास्ताया विशेषतः शस्ताः।
कालविलम्बकृतोऽपि श्रुतधारणहेतव स्थिरा ज्ञेयाः॥
कन्यायामुदये रवौ बुधदिने चन्द्रात्मजेत्युच्चगे
६२ हस्ते ज्ञान्ध्य गतारवीन्दु शशिजा लग्ने रवौ विद्दिने।
वारे ह्रस्य विलग्नगौ शशिबुधौ हस्ते बुधांशस्थितौ
केन्द्रे जीवसितौ बुधेऽच युवते वर्गोत्तमस्थे तनौ॥ ३०॥
लग्नेऽर्के परमोच्चभागे बुधसितौ गोमीनयोः स्वस्थितौ
जे लग्ने च बुधांशगौ रविगुरुवारे गुरो ह्रस्य वा।
शुक्रेत्युच्चगते तनौ स्वदिवसे तद्वत्सवारे गुरौ
विद्योच्चक्रमणे विशिष्टफलदा योगास्तु सारस्वताः॥ ३१॥
स्वगृहोक्तशुभः कालो व्रतबन्धादिषु स्मृतः।
समावर्तनगोदान(नो)स्नानादिषु तु चौलवत्॥ ३२॥
श्लोकैर्द्वाभ्यां संयुतैस्त्रिंशता स्तौ
विद्यारम्भं सोपनीतं प्रशंसन्।
अध्यायोऽयं पार्वतीरुग्गमीच्य
भातर्यस्मिन्सप्तमः पूर्णआसीत्॥

प्रश्नलग्नबलतः करग्रहे भाविशंसति शुभाशुभं सुधीः।
स्याद्विवाहविदिह ग्रहस्थितिः सप्तमेऽपि शुभदाः शुभग्रहाः॥ १॥
विरुध्य वध्वा जननर्क्षमादौ ततश्च दैवज्ञवरो वरस्य

क्रमात्तयोः पञ्चदशापि योगान् विचारयेन्नामभयोगयुक्तान् ॥२॥
66 अवकहडान् मटपरतान् मयबजशानथ पठन्ति।
गसदचलान् पञ्चस्वरसंभेदादेकैकः पञ्चधा भवेद्वर्णः ॥ ३॥
एकैकं नक्षत्रं चतुश्चतुर्भिः चतुर्थसंकेन।
वर्गचतुर्भिः सहितैः रनलादिभिः सप्तकानि चत्वारि ॥ ४॥?
उक्तैः पञ्चभिरोजैः स्वरैः सनोजा सराश्च गृह्यन्ते।
स्पर्शाक्षराणि वर्गे प्रथमतृतीये द्वितीयतुर्याणि॥
नाम्नामादौ न तु (ङञ?) णा न सन्ति न प्रायशः प्रकाराश्च।
इति सर्वेषां नाम्नां नक्षत्रं प्रथमवर्णतो ज्ञेयम्॥ ६॥
जन्मर्क्षस्यार्धफलं नामर्क्षे ब्राह्मणस्य निर्दिष्टम्।
नृपवैश्ययोः समानं शूद्रादीनां फलं ततोऽभ्यधिकम्॥ ७॥
अज्ञातजन्मभानो सर्वेषां नामभाक् फलं भवति।
सेवाप्रतिज्ञायनादौ ग्राह्यं तत्सुतधियि विशेषतः फलदम्॥
आयुधवाहनकिंकरभूम्यादीनां परिग्रहे कर्तुः॥
तत्नामसाम्यो योगाः सर्वे विवाहवर्ज्याः।
योगांस्त्रीन्द्रौ क्रूढ योनेर्दिनाख्यान् माहेन्द्राख्यान् द्वादशीशं वश्यान्।
तारां दर्गाद्रज्जुवेधान्वयाभ्यां लिङ्गास्तेते पक्षितो गोत्रभूतेः ॥१०॥
अश्वे भाजभुजङ्गौ भोगिश्वानका मार्जारवस्ताह्वयौ
मार्जारेन्दुरमूषिकौ क्षमहिष व्याघ्री महिष्यस्तथा।
शार्दूलौ हरिणः कुरङ्गशुनकौ शाखामृगौ गौः कपिः
नार्यश्वानरगोगजाश्च कथिता भानां क्रमाद्योनयः।
श्वा गौर्मार्जार महिषो मृगाजकपयो व्याघ्रद्विपोयो शुनः
वस्तागौः प्लवगो मृगाव्यय सियो वैर्याख्यभुजङ्गमूषिकम्।
एतोभं महिषाश्व मोतुभुजगं हस्त्यश्व मायूरकैम्

योन्योन्यत्र सुहृत्वमैक्यमपि च स्यात्तयो विरोधोऽशुभः ॥ १२॥
पुंसः स्त्रीजन्मभेभ्यो दिनमवधविपत्प्रत्यरक्षःप्रसूते
मानेन्दुस्तत्र तेभ्यो जलधिगिरिहरिसंख्यनक्षत्रजाते
दृश्यार्धक्षेत्रजाते मुनितिजनिगृहाद्राशियोगो वरीयान्।
रोक्यं वान्योन्यमैत्र्यं मिथुनजनिगृहात्स्वामिनोरैश योगः ॥ १३॥
स्त्रीजन्मभाद्यदि च पुंसि कुटुम्बजाते
वित्तक्षयस्तनयजे निरपत्यता च।
षष्ठोद्भवे व्यसनरोगविपद्वियोगा-
दुःखं सहोदरभवे सुखजे विरोधः ॥ १४॥
असति जननताराबेध्यदोषे यदि स्यात्
भवनपतिसुहृत्वं वश्यतैकाधिपत्यम्।
भवति न खलु दोषस्तर्हि षष्ठाष्टकत्वं (म)
7b सति कथितगुणेस्मिन्नाशुभो राशियोगः ॥
अश्वीन्द्रौ यममित्रभे हरिहरौ शूर्पानलौ वायवौ
मूलानि पितृपूषणौ गुरुजलौ देवप्रसूविश्वभे।
कुड्यक्ष्यर्यमणौ दिनेशवरुणौ भाद्रर्क्षभग्ये मिथो
वेधाना हन्ति योगमृक्षयुगलं वस्वीन्दुचित्रात्रयम् ॥ १६॥
जन्मर्क्षवेधे कथितौ जाते युक्ताभिवश्यादिगुणैर्बलिष्ठैः।
पतिं च कन्यां च समूलघातं निहन्ति षष्ठाष्टमराशियोगः ॥ १७॥
राकर्क्षेऽपि वरस्य पूर्वमपरं वध्यास्तु भं दूषितं
त्याज्यं नेतरथापि तत्परिहरेन्नक्षत्रमेकं बुधः।
तत्राप्ये शुभमामनन्ति मुनयः शक्रप्रचेता मघा
मूलार्द्रावसुरोहिणी यमपयो हस्तानि पुष्यैर्विना ॥ १८॥
योयस्य जन्मेश निजत्रिकोणो

सुखार्थी धर्ममूर्तिर्व्ययेषु ।
जातस्तत्र द्रुध्वे च स तस्य मित्रं
परेषु सत्स्वामिवशोऽस्य शत्रुः ॥
अलिमृगपतितौलीन्दृक्षे वध्वमलिघातिनौ ।
वणिगधिपतिं मीना मीनौ मृगं युवतीन्दुभे ॥ २० ॥
पुनरलिमिथं मेषौ पात्यावजं मकरं क्रमात्
इति पदमितान्गा शीनस्यानजादिषु मन्यते ॥ २१ ॥
४१ स्त्रीतारका दिनवक त्रितये वरस्य जन्मर्क्षे
कृष्णनवके प्रथमे नभीष्टम् ।
मध्ये तु मध्यमफलं चरमे प्रशस्तं
न्याय्यं द्विनादिषु तु केचिदिमं स्मरन्ति ॥ २२ ॥
दम्पत्योः शुभमेकवर्णजननं मध्या नरामर्त्यता
कष्टा निर्जरदैत्यतामृतिकरं रक्षोनरत्वं तयोः ।
अस्वप्नासुरवर्गजो यदि पुमान् स्त्रीमर्त्यवर्गैक्रमात्-
योगा उत्तम मध्यमा वितरथा कष्टातिकष्टौ स्मृतौ ॥ २३
आश्विन्यादिकमादिमध्यमशिरोरज्ज्वाख्यमृक्षत्रयं
रोहिण्यादिकमामनन्ति च शिरोमध्यादि रज्ज्वान्ययम्
शिष्टं भत्रैयमेवमत्र निखिलं तत्रैकरज्ज्वाश्रिते
जन्मर्क्षे वरयोषितो रहभदो तद्व्यत्ययः पूजितः ॥ २४ ॥
गेहारम्भनिषिद्धवेध विरला ध्योऽत्र जन्मर्क्षयोः
तद्वर्गः क्रमतः फलं विदधते वैधव्यमर्थक्षयम्
नानादेशपरिभ्रमव्यसनि मृत्युं च पुत्रक्षयं
वेध्याः कण्ठकटि ली पदहृदयशिरः कुक्ष्युद्भवाः संज्ञयः ॥ २५ ॥
पुंलिङ्गे पुरुषोऽङ्गनायदि वधूक्लीबर्क्षजाते क्रमात्

स्यादत्युत्तम मुत्तमं च नितरां कष्टं च हृत्तद्व्यये।
दृष्टं संगमनं तयोः पुनरुभौ यद्योग्यकलिङ्गो द्रवौ
४८ मध्यं पुंसि नपुंसके यदि वधू स्त्री त्वन्यथा निन्दितम् ॥२७॥
क्रमाद्द्विजक्षत्रियवैश्यशूद्रा वर्णानुलोमप्रतिलोमजौ च।
... आणि ... त्रीणि ... भाद्रपद्त्रयं विप्रनरेन्द्र वैश्याः ॥ २८॥?
संयोगो वद्ययोर्हि तोरतिशुभं स्यादेकजात्युत्थयोः।
श्रेष्ठश्चोत्तमजातिजो यदि पुमान् स्त्री हीनजात्युद्भवा
कष्टा वृद्धिपरित्यता यदि भवेन्मध्यानुलोके द्रवैः।
स्त्रीपुंसप्रतिलोमजैश्च न शुभो वर्णोद्भवानां क्वचित् ॥२९॥
भेरुण्डकः पिङ्गलकाकनामा चूडाः शिखण्डीति खगाः क्रमेण।
बाणाङ्गत केष्विषु संख्यभानां श्रेष्ठं तयोरेकविहङ्गमत्वम् ॥ २९॥
दस्रादिकामामृक्षयो मरीचि श्रेष्ठो वासिष्ठो मुनिरङ्गिराश्च।
अत्रिः पुलस्त्यः पुलहः क्रतुश्च क्रमेण भाना मभिजिद्युतानाम् ॥ ३०॥
एकत्रिगोत्रो द्रवयोर्विपत्तिं करोति कन्यावरयोर्विवाहे।
विभिन्नगोत्रोद्भवयोः श्रियश्च भजन्नगोत्रैक्यमपीह मध्यम् ॥ ३१॥
अश्वादिकाश्शररसेषु रसेषु संख्या
ताराः क्रमात्क्षितिजलाग्नि मरुत्वरूपाः।
अर्कादि राशि वशगा निवदन्ति केचित्
तज्जोभ्व्वु वह्नयवनिकां स्वलिलात्मजानि ॥ ३२॥
भूतैक्यमाहुः शुभदं विवाहे
वह्नयम्बुयोगस्तु विवर्जनीयः।
५० वह्नेः समीरेण भुवस्तु सर्वैः
योगः शुभोऽन्यैर्गगनस्य मध्यः ॥ ३३॥
यानेन्द्र योनि दिन राशि गृहेश योग।

सामान्यतोधिकबलाः कथिता दशाभ्यः।
अन्ये तु मध्यमफला मुनिगीतयोगाः
ओष्ठो द्विजस्य तु वरस्य च राशियोगः॥ ३४॥
ज्योतिःशास्त्रविशारदैर्निगदितः प्राणिगाहे संमुखी रोहिणी
स्वाती पौष्ण निशेश नैर्ऋत मघा सावित्र मित्रोत्तराः।
देशाचारबलेन नैर्ऋत मघे केचिद्विदुर्मध्यमे
स्त्रीजन्मत्रयमाहुरत्र शुभदं पुंवत्परस्तारकाः॥ ३५॥
कन्यातुलानृमिथुनान्यतिपूजितानि
मध्याः कुलीरझषचापवृषा विवाहे।
तेऽप्युत्तमाः शुभयुताः सगुरुं च सिंहं
कुम्भं मृगं च सहितं शुभमाहुरन्ये॥ ३६॥
मृत्युं निर्धनतां श्रियं सुखसुहृद्बन्धूं तनूजक्षयं
वृद्धिं शत्रुजयं च पत्नीमरणं रोगं च धर्मच्युतिम्।
दौःशील्यं विभवव्ययं च भवनेष्वात्मादिषु ग्राग्रहाः
कुर्वन्ति क्रमशस्तमोर्कितनया आरोग्यमत्राष्टमे। ३७॥
भर्तुः स्नेहवती प्रभूतविभवां प्रीतां च बन्धुप्रियां
पुत्राढ्यां जितशत्रवां विरहिणीमल्पायुषं सुव्रताम्।
स्वाचारां सधनां विहीनविभवां कुर्वन्ति कन्यां क्रमा-
दुद्वाहे वपुरादिराशिषु शुभाः षष्ठे कविर्वैरिणीम्॥ ३८॥
लग्ने वधूं हतधवां विसुतां तनूजे
कन्याप्रसूं च नवमे दशमे भुजिष्याम्।
९८ चन्द्रः करोति भृगुपुत्रवदन्यराशौ
तद्बान्धवः क्षयकृदष्टमुनि कैश्चिदुक्तम्॥ ३९॥
अष्टासु शुक्रो नवसु द्वजीवी त्रिष्वार्कसौमौ त्रिषु चामृतांशुः।

चतुर्थे सूर्यात्मज सिंहिकेयौ स्यातेऽनभीष्टाः कथिता विवाहे ॥ ४० ॥
इन्दोः कामे दशशतकरे वल्लभेनोज्झिता स्या
न्निम्नस्था दयितमरणं भूमिपुत्रो विधत्ते।
वीर्योपेतौ रविजशशिजौ प्रेयसो दुर्लभत्वं
पापाचारो युवतिरशुभैर्दृष्टमन्दो युतो वा ॥ ४१ ॥
इन्दोर्धिनाष्टमगतौ क्रमशो विवाहे
सौम्याशुभौ जनयतो मृतिमेव वध्वाः।
क्रूरग्रहेऽष्टमगतो विधवा भवेत्सा
चन्द्रेक्षिता च वृषसिंह गतेऽल्पपुत्रा ॥ ४२ ॥
चन्द्रे भौमगृहे कुजादिकथिता त्रिंशांशकेषु क्रमात्
दुष्टा दास्यवती सुशील विभवा मायाविनी दोषिणी।
शुक्रेऽसौ बहुदूषणान्यपतिगा पूज्या सुधी विश्रुता
ज्ञक्षेत्रे छद्मवती नपुंसकसमा साध्वी गुणाढ्योत्सुका ॥ ४४ ॥ ?
स्वच्छन्दा भर्तृघातीन्यपति महितगुणा शिल्पिनी साधुवृत्ता
चन्द्रे जैवे गुणाढ्या विरगति गुणाजातिशिल्पानि साध्वी।
मन्दे दास्यन्यसक्ता श्रुतपतिरसति निष्प्रजा चार्कभे स्या-
10a दुर्भाग्या हीनवृत्ता धरणिपतिवधूः पुंविचेष्टान्यसक्ता ॥ ४५ ॥
प्राप्ते कविक्षितिसुता वितरेत राजा
चन्द्रास्मरेऽपि कुरुतः स्त्रियमन्यसक्ता।
यद्यत्फलं हिमकरात्कथितं समस्तं
लग्नादपि प्रबलतो भवतीह तत्तान् ॥ ४६ ॥
शान्ते सूर्यो जीवो वपुषि निधने दानवगुरुः
सतेवान्ये योगा भवति दशमे शीतकिरणः।
सप्तवान्यो योगो भवति सहजयो सौरिकुशयोः

शुभे जीवोलाभे दिनकरसुतो भ्रातृदि कुजः। ४७॥

विलग्ने जीवींशो रिपुदशमयोः मन्द मिहिरौ

रिपौ पापः काप्ये बुध भृगुसुतौ धर्मनिरतौ।

वसिष्ठोक्ता योगाः षडमि कथिता श्लोक-चरणै

विवाहे जीवोक्तान् कतिचिदपि वक्ष्यामि शुभदान्॥ ४८॥

नन्दो नाम बलान्विते शशिसुते लग्ने स्वराशिस्थिते

तद्वद्भागविके स्थिते भृगुसुते योगस्तु भद्राह्वयः।

जीवाख्यस्तु तथाविधे सुरगुरौ शुक्रेऽयोः कण्टके

वागीशो न्तुजयोः त्रिकैकगृहयोः जीमूतनामा परः॥ ४९॥

योगोऽन्यः स्थावराख्यो वपुषि भृगुज वागीश-स्वराभ्यां बलिभ्यां

शुक्राभ्यां जयाख्यं स्तृभिस्तृभिरपि सहितो नाम योगाधिराजः।

विते जीवस्तनुजे कविशशितनुजौ षष्ठगोऽर्क शुभाख्यो

वागीशोऽब्जर्क मन्दैस्तनु सहज नभः षष्ठगैर्मङ्गलाख्यः॥ ५०॥

बलशालिभिः सङ्ग्रहैस्तनौ सहजा रागिभवेष्वसङ्ग्रहैः प्रबलाख्यः।

इतीह कीर्तिता दश योगाः शुभदाः किल ग्रहे

पयसि बुधः सहजे कुजमन्दौ भृगुतनयौ निधने

विधरस्ते द्विजति रविश्च भवेद्यदि रिःफ्या

परिणयने शुभदाः किल योगाः॥ ५१॥

उपनयन विवाहः क्षौरभुक्त्यादि कार्ये

फलमुदित मनिष्टं स्यानगौर्य ग्रहेन्द्रैः।

भवति न तदनिष्टं स्योच्चवर्गस्थितैस्तै

रुदयमुदित नच्चूराशींश्च मिश्र्या॥ ५२॥ ?

श्लोकैर्गुणाब्धिभिरेकयुक्तैः पञ्चाशता निर्मितमूर्तिरिस्मः।

प्राप्तिः समाप्तिं सुमुहूर्तशास्त्रे पाणिग्रहाध्याय इहाष्टमोऽयम्॥

→

शुभमस्तु ॥

गेहारम्भं कुम्भमृगास्यौ वृषमेषौ सिंहे झषे कीटतुले चन्द्रमतोऽर्के ।
प्राप्ते मार्तण्डादिषु काष्ठासु विदध्यात् शीघ्रं नक्षिन्मासचतुष्कं परिहार्यम् ॥१॥
मित्राजान्त्य गुरूत्तरा रजनिकृद्धस्ताः प्रशस्ताः स्मृताः
चित्रामूलसमीरणादितिवसु क्षीराधिपा मध्यमाः ।
संत्याज्यानि पराह्(नि)भानि सुधियः प्राहुर्गृहारम्भणे
देशग्रामपुरादिकेषु भवति शुभास्ताराद्विष शोद्वानना: । २ ।
मूर्ध्नोदयौर्ध्व वदनस्थिरसंज्ञराशी-
नत्युत्तमान्ग्रहविधौ शुभदान् स्थिराख्यान्
मध्यानथाहुरुभयानधमांश्चराख्यान्
खेटास्पदेषु विहगाः शुभदा न मूर्त्यौ ॥३॥
॥a. आयामेन युतं गृहस्य चरितो विस्तार ~~राश~~ राशिस्त्रिभिः
हत्वा नागहृतावशेषित फलान्याया ध्वजाद्याः क्रमात् ।
तस्मिन्नष्टगुणे हृते दिनकरैः शिष्टा धनायास्तया
नक्षत्रं भगणेन च त्रिगुणिते शक्रैर्विभक्तेऽव्ययः ॥४॥
ध्वजधूमसिंहशुनका वृषखरगजकाकसंज्ञिताः क्रमशः ।
आयाः प्राच्यादीनां ध्वजसिंहवृषद्विपाः स्वदिक्षु शुभाः ।
मार्गाद्याऽऽकर्कराशौ विनिहितचरणस्तन्मदन्यस्तमूर्धा
वामे पार्श्वे शयानो भ्रमति च परितः पुरुषो वास्तुरूपः ।
पादे यस्यार्थनाशः शिरसि च मरणं तस्य पृष्ठे विपत्तिः
वक्षस्यूरौ च नाशः शुभफलमुदरे स्तम्भमाद्यं निदध्यात् । ६ ।
उदक्प्लवे श्रियं धत्ते वृद्धिपूर्वप्लवा अपि ।
प्रत्यक्प्लवा दरिद्रत्वं विपत्तिं दक्षिणप्लवा ॥७॥
गोवह्निपोतभूपास्तु नागे (भं?) बृध्नसंज्ञिताः ।

वीथ्यः प्राच्यादिनीचत्वात्क्रामायास्ते प्रकीर्तिताः ॥ ८ ॥
प्राच्यायाशा सन्मनां द्वारमुक्तं वारुण्याश्चादौ दिग्विभागे च रक्षे।
धाम्नो भागाद्दक्षिणे पञ्चसंख्ये द्वौ चत्यक्त्वा मध्ययो स्तत्प्रशस्तम् ॥ ९
लग्नपुत्रारिपुविक्रमस्थिता शुक्रजीवशनिभास्करा यदा।
यस्तु वास्तु विनिवेश्यते तदा तद्द्विवत्सरशतद्वयं स्थिरम् ॥ १० ॥
तनुजलास्त्रासहोदशशत्रुगागुरुसितेन्दुजमन्ददिवाकराः ॥
।।९ यदि तदा विहितं भवनं नृभिः जगति तिष्ठति तच्छरदां शतम् ॥ ११ ।
सुखे गुरुः शशि च खे कुजार्कजौ च विक्रमे।
यदा तदा कृतं गृहं न हीयते शतं समाः ॥ १२ ॥
निजतुङ्गवर्तिनि तनौ दनुसुतगुरौ गुरौ च खे।
लाभसितावति शनौ च कृते शुचिरं गृहे वर्धते श्रियः । १३ ।
वपुस्थिते स्वगृहतुङ्गगे विधौ
क्षितकण्टके च सुरराजमन्त्रिणि।
विहितं गृहं धनसमृद्धिसंयुतं
निरुपद्रवं भुवि चिराय तिष्ठति ॥ १४ ॥
सोच्चस्वराशि सुहृद्दृक्षतदंशकस्थे —
लग्नाधिपे सति विलग्नगते ग्रहे वा।
श्रीमत्कृतं भवति गेहमतोन्य संस्थे
दारिद्र्यदुःखरिपुभीति परिच्युतं तत् ॥ १५ ॥
पाकोलूखलगोगृहाणि कथितान्यर्कै द्विदेहस्थिते।
कुर्याद्भ्रातृपितृर्क्ष पुत्र सुरजी द्विस्वेषु धान्यालयम्।
सितेन्द्वन्त्य गुरून्तरादिति मघा दस्त्रप्रजेशाः शुभाः।
संसत्सौध सुरालयादिषु भगस्वात्यौ च शय्यागृहे ॥ १६ ॥
छिन्द्याच्च दारु चतुराननभे गृहार्थं

पौर्वर्णेन्द्राग्रा ज्वलनगुरवस्सोमम् सुप्रशस्ताः।
126 विप्रादीनामृतुभिरिह शुभा स्वाह्विती या ध्रुवोक्तिः।
स्वर्कच्यानाद्दहति दहनो रोह मित्याह देवः॥ २४॥
गुरुणा कथिता पूर्णा नन्दा भद्रादयः क्रमात्।
पूर्व करामादि गेहानां प्रवेशेतिशुभप्रदाः॥
कुम्भे वा कुम्भद्वारे वा वपुषि हिमकरे वा नदीपांशकस्थे
संजातो वाहितो वा यदि मूलिपद विद्युत्पत्यग्निरन्याहितस्य।
रन्ध्रे भौमोत्र मृत्युं रविकवि रविज रोगमिन्दु विधत्ते
भार्याभङ्गं धनस्या धनहतिमशुभा सद्ग्रहाः स्वार्थपुष्टिम्॥ २६॥
गेहारम्भं सहवास्तुप्रवेशं साद्ध्याख्यानं कथयन्नेव मस्मिन्।
षड्विंशत्या रचितश्लोकवर्यैरध्यायोऽयं नवमः पूर्ण आसीत्॥ श्रीः॥

[Three fol. in the end contain Agama fragment.
These fol. do not bear any no.]

कूर्चलक्षणम् (on the margin)

कूर्चं वा कुसुमं वापि दूर्वाग्रो तुलसीदर्भैः।
बलिपात्रेषु निक्षिप्य कूर्चाभावे यथाविधिः॥
शाकाङ्गुल शुक कुन्तुन प्रास कुण्डलिका ङ्गुल प्रान्तयुक्त।
दशाङ्गुलीदण्डनरेन्द्र दर्भा गुणोपयुक्ता बलिकूर्चसंख्याः।

×

जीर्णध्वजविसर्जनविधिः। ~~सर्वजीर्णे विधिः~~।

~~ध्वज~~ सर्व जीर्णे विधिः प्रोक्ता ध्वजजीर्णे विधिं शृणु।
ध्वजदण्डे यदा जीर्णे भग्ने चेत्पतितेऽथवा।
प्रीते शल्लीभूते प्रमादाद्यत्र कुत्रचित्।

स्तम्भादिकं हि मरुचेरुदये निदध्यात्।
केन्द्रे गुरौ वपुषि दैत्यगुरौ बलाढ्ये
संछादये क्रूरमुदैतु महास्तृणाद्यैः ॥ १७॥
शास्त्रास्थिरा समृद्धवन्च गृहप्रवेशे
129 त्क्षिप्राश्चराश्च विदध्यात्पुडवः प्रवासम्।
शीर्षो वृषस्थिरगृहाख्यशुभाश्च सर्वे
वर्ज्याश्चराः परमभीष्वपि वार्धभोगाः ॥ १८॥
प्रवासं सर्वार्थान्सुखमपहृतिं रत्ननिचयं
वधूभोगं व्याधिं धनमुदयदुःखे निधनताम्।
प्रसिद्धिं वृद्धिं च क्रमत इति मेषादिषु गृहं
प्रविष्टे भूपालः फलमिदमवाप्नोति नियतम् ॥ १९॥
गेहं न प्रविशेन्नव घरवधू कर्कस्थिते भास्करे।
शीर्षो दक्षिणपृष्ठभागनिरन्ध्रितः शुक्रोऽत्र वर्ज्योन्यगः।
कार्तुस्तत्र शुभप्रदान्युपचयः क्षेत्राण्यथो नूतने
त्याज्ये निर्गमनादिकोऽत्र नवमो मासस्तथा वासरः ॥ २०।
पुनर्वसौ स्थिते चन्द्रे विदध्यात्सूतिकागृहम्।
गर्भिणी प्रविशेद्वस्तरोहिणीश्रवणेषु तत् ॥ २१॥
क्रमेण कुर्यादिगृहप्रवेशे विधातृसोमौ भगवासरेशौ।
मैत्रं च वस्वम्बु च बुधन्यतारा निशेधनः सिद्धिकरा भवन्ति ॥ २२।
केन्द्राष्टमे व्यय शुभैरशुभैर्व्ययेच
शुद्धे गुरौ वपुषि दैत्यगुरौ च केन्द्रे।
पापेषु वैरिसहजाशमसंस्थितेषु
नव्यं गृहे प्रविशता वृषकुम्भलग्ने ॥ २३।
अन्यास्थाने मुनिभिरुदिता धातृमित्रेन्दुचित्राः

जीर्णदण्डं गुरू [रुः] दृष्ट्वा विधिनोत्पाटयेत्ततः।
विधिर्विना तु तद्दण्डं तूष्णीमुत्पाटितं यदि॥
राजक्षोभं पुरक्षोभं दुर्भिक्षं सर्वनाशनम्।
सर्वशत्रुविवृद्धिः स्याद्राजधानी विनश्यति।
तस्मादेवमपायं ज्ञात्वा जीर्णदण्डं विसर्जयेत्।
विधिनोत्पाट्य मूलेन तद्दण्डं सलिले त्यजेत्॥
तद्विधिं तु प्रवक्ष्यामि विकुर्वार्चनपूर्वकम्।
नान्दीं संवाच्य पुण्याहं वाचयेत्तदनन्तरम्॥
१८ पीठाग्रे गोमयैर्लेप्य लिखेत्पद्मं सकर्णिकम्।
शालिं च तण्डुलं पूर्वं कुम्भं न्यस्त्वाय तां मृजम्।
गन्धोदकं तु संपूर्य सुवर्णं तत्र निक्षिपेत्।
अष्टोत्तरशतैः कुम्भैः एकाशीतिघटैस्तु वा॥
पञ्चविंशतिकुम्भैर्वा लिख्येल्लिङ्गं तदा गुरुः।
ध्वजमन्त्रैर्हुनेत्पश्चात् संहारास्त्रक्रमेण तु॥
ध्वजेशं मूलमन्त्रेण तस्मिन्कुम्भे यजेत्ततः।
नववस्त्रेण तद्दण्डं वेष्टयेद्दर्भमालया॥
नृत्तगीतसमायुक्तं शङ्खभेरीरवैः सह।
सर्ववाद्यसमायुक्तं जयशब्दसमन्वितम्।
सर्वभक्तजनैः सार्धं भूसुराद्यैः प्रभूत्तमैः।
य·· रज्जुना च तं बद्ध्वा दण्डमुत्पाट्य यत्नतः॥
वेदघोषैर्वाद्यघोषैः तद्दण्डं च जले क्षिपेत्।
एवमुत्पाटनं दण्डे विधिरित्युच्यते मया।
२० प्रतिदण्डप्रतिष्ठान्तं बलिपूजां च नाचरेत्।
पूजां च बलिदानं च गुरुराचरिते यदि

दुर्भिक्षमग्निबाधा स्याल्लक्ष्मीर्गा मा द्धुरिग्निता।
न राजमरणं याया न्देशस्तु तदा क्षयः॥
तस्माद्यत्नेन देवेशि सर्वसंपत्समृद्धये।
प्रतिदण्ड प्रतिष्ठान्तं नाचरेन्नैत्तिकोत्सवम्॥
तस्मादेवं गुरुर्ज्ञात्वा सर्वदोषहराय च।
शान्तिकर्म पृथक्कुर्यात् सर्वतन्त्रेषु निश्चितम्।
दण्डोत्पाटनमित्युक्तं सर्वसंपत्समृद्धिदम्॥

इति सूक्ष्मतन्त्रे जीर्णदण्डविसर्जनविधिः॥

*

यस्मिन्देवालये देवि ध्वजभङ्गे भवे सति।
ध्वजदण्डं च तत्रैव कुर्वीतोक्तविधानतः॥
शिलादण्डं चन्दनं च देवदारुं च गन्धजम्।
चर्मसारं गन्धसारं दृष्ट्वा दण्डं दृष्ट्वा दण्डं परिग्रहेत्॥
पूजयेद्विधिना मन्त्री विकरार्चनपूर्वकम्।
नान्दीश्राद्धं च कुर्याद्वै वाचयेत्तदनन्तरम्॥
ध्वजविघ्नेश्वरान्तद्वौ पूजयित्वाथ मन्त्रतः।
नववस्त्रेण तद्दण्डं वेष्टयेद्दर्भमालया॥
2b in blank हुत्वा ध्वजेन मन्त्रेण पूजाद्युत्यन्तरं हुनेत्।
3a दण्डं प्रक्षाल्य येत्तत्र तैलेन परिलेपयेत्॥
नववस्त्रेण संछाद्य गन्धपुष्पाक्षतैर्यजेत्।
वास्तुहोमं च राक्षोघ्नं रात्रौ कृत्वा विधानतः,
प्रातः शुभे मुहूर्ते च दण्डं धृत्वा विधानतः।
दण्डमूले च गां बद्ध्वा सवत्सां मूलमन्त्रतः॥
ध्वजे संस्थाप्य देवेशि प्रायश्चित्तादि कारयेत्।

प्रधानहोमं तत्रैव स्नपनं तत्र कारयेत्
ततः संसिञ्चयेद्देव मष्टोत्तरशतैर्घटैः ॥
प्रधानहोमं तत्रैव कारयेद्देवमन्दिरे ।
ध्वजेशं पूजयेत्पश्चात् कृत्वा वीक्षमाण विधानतः ॥ श्रीः ॥
एवं यः कुरुते देवि ध्वजस्थापनमुत्तमम् ॥
— शिखरस्य ध्वजस्याग्रमितं दण्डायतं बुधः ।
हस्तत्रयाधिकं कृत्वा पातार्यं भूतलप्रिये ॥
— चतुरश्रं दण्डमूले आधारश्चैव मध्यमे ।
तस्योर्ध्वं वर्तुलं कुर्यादष्टमं दण्डमस्तके ॥
पञ्चत्रयान्तरं मूले वेदिकां सार्धहस्ततः ॥
स्वस्ति ॥ ॐ [End]

The previous Patala is from Sūkṣmāga on Jīrṇadaṇḍavisarjana. The last one is on Navadaṇḍasthāpana, complete, but without Colophon.

Copied from
RE 43216 1 Fl.

श्री:

(भूत)बलि विधि: उत्सव बलि:

२. रुद्र. पूजा विधि:

*

Transcribed from 43216

श्रीगणाधिपतये नमः

गुरवे नमः। ओम्।

त्रिषु कालेषु सर्वे · · · मन्त्रैर्वा स्वस्वमूलेन
वा देवं संपूज्य आज्यं गुडोपदंशककदलीनालिकेरादि-
भिः सहितं पायसादिकं हविर्निवेदयेत्। शिवे — मध्या-
ह्नपूजायां पञ्चकालपूजापक्षे पञ्चवक्त्रेषु क्रमात् दध्यन्नं
निवेदयेत्। तत्र ईशानमुखे दौग्ध्यान्नं निवेदयेत्। त-
त्पुरुषमुखेन हारिद्रान्नं तत्रैव सामान्यनिवेद्यं च निवेदयेत्।
अघोरमुखे कृसरान्नं, तिलमिश्रान्नमित्यर्थः। वामदेवमुखे
गुडान्नं निवेदयेत्। सद्योजातमुखे दौग्ध हारिद्र कृसर गु-
डान्नानि एकीकृत्य निवेदयेत् इति विशेषः। तत्र प्रातः रा-
त्रौ च उत्स [व] बलिं कुर्यात्। श्रीभूतबलिं वा। प्रातः उत्स-
वबलिं रात्रौ श्रीभूतबलिं कुर्यात्। तत्र पूर्वं श्रीभूतब-
लिर्लिख्यते। तदनन्तरं वृत्स. [उत्सव?] बलिश्च। तत्रादौ
1-6 · · भूतं इति समभ्यर्च्य कस्मिंश्चित्प्रदेशे एकस्मिन्पात्रे वा
उपस्तीर्य निक्षिप्य · स · · त्य उपस्तीर्य कदलीनालि-
केरशर्करादीन् संयोज्य तत्र प्राङ्मुख उपविश्य देह-
शुद्धिं प्राङ्पूरणमात्माराधनं च विधाय। गणपतिं सं-
पूज्य स्वस्वास्त्रेण जलैः संप्रोक्ष्य आच्छादनपात्रं मत्वा
तालत्रयादिना संरक्ष्य पुनरसि प्रोक्ष्य दर्भेण स्पृष्ट्वा

शोषण दाहन प्लावनानि कृत्वा पीठं संपूज्य मूलेनावाह्य
सकलीकृत्य संपूज्य निवेदयेद्धा। अर्घ्यं दत्वा। पुनः प्र-
साद्य तथाऽऽ कृत्वा त्रिधा विभज्य आद्यमंशं देवेभ्यो नमः
इति संपूज्य दैविकं कल्पयेत्। हरिद्रं दधि लाजसक्तु प-
ललं दीपं च भूतक्रूराणि द्वितीयांशे तृतीयांशे च संयोज्य
पार्षदेभ्यो भूतेभ्यो नमः इति क्रमात्संपूज्य पार्षदं भौति-
कं च कल्पयेत्। तत्र द्वास्थादिनिर्माल्यधारिपर्यन्तप्रधानदेव-
ताः देवाः पार्षदभौतिकाश्च प्रसिद्धाः। इति हविः पूजां कृत्वा
२a तद्दर्शनात् पुनर्गणपतिं विसर्जयेत् पुनः बहिर्द्वीपादिन्यस्य
वाद्य - - शब्दतत्वेन च पुष्पाञ्जलिं . . . .
णि संताडनं कारयित्वा मन्त्रार्थान्स्मृत्य भूतगणानामन्त्रयेत्।
पुनर्द्वारसमीपे स्थित्वा पुष्पाञ्जलिं कृत्वा जलं जलि[अञ्ज-
लि] मुद्रां बद्ध्वा प्रार्थयेत्।

सृष्टिस्थितिविनाशानां कर्तृ भूतपते प्रभो।
त्वत्पार्षदानां मुख्यानां बलिदानाय शाधमाः [शाधि माम्]॥

इति प्रार्थनान्तः प्रविश्य बलिकौतुकस्य किञ्चित्पीठं सं-
पूज्य मूलेन मूलबिम्बात् किञ्चिद्देवं किञ्चिदावाह्य सकली-
कृत्य संपूज्यार्घ्यं दद्यात्। यद्वा। देवं प्रार्थ्य बलिकौतुक-
देवं मनसा योजयेत्। पुनर्मूर्तिपेन बलिकौतुकस्थं देवं
संधार्य नत्र[ब]हिर्गत्वा दीपैः सह तत्तद्बलिस्थाने प्राप्य देवंसा-
क्षिं कृत्य वाद्यघोषैः सह तत्तत्स्थाने बलिं दद्यात्। तत्र बलि-
स्थाने पाद्य पुष्पमाराध्य अष्टदलपद्मे तत्तद्देवता ध्या-
त्वा आद्यार्घ्याचमनादि दत्वा तत्तन्मन्त्रेण जलगन्धादिभिः
संपूज्य त्रिवारं बलिं दद्यात्। तत्तत्पार्श्वे तत्तत्पार्षदेभ्यो

नम इति त्रिवारं मूलेनैकवारं च बलिं दत्वा सकृज्ज-
लं दत्वा पुष्पमाराध्य बलिमुद्रां बद्ध्वा प्रसादयेत्।
2b एवं सर्वत्र बलिदानप्रकारः।

विष्णौ शंकरनारायणे च द्वारि पार्श्वयोर्द्वयं द्वाःस्थौ। अग्र-
मण्डपे वाहनम्। प्रासादस्य पृष्ठे अनन्तम्। दक्षिणद्वारि पश्चिम-
पूर्वक्रमात् गणपतिं दक्षिणामूर्तिं च पूजयेत्। शिवादिषु प-
ञ्चसु देवेषु पृष्ठे अनन्तरं अनन्तरं वर्जयित्वा पूर्वोक्तद्वारादि-
स्थानादीन् जयन्तु। शिवे वाहनानन्तौ वर्जयित्वा पूर्वोक्तद्वा-
स्थादीन् जयन्तु। प्रासादस्य बहिः द्वाःस्थौ स्यातां चेत् दक्षि-
णामूर्त्यनन्तरं तौ द्वाःस्थौ यजेत्। पुनः सर्वेषु देवेषु पूर्वद्वारे
प्रासादे इन्द्रादीन्। पश्चिमद्वारे प्रासादे वरुणादीन् लोकपा-
लादीन् यजेत्। शिवे लोकपालानन्तरं अग्रमण्डपे वृषभं
यजेत्। पुनः लोकपालानन्तरं सर्वेषु देवेषु दक्षिणभागे
गन्धर्वमातॄः भृङ्गिरागपदे शास्तारं वायुस्थाने दुर्गां मु-
खपदे स्कन्दं सोमस्योत्तरे वैश्रवणं ईशानपदे निर्माल्य-
[धारि]णं चार्चयेत्। यद्वा सोमपूजानन्तरं वैश्रवणपूजा
3a इति कल्पः। प्रासादस्यान्तर्भागे बहिर्भागे च द्वाःस्थान्संपू-
ज्य वाहनान्पूजयेत्। इति भेदेन विकल्पः। एवं अस्[त्रा]
बलिक्रमः॥ की॥

शंकरनारायणे प्रासादान्तर्द्वारि च सभायाः अ-
न्तर्द्वारि च वर्जयित्वा प्रासादबहिर्द्वारि सभान्तर्द्वारि द्वौ
द्वाःस्थौ यजेत्॥

सुब्रह्मण्ये दुर्गायां च प्रासादस्यान्तर्द्वारं वर्ज-
यित्वा वा। शिवे शास्तरि च सभाबहिर्द्वारं वर्जयेत्।

विपणौ चतुर्थद्वारं आद्यद्वारं वा वर्जयेत्। शंकरनारायणे प्रासादस्यान्तः नन्दिने नमः। चण्डाय नमः। तत्र बहिर्जयत्सेनाय नमः विष्वक्सेनाय नमः। पुनर्वाहनादि चण्डसेनान्तं, पुनः सभान्तः। उमायै नमः। श्रियै नमः। सभाबहिः शूलाय नमः सुचक्राय नमः इति॥

गणपतौ प्रासादे। वक्रदन्ताय नमः। गजास्याय नमः। पुनर्वाहनादिकुम्भोदरान्तं, पुनः सभान्तः चण्डविक्रमाय नमः। विघ्नहराय नमः इति॥ दुर्गायाम् - चतुर्द्वास्थपक्षे प्रासादान्तः चण्डिकायै नमः। अम्बिकायै नमः। तत्र बहिः जयायै नमः। विजयायै नमः। इति। पुनर्वाहनादिकम्। त्रिद्वास्थपक्षे प्रासादे बहिः चण्डिकाम्बिकां च वाहनादि मुण्डिन्यन्तम्। ह्लादिन्यै नमः। मोदिन्यै नमः। सभाबहिः जयन्त्यै नमः कात्यायन्यै नमः। इति॥ शिवे प्रासादान्तः नन्दिने नमः। महाकालाय नमः। पुनर्गणपतिदक्षिणामूर्ती। प्रासादे बहिः शूलपाणये नमः।
36 परशुपाणये नमः। इति। पुनः इन्द्रादि वरुणादि वा। अष्टमूर्त्यन्ते। ब्रह्माणम्। अनन्तम्। वाहनमात्रादि चण्डेश्वरान्तम्। पुनः सभान्तः तीक्ष्णदन्ताय मृगास्याय नमः इति। सुब्रह्मण्ये। प्रासादे सुकुमाराय नमः। वज्रासनाय नमः इति वा। वज्रहस्ताय नमः। शक्तिपाणये नमः इति वा। पुनर्वाहनादि धूम्रसेनान्तं। सभान्तः अग्निकेतवे नमः। सूर्यकेतवे नमः। इति। शास्तरि प्रासादे अन्तः क्षुरिकपाणये नमः। खड्गहस्ताय नमः। बहिर्द्वारि वीरबाहवे नमः। महावीराय नमः। इति। पुनर्वाहनादिषु घोषबल-

पर्यन्तम्। पुनः सभान्तः। ये नमः। तीक्ष्णाय नमः। तीक्ष्ण-
दन्ताय नमः। इति॥ श्रीः॥

विष्णौ प्रासादे अन्तः। चण्डाय नमः। प्रच-
ण्डाय नमः। ओं पक्षिराजाय स्वाहा। अनन्ताय नमः। गं
गणपतये नमः। ओं दक्षिणामूर्तये नमः। लोकपालादि-
विष्वक्सेनान्तं सभान्तः॥ श्रियै नमः। पुष्ट्यै नमः। बहि-
र्द्वारि चक्रपाणये नमः। शङ्खपाणये नमः। इति। यद्वा-
प्रासादस्य बहिः चण्डप्रचण्डौ गरुडानन्तगणपति दक्षि-
णामूर्तयः। लोकपालादि विष्वक्सेनान्तम्। सभान्तः श्रियै
नमः पुष्ट्यै नमः इति। बहिर्द्वारि चक्रपाणये नमः।
५८ शङ्खपाणये नमः। एतौ प्रासादस्य च हिते सभाबहिः
स्याताम्। इति द्वाःस्थानां व्यवस्था॥

अथ वाहनानि। शिवे वृषभाय नमः। विष्णौ
गरुडाय नमः। शंकरनारायणे वृषभाय गरुडात्मने नमः।
गणपतौ महाचापाय नमः। शास्तरि अश्वाय नमः। स्क-
न्दे मयूराय नमः। दुर्गायां महासिंहाय नमः। इति। श्रीः४?
इति वज्रनखदंष्ट्रायुधाय महासिंहाय हुं नमः। इति वाहनानि
ध्वजचिह्नानि च॥

तत्र द्वाःस्थानि निर्माल्यधारिणं प्रधानानां त-
त्पार्षदेभ्यो नमः इति। मातृवीरभद्रेत्यादिना प्रार्च्य वीर-
भद्रं गणपतिं तत्पार्षदं च पुनर्ब्राह्म्यादि तत्पार्षदानन्तरं
मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य इत्यपि। सर्वमातृग-
णेभ्य इति। पुनस्तत्पार्षदानां तु पेत्यादि नत्वा वा। आ-
काशमातृगणेभ्यः। मूलं पुनस्तन्मूर्त्यन्ते तत्पार्षदान्ते

सर्वेभ्यो भूतेभ्यो नमो नमः स्वाहा। इति जलाप्लुत बलिः।
पुनर्निर्माल्य धारिणौ स्व स्व परिजन्मूर्त्यान्ते जलाप्लुतबलिः।
एवमन्तर्बलिं कृत्वा सभासद्मस्थान् अभ्यर्च्य बहिर्निर्ग-
त्य पुष्पमाराध्य
ये समस्तं जगद्व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।
ते विष्णुपार्षदाः सर्वे गृह्णन्तु बलिमुत्तमम्।
4b इति विष्णौ॥ शिवादिषु रुद्रपार्षदाः सर्वे इत्यादि। शिव-
नारायणपार्षदाः। दुर्गापार्षदाः। स्कन्दपार्षदाः। विघ्नपार्ष-
दाः। सर्वे गृह्णन्तु बलिमुत्तमम्। इति प्रार्थ्य। अथाष्टदि-
क्षु ध्वजाधिपान्समभ्यर्च्य बहिर्निर्गत्य पुष्पमाराध्य
ये समस्तं जगद्व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।
ते विष्णुपार्षदाः सर्वे। ?
तत्रद्वास्थे तत्तद्गणान् अभ्यर्च्य महाबलिपीठे पूर्वाद्यष्ट-
दिक्षु अष्टग्र(हा)नभ्यर्च्य तन्मध्ये तदधिपं समर्च्य
जलाप्लुतबलिं कृत्वा पुनः अग्न्याद्यष्टदिक्षु अष्टग्रहान्स-
मभ्यर्च्य तत्तदवसरे दिग्बलिं कृत्वा पुनः शीघ्रं प्रदक्षिण-
बलिं कृत्वा उदीचि दिशि क्षेत्रपालमभ्यर्च्य बलिं दत्वा
मूलेन बलिं दत्वा समापयेत्। इति बहिर्बलिक्रमः।
अथ मन्त्रा लिख्यन्ते। शिवे- नन्दिने न-
मः। महाकालाय नमः। भूतनाथाय नमः। महीधराय नमः।
पर्वतेशाय। गुहेशाय। कालपाशाय। अग्निलोचनाय। दण्ड-
हस्ताय। अग्निधारिणे नमः। पाशपाणाय। ध्वजधोरगाय
5a गदिने नमः। शूलविलासिने नमः। इत्यष्टदिक्षु बलिं दत्वा।
सर्वस्य अवसाने ईशकोणे विप्रप्रियाय इति नवध्वजा-

धियाः॥

विष्णौ कलशमण्डपप्रोक्ताः। मुकुन्दाद्याः। दुर्गायां तत्रोक्ताः काम्याद्याः। शंकरनारायणे तत्रोक्ताः नन्दिमुकुन्दाद्याः। शास्तरि तत्रोक्ताः गोप्त्राद्याः। गणपतौ द्वारकलशपूजोक्ताः वज्रदन्ताद्याः। इति ध्वजाधिपाः प्रागादिक्रमाः प्रोक्ताः॥ श्रीः।

तत्र द्वारदेशात् ध्वजाधिपान् संपूज्य बलिं दत्वा द्वितीयावरणे शिवे। अग्न्यादि दशदिक्षु वा अष्टदिक्षु वा। विंशद्भूतगणेभ्यो नम इति॥ ~~षण्मुखे~~ विष्णौ। अग्न्याद्यष्टदिक्षु पञ्चाशद्भूतगणेभ्यो नम इति॥ शंकरनारायणे। सप्ततिभूतगणेभ्यो नम इति॥ षण्मुखे, षट्कोटिभूतगणेभ्यो नम इति। पुनः सर्ववत्॥ दुर्गायाम् अष्टकोटिभूतगणेभ्यो नम इति॥ शास्तरि। (सप्ततिभूतगणेभ्यो नम इति)॥ गोप्तृपार्षदेभ्यो न-

5-6 मः इति वीरसेनपार्षदेभ्यो नमः शाम्भवपार्षदेभ्यो नमः त्रिनेत्रपार्षदेभ्यो नमः। त्रिशूलपार्षदेभ्यो नमः। दक्षपार्षदेभ्यो नमः। भीमरूपपार्षदेभ्यो नमः इति॥ गणपतौ-वज्रदन्तपार्षदेभ्यो नमः। गजास्यपार्षदेभ्यो नमः। भीमपार्षदेभ्यो नमः। महोदरस्यपार्षदेभ्यो नमः। मेघनादपार्षदेभ्यो नमः। वरदपार्षदेभ्यो नमः॥ सर्वभक्षपार्षदेभ्यो नमः॥ इति द्वितीयावरणं बलिं दत्वा। पुनर्महाबलिपीठस्याग्रे स्थित्वा महाबलिपीठं प्रोक्ष्य पुष्पमारोप्य तस्य परितः पूर्वाद्यष्टदिक्षु। विष्णौ-मुकुन्दाद्यष्टकं संपूज्य बलिं दद्यात्। महाबलिपीठोपरि(तः ~~पूर्वाद्यष्टदिक्षु विष्णौ~~) हरिसेनाय नमः इति बलिं दत्वा मूलेन सं-

पूज्य बलिं दत्वा मूलान्ते विष्णुपार्षदेभ्यः सर्वेभ्यो भू-
तेभ्यो नमो नमः स्वाहा। इति संपूज्य जलाप्लुतबलिं कृत्वा
सकृज्जलं दत्वा पुष्पमाराध्य बलिमुद्रां प्रदर्शयेत्॥

शिवे। महाबलिपीठस्याष्टदिक्षु पूर्वादिदिक्षु क्र-
मेण भूतिदायाय स्वाहा। दुर्निरीक्षाय स्वाहा। भीमरूपाय
6a स्वाहा। सुलोचनाय स्वाहा। सुमुखाय स्वाहा। महाबाहवे स्वाहा।
त्रिशिराय स्वाहा। त्रिभुजाय स्वाहा। इति अधोभागं संकल्प्य।
तु (क्रु) मुदप्रदेशे। पिङ्गलाय स्वाहा। ऊर्ध्वभागं संकल्प्य। पीठो-
परि हरसेनाय स्वाहा। इति पुनर्मूलेन बलिं दत्वा मूलान्ते।
रुद्रपार्षदेभ्यः सर्वेभ्यः भूतेभ्यः नमो नमः स्वाहा। इति ज-
लाप्लुतबलिं कृत्वा सकृज्जलं दत्वा पुष्पमाराध्य बलिमुद्रां
प्रदर्शयेत्॥

पुनः शंकरनारायणे। महाबलिपीठस्य पूर्वादिनै-
र्ऋत्यन्तं भूतिदादिचतुरः पश्चिमादीशान्तं मुकुन्दादीं-
श्चतुरः पूजयेत्। अथवा बलिपीठस्य पूर्वाद्यष्टदिक्षु
भूतिदाय स्वाहा। कुमुदाय नमः इत्यादिषोडशमन्त्रैः पृथ-
ग्बलिं दत्वा अधोभागे पिङ्गलाय स्वाहा इति पीठोपरि पर-
मेष्ठिसेनाय नमः इति बलिं दत्वा। पुनः

आयान्तु पार्षदाः सर्वे शांकरा वैष्णवास्तथा।
बलिपीठेऽत्र संतुष्टा निवसन्तु यथासुखम्॥

नमः सर्वपार्षदेभ्यो नमः इति च। पुनर्मूलेन बलिं दत्वा
मूलान्ते शिवनारायणपार्षदेभ्यः सर्वेभ्यो भूतेभ्यो नमो
नमः स्वाहा। इति जलाप्लुत बलिः॥ श्रीः।

अथ दुर्गायाम्। बलिपीठस्य पूर्वाद्यष्टदिक्षु

द्वात्रिंशदपराधं च द्वात्रिंशन्न्यासमेव च।
द्वात्रिंशन्मुख्ययन्त्रं तु संज्ञान्येवं पृथक्पृथक्॥
ऋध्यं हृदि व्याहृतिं च कालदि ॥ ?

—

रथभङ्गप्रायश्चित्तविधिरुच्यते :—
रथभङ्गं प्रवक्ष्यामि काम्ये नैमित्तिके यदि।
सुत्तरथस्तम्भदीनां आदिमध्यावसानके ॥ १ ॥
शकटादिरथे भिन्ने पतिते शिथिले सति।
दग्धे नष्टे खण्डिते च तदङ्गे च महेश्वरि ॥ २ ॥
नवोत्सवे चाद्भुते च यदि प्राप्ते प्रमादतः।
तेषां शान्तिं च संधानं तत्फलं शृणु पार्वति ॥ ३ ॥
चक्रे भिन्ने त्वलक्ष्मी स्यात् ग्रामे नाशनं भवेत्।
राज्ञां दण्डे बलं हन्ति धन[ना]शं च पार्वति ॥ ४ ॥
तिर्यग्दण्डं च सम्भवं नाशनं पट्टिका भवेत्।
मूर्तियुग्मफलके स्तम्भे स्वराज्यं पत्तनक्षयम्॥ ५ ॥
चालराले च मध्ये च यदीन्ते च पार्वती।
रोगबाधा च तद्ग्रामः स्वस्तिनाशनमाप्नुयात्॥
रथद्वारादिके नाशे राजलक्ष्मी बहिर्गता।
रथभित्तौ विभिन्ने तु नन्त्रके च विहीनके।
दुर्भिक्षं प्राप्नुयात्सर्वे मृत्युबाधां च पार्वति।
शलाके रज्जुबन्धे च सेनानायकमन्त्रिणाम्॥ ७ ॥
नाशनं च भवेन्मृत्युः कलिकेरथवे शिवे।
भौमेचान्तरमध्ये वा खण्डिते म्रियते च वा ॥ ८ ॥

15a आकुञ्चिते च पतने तद्राजा मृत्युमाप्नुयात्।
कलिबिम्बे च पतिते देशिकादिजने सती॥ १०॥
देशनाशो भवेत्सद्यः चतुरङ्गबलक्षयः।
राजध्वानी विनश्येत छत्रबाधा भवेन्नृणाम्॥ ११॥
छत्रे चैव पताके वा चलंकारविहीनके।
यशः कीर्त्यादिकं हन्ति राजभोगं च नश्यति॥
रथाग्रकलशे भिन्ने रथाग्रे पतिते सति।
तद्राज्ञः सर्वभङ्गत्वं दरिद्रत्वं न संशयः॥ १२॥
त्रिमासे मृत्युमाप्नोति राजलक्ष्मी बहिर्गता।
रज्जुच्छेदे ध्वजे भग्ने तज्जने न पार्वति॥ १४॥
जयाभिगमनं नास्ति बन्धुनाशो च पार्वति।
सर्वांशे शिथिले जाते सर्वार्थं नश्यति ध्रुवम्॥
रथे सापतितो देवि खण्डिते भूतले यदि।
तद्राजमरणं सद्यः चतुरङ्गबलक्षयः॥ १६॥
तद्राष्ट्रं नाशमाप्नोति त्रिवर्षान्तं न संशयः।
दिक्पालं तु ततो वक्ष्ये पतिते च महेश्वरि॥ १७॥
सार्वभौमक्षयं प्राच्यां शेषाग्नेय्यां च भूपतिः।
यमे क्षयाञ्चक्रवर्ति (श्च?) मण्डलिकस्तथासुरे॥ १८॥
प्रभुक्षयश्च वारुण्यां वायव्यां प्रभुसारथिः।
याम्ये (सौम्ये) मूर्तिर्मण्डलिकः ईशे भूपसतिक्षयः॥ १९॥
तस्माच्छान्तिः प्रकर्तव्या सर्वलोकहिताय च।
सर्वदोषहरं नृणां शान्तिं कुर्यान्नृपोत्तमः॥
रथभङ्गं तथा राज्ञः दर्शयेन्न कदाचन।
आचार्यः शिल्पिभिश्चैव साक्षिभिश्चारकादिभिः॥

रथभङ्गं तथा दृष्ट्वा पुनस्तत्रैव संधयेत्
सदृढं शिल्पिभिः कुर्यात् विघ्नेशार्चनपूर्वकम्॥ २२॥
चक्रादिमन्त्रमाकुर्यात् साष्टोत्तरशताहुतिम्।
घोरमन्त्रं च तस्यार्धं मूलमन्त्रं च पार्वती॥ २३॥
प्रायश्चित्तं च शान्तिं च दिक्षामन्त्रं हुनेद्गुरुः।
स्नापयेद्बहुतोयेन साष्टोत्तरशतं गुरुः॥ २५?
भिन्नस्थाने च तद्बिम्बं स्नापयेच्च महेश्वरि।
तद्रथं स्नापयेत्पश्चात्तदर्भं च पृथक्पृथक्॥ २६॥
पूजयेच्च ततो मन्त्री वेदपारायणादिकैः।
दशधा दापयेद्दानं कृष्णदानं महेश्वरि॥
रथस्य पतितो दिक्षु प्रशस्ताऽन्नराशयः।
कुष्माण्डशाकलैः सार्धं ततो भूतबलिं हरेत्॥
15b गोलाकुल्यादि सकाले साङ्ग होमं चोत्सवमाचरेत्।
महाशान्तिं ततः कुर्यात् विधानेन गुरूत्तमः॥ २९॥
तद्रथं यदि संधानं न कृते से सदाशिवे।
तद्बिम्बमानयीत्वाथ स्वस्तिसूक्तेन देशिकः॥ ३०॥
शिबिकाद्यैः समानीय उत्सवं च समाचरेत्।
होमं कर्म समाप्याथ नवं कृत्वा दृढं रथम्॥ ३१॥
यथा पूर्वोक्तवत्कुर्यात् त्रिमासे सप्तमे शिवे।
तदूर्ध्वे वत्सरान्ते तदृक्षे तिथावपि॥ ३२॥
बीजकर्मादितीर्थान्तं पुनरुत्सवमाचरेत्
महाशान्तिं च पूर्वेद्युः गुरुः कुर्याद्विधानतः॥ ३३॥
रथोत्सवं ततः कुर्यात् ध्वजारोहादिपूर्वकम्
महाशान्तिं प्रवक्ष्यामि विस्तराच्छृणु पार्वति॥

नवाग्नौ मण्डपं कुर्यात् दीर्घेणाथ देशिकः।
द्वात्रिंशद्धस्तपर्यन्तं चतुरस्रं समन्ततः॥३५॥
हस्तमात्रोन्नतं स्यान्मध्ये वेदिसलक्षणम्।
द्वात्रिंशत्स्तम्भसंयुक्तं चतुर्द्वारं प्रकल्पयेत्॥
दण्डं संस्थाप्य कदलीं तोरणैश्चाप्यलंकृतम्।
द्विहस्तसंमितं कुण्डं चतुरस्रं चतुर्दिशि॥३७।
विदिक्षु वृत्तकुण्डं स्यात् वेदिकोपरि कल्पयेत्।
इन्द्रैशानयोर्मध्ये वृत्तं कुण्डं प्रधानकम्॥३८।
कुण्डनाभिसमायुक्तं मेखलोपरि शोभितम्।
इत्येवं मण्डपं रम्यं शान्तिं कुर्यान्महेश्वरि॥३९।
[दि]
तद्दिनेषु निश्चित्य सत्यवादी जितेन्द्रियः।
दीक्षावान्कर्मनिष्ठः विप्रानाहूय देशिकः॥४०॥
प्रातः स्नानं प्रकुर्वीत नित्यं कर्म समाप्य च।
ततो देवालयं गत्वा फलपुष्पं समर्प्य च॥४१॥
प्रार्थयेच्च ततो मन्त्री शान्तिं कुर्यात्तदाज्ञया।
ततः कर्माणि कुर्वीत आचार्यादिद्विजैः सह॥४२॥
निशि सायं दिवा प्रातः कर्मारम्भं समाचरेत्।
169 मण्डपं च प्रविश्याथ सर्वे चोपविश्य च॥४३।
गुरुवन्दनपूर्वादि प्राणायामं समाचरेत्।
दिनमुद्दिश्य संकल्प्य यथाविभवविस्तरम्॥४४।
विघ्नेशार्चनमात्मादि पुण्याहं पञ्चगव्यकम्।
मधुपर्कं च वरयेदाचार्यं यजमानकम्॥४५॥
ब्रह्माणं मूर्तिपान्देवि यथाचाहुतिसंख्यया।
दिनसंख्यमितं ज्ञात्वा वरयेदृत्विजान्क्रमात्॥४६॥

वेदपारायणार्थं तु षोडशीः कामगात्रिशं।
जपार्थं च शतार्धं स्यात् स्ते स्यात् त्र्यं च पार्वति।
रुद्रसंख्यान्पूजनार्थं दशविप्रान्पृथक्पृथक्।
प्रदक्षिणनमस्कारान् षड्जनांश्च महेश्वरि॥ ४८॥
चारार्थं दशविप्रांश्च प्रत्येकं वरयेद्गुरुः।
वस्त्रं च भूषणं दत्त्वा फलताम्बूलमेव वा॥ ४९॥
?विप्रांश्च प्रत्येकं वरयेद्गुरुः।
वस्त्रं च भूषणं दत्त्वा फलताम्बूलमेव च॥ ४३॥ } Repeated in the original itself.
देशिकं मकुटं (छत्र) यैश्च स्वर्णयज्ञोपवीतकैः।
दुकूलपादुकाभ्यैश्च छत्रत्रिजलपात्रकैः॥
सुवर्णकुण्डलं चैव मङ्गुलीयं महेश्वरि।
दत्त्वा विभवसारेण देशिकं तु समर्चयेत्॥ ५१॥
मण्डपं शोधयेत्पश्चात् संमार्ज्यालिप्य गोमयैः।
देवालये वितानाद्यैः तोरणैश्चाप्यलंकृतैः॥ ५२॥
दर्भदाम्ना च तत्पुष्पसंस्कारं च दशाङ्गकान्।
मण्डपान्तस्थकुम्भानां स्थापयेत्पूजयेद्गुरुः॥
अन्तरं तु प्रकुर्वीत सर्वावय महेश्वरि।
वास्तुरक्षोघ्नहवनं बलिपूजां समारभेत्॥ ५४॥
रक्षासूत्रं बन्धयित्वा मा चार्यादिद्विजान्पृथक्।
वेदपारायणं कुर्यात् तत्तन्मन्त्रं जपेत्प्रिये॥ ५५॥
रात्रौ जागरणं कृत्वा निराहारो जितेन्द्रियः।
ततः प्रातः समुत्थाय नित्यकर्म समाप्य च॥ ५६॥
पुण्याहं च ततः कुर्यात् कलशान्स्थापयेत्प्रिये।
सहस्रं चोत्तमं देवि पूजाकार्ये समाचरेत्॥ ५७॥

अग्निमध्ये समावाह्य नवमूलेन पार्वति ।
अघोरं पूर्वकुण्डे तु माग्नेयां च सुदर्शनम् ॥
मृत्युञ्जयं दक्षिणे स्यात्पश्च दुर्गांश्च राक्षसे ।
देव्यास्त्रं वारुणे देवि प्रासादं च समात्मकम् ॥ ६० ।
वायव्यकुण्डे सावाह्य मे तत्वं कुलां हुनेत् ।
ईशान्ये शान्तिदुर्गां च तत्तन्मन्त्रेण मन्त्रेण ॥ ६१ ॥
अष्टमूर्तिं समावाह्य मूर्तिपांश्च ततो हुनेत्
घोरमन्त्रं चायुतं स्यान्मूलमन्त्रं तथैव च ॥
तस्यार्धार्धं च जुहुयात् तत्तत्कुण्डे च पार्वति ॥
गणेशं क्षेत्रपालांश्च दिक्पालांश्च हुनेत्पृथक् ॥ ६३ ॥
16b नवग्रहान्मूर्तिमन्त्रान् रथदेवान्हुनेद्गुरुः
सन्निधाप्य च रुद्रांशैस्तुटिकैः सर्षपैः सह ॥ ६४ ॥
गोधूमं च पृथग्लाजान् सयवान्व्रीहिं च पार्वति ।
तत्तन्मन्त्रेण होतव्यं उद्देशत्यागपूर्वकम् ॥ ६५ ॥
पूर्णाहुतिं हुनेदन्ते मुद्दिश्य दिवसे गुरुः ।
स्नपयेद्घटसाहस्रैः रुद्रमन्त्रैश्च सूक्तकैः ॥
महापूजां प्रकुर्वीत बहुधा च निवेदयेत् ।
बलिदानं ततः कुर्यात् दशदानं प्रदापयेत् ॥ ६८ ॥ ?
ब्राह्मणान्भोजयेत्पश्चात् यथा चाहुतिसंख्यया ।
कुम्भसंख्याथवा देवि भक्ष्यभोज्यैर्यथेप्सितम् ॥
भिन्नस्थाने च तद्रात्रौ संहारांशे समागतः ।
रथपूजां च होतव्यं स्नपनं कारयेत्प्रिये ॥
तद्देवांश्च विसृज्याथ महाभूतबलिं हरेत् ।
स्वर्णं वा रजतं वाथ रथं कृत्वा तु दापयेत् ॥ ७१ ॥

दानानि बहुधा दत्वा भूरिदानं च कारयेत्।
महोत्सवं ततः कुर्या दाचार्यं पूजयेत्प्रिये॥ ७२॥
कलशान्स्थापयं देवि स्नापयेत्पूर्वकं रथम्।
देशिकं तोषयेद्देवि सर्वदोषनिवारणम्॥ ७३॥
दक्षिणां दापयेद्भक्त्या कर्म कुर्याच्च भूऽ[सु]रान्।
शान्तिकर्म समाख्याय तव लिङ्गे गुरूत्तमः॥ ७४॥ ?
इत्थं कुर्वीत यो भक्त्या रथभङ्गे च पार्वति।
सर्वदोषहरं नृणां सर्वारिष्टनिवारणम्॥ ७६॥
चिरायुष्यं भवेद्भूपो पुत्रपौत्रैः समन्वितः।
स्थिरो लक्ष्मीं स्^ममाप्नोति चतुरङ्गबलान्वितः।
भुक्त्वा च विपुलान्भोगान् कीर्तिमान्धनवान्भवेत्।
रथभङ्गोत्थिदं देवि प्रायश्चित्तमिदं शुभम्॥ ७८॥

इति श्रीवातुलोत्तरे प्रायश्चित्तखण्डे रथभङ्गप्रायश्चित्तनिरूपणविधिर्नाम चतुश्चत्वारिंशत्पटलः॥

—x—

अतः परं प्रवक्ष्यामि शृणु देवि यथाक्रमम्।
बहुमार्यं गजाश्वाद्यै र्वृषभश्चाप्यलंकृतैः॥
एतत्प्राणिविरोधेन पतिते रक्तपातने।
नखदन्तक्षते शृङ्गि घाते सति मृते यदि - सति॥
यदि विघ्ने च संप्राप्ते नित्यकल्यादिचोत्सवे।
पक्षे मासोत्सवे देवि अयने वत्सरोत्सवे॥
आदिमध्यावसाने तु यदि प्राप्ते महेश्वरि।
बहुधा शत्रुबाधा स्याद्नावृष्टिर्भविष्यति॥ ४॥
दुर्भिक्षं संभवेल्लोके महामारिभयं नृणाम्।

निधनं प्राप्नुयाद्राजा राजलक्ष्मीर्बहिर्गता।
179 न सान्निध्यं भवेल्लिङ्गे यदि नष्टे च पार्वति।
तस्माद्दोषशान्त्यर्थं महाशान्तिं समाचरेत्।
न कृते कर्म कालं तु तत्काले शान्तिमाचरेत्॥
कर्मारम्भावसानान्ते शेषं चोत्सवमाचरेत्।
तदूर्ध्वमासे संप्राप्ते तदूर्ध्वे तन्त्रिआवपि॥
त्रिमासे पञ्चमे वापि सप्तमे नवमे शिवे ॥ ८ ॥
महाशान्तिं च कुर्वीत विधानं शृणु पार्वति।
गुरुदैवागतः कुर्यात् उत्तमोत्तममण्डपम् ॥ ९ ॥
सवेदिका समायुक्तं सर्वभूषणभूषितम्।
द्विहस्तं सम्मितं कुण्डं सयोनिनाभिसंयुतम् ॥ १० ॥
वेदिकायाम मध्यस्य परितः कुण्डकल्पनम्।
चतुरश्रं तु वृत्तं वा प्रधानं परिकीर्तितम् ॥ ११ ॥
चतुर्दिक्षु प्रकुर्वीत चतुरश्रं च कुण्डकम्
त्रिमेखलसमायुक्तं गुरुस्तल्लक्षणोक्तवत् ॥ १२ ॥
द्विजानां ज्ञापयेद्यदौ विघ्नेशार्चनपूर्वकम्।
नान्दीमुखं च पुण्याहं मधुपर्कसमन्वितम् ॥ १३ ॥
वरयेद्ब्राह्मणान्सर्वान् आचार्यादिपृथक्पृथक्।
सद्योङ्कुरं प्रकर्तव्यं कुण्डमण्डपशोधनम् ॥ १४ ॥
वास्तुरक्षोघ्नहवनं बलिं वास्तौ समर्चयेत्
विघ्नेशादिध्वजान्यद्व्रा तोरणगुच्छादिकम् ॥ १५ ॥
स्थापनं च ततः कुर्यात् रक्षाबन्धं समर्पयेत्।
तत्स्थाने च महोत्सवे ॥ १६ ॥
स्थानशुद्धिं ततः कुर्यात् ~~दर्भदाम्ना च वेष्टयेत्~~॥
खनने हरणं दाहे पूरणे गौनिवासनम्॥

विप्रोच्छिष्टं च गव्यं च स्थानशुद्धिरियं प्रिये।
सम्मार्जनोपलेपं च विकिरेत्सर्षपादकान्।
रक्षाबन्धं ततः कुर्यात् दर्भशाखां च वेष्टयेत्
वास्तोष्पतेति मन्त्राभ्यां पावमानमुदीरयेत्॥
भूसूक्तब्रह्मसूक्ताभ्यां तत्स्थानं प्रोक्षयेद्गुरुः॥ १९॥
वेदपारायणं कुर्याज्जपेन्मन्त्रं यथोक्तवत्।
ततः प्रातः समुत्थाय नित्यकर्म समाप्य च॥ २०॥
विघ्नेशमर्च्य पुण्याहे संकल्पविधिपूर्वकम्।
दिनमुद्दिश्य संकल्प्य होमकर्म समारभेत्
ब्राह्मणां च सदस्यं च शतार्धान् होतृकान्प्रिये।
नानासूक्तादिमन्त्रज्ञान् दशपञ्च महेश्वरि॥ २२॥
चतुरो वेदपाठार्थं चतुर्दिक्षु यथाक्रमम्।
चारार्थं षड्जना देवि रुद्रसंख्यांश्च सेवकान्॥ २३॥
पूजार्थं दशविप्रांश्च नमस्कारप्रदक्षिणे।
येकमेकं पृथक्कुम्भी ब्राह्मणैश्च समन्वितः।
यागगेहे चोपविश्य आसनेषु यथाक्रमम्।
प्रधाने मध्यमे कुण्डे होतृभिर्दशभिः सह॥ २५॥
धनदेन सदस्येन ब्रह्मणा सह देशिकः।
कुण्डसंस्कारपूर्वं च जनयेत्पावकं शिवे॥ २६॥
होमयेन्मनुना देवि ऋत्विग्भिः सह देशिकः।
उदुम्बरशमीदूर्वा खदिरं च पलाशजम्॥ २७॥?
17b ततः कुण्डेषु जुहुयात् प्रधानादि यथाक्रमम्।
घृतं चरुं तिलं चैव सर्षपं त्रुटिकं तथा॥
मरीचं जीरकं लाजं पृथुकं च कुमेत्प्रिये।

पूर्वोक्तसंख्यया हुत्वा अन्यमन्त्रान् यथाक्रमम् ।
मृत्युञ्जयमनुं पूर्वे दक्षे पाशुपतं मनुम् ।
शान्तिदुर्गां पश्चिमे च मूलमन्त्रं तु चोत्तरे ॥ ३१ ॥
प्रत्येकमयुतं चैव कुण्डे कुण्डे यथाक्रमम् ।
होमयेन्मनुना देवि जपेयुर्ब्राह्मणोत्तमाः ॥
नवग्रहं वास्तुशान्तिं राक्षोघ्नं भुवनेश्वरि ।
चतुरन्त्यं क्षेत्रपालं गणेशं च सरस्वतीम् ॥
मृत्युञ्जयं च प्रासादं सप्तशत्यादिकं जपेत् ।
स्नापयेद्घटसाहस्रैः तदर्धैर्वा महेश्वरि ॥
पूर्वोक्तैर्नैव संपूज्य सवस्त्रप्रतिमादिकैः ।
औषधं च विनिक्षिप्य मूलमन्त्रं जपेत्प्रिये ॥ ३५ ॥
होमान्ते सेचयेद्देवीं रुद्रमन्त्रैश्च सूक्तकैः ।
लिङ्गं पञ्चामृतैः स्नाप्य गन्धैरालिप्य देशिकैः ॥ ३६ ॥
पूजयेद्बहुधा मन्त्री नैवेद्यं बहुधा शिवे ।
बल्युत्सवं ततः पश्चाद्धोमभूम्यादीनि चापयेत् ॥ ३७ ॥
गजाश्ववृषभं दत्त्वा पुनः सन्धानमाचरेत् ।
दक्षिणां च ततो दद्याद्यथाविभवविस्तरम् ॥ ३८ ॥
ब्राह्मणान्भोजयेत्पश्चात् सहस्रं च महेश्वरि ।
देशिकं तोषयेदन्ते तन्त्रोपकरणैः सह ॥
शान्तिकर्म मयेत्युक्तं सर्वदोषनिवारणम् ।
सर्वपापहरं देवि सुभिक्षं तत्क्षणं भवेत् ॥
राज्ञो दुर्गादिवृद्धिश्च स्याच्चतुरङ्गबलप्रदम् ।
सर्वशत्रुहरं सद्यः स्थिरां लक्ष्मीमवाप्नुयात् ॥

इति श्रीमातृकोत्तरे प्रायश्चित्तखण्डे शिवपार्वतीसंवादे

गजाश्ववृषभादिशान्तिविधिर्नाम
पञ्चचत्वारिंशत्पटलः ॥

—✗—

Copied from a Pl. ms. belonging to Devalakunda Subrahmanya Bhatn Coondapur Taluk, S.K. Fol. 1–17, 52 × 5.5 em. 10–12 lines on a page. Tulu, big & small hand writing, in more than one hand, full uf errors. About 1700 AD.

—✗—

— विषयानुक्रमणी —

वातुलोत्तरे लक्षहोमविधिः	चत्वारिंशः पटलः	१ (पृष्ठम्)
वातुलागमे करणलक्षण, अग्निजननपात्रासादनम्।	पञ्चत्वारिंशः पटलः	११ "
वातुलागमे द्रव्यहोमादिपूर्णान्त, तर्पण, अन्तर्जपाः	सप्तचत्वारिंशत्।	२२ "
पारमेश्वरतन्त्रे बलिविधिः	अष्टत्रिंशः	२३ "
चन्द्रज्ञाने प्रायश्चित्तविधिः	?	३८ "
वातुलोत्तरे रथभङ्गप्रायश्चित्तम्	चतुश्चत्वारिंशः	३९
" गजाश्ववृषभादिपतनादिप्रायश्चित्तम्	पञ्चचत्वारिंशः	४६.

अत्र वातुल, पारमेश्वर, चन्द्रज्ञानागमेभ्यः पटलाः समुद्धृताः ॥

—✗—

Copied from RE 43224.

श्री:

शैवागमपटलाः

[वातुल, भैरवरहस्य, ललित, सूक्ष्मागमेभ्यः]

विषयाः

परिचारकलक्षणम्		पृष्ठम् -	१
गणिकापुत्रलक्षणम्		"	२
चामरस्त्रीलक्षणम्		"	"
प्रातर्मध्याह्नपूजालक्षणविधिः	वातुले	"	२
परिचारकपूजालक्षणक्रियानाडिकम्	परमेश्वरसंहितायां भैरवरहस्ये	"	६
महानैवेद्यविधिः	?	"	८
"	वातुले	"	८
बलिविधिः चतुःषष्टिपदबल	ललितागमे	"	९
बल्यन्नभोजननिषेधः	वातुले, भैरवरहस्ये च	"	९
नित्यार्चनविधिः	सूक्ष्मतन्त्रे	"	१२
कृष्णाष्टम्यर्घ्यमन्त्रः	[सर्वमूले १. जयन्तीनिर्णये २].		२२
नित्यार्चनविधिसंग्रहः	२		२२

R.E. 45391

T. No. 984(c)

॥ श्रीः ॥ [Copied from 43224-RE]

श्रीमहालिङ्गेश्वराय नमः। शुभमस्तु।

कुर्यादि मन्त्रेषु च नित्यमब्दे मासादिपक्षायनेषु साम्ये।
पूजादिवक्षं तव वक्त्रमुख्यं नित्यं च बल्युत्सव पूजमन्त्री ॥ १॥
क्रियादि कर्मं विविनातु प्रात स्नाया ह्वरात्रौ दिनमेकशंकर।
श्रीशिवः —
पूजाद्युत्सवमब्दे च दिनमेकैकरात्रिषु ॥ २ ॥ ?
एकदेवाय नित्य माचार्या त्वेक विप्रकः ॥ ३ ॥ ?
अवाविप्रान्न कुर्यात्तु उदयादात्रिमेककम् ॥ ३ ॥ ?
आचार्य मेक प्राणान्त निष्ठपित शिष्यस्तु।
गोत्रमेकं तु कुर्यात्तु अन्यगोत्रं न कारयेत् ॥ ४॥
अन्यगोत्र वरयेत्तु प्रायश्चित्तं समाचरेत्।
एकशास्त्र मेकगोत्रं मेकाचार प्रकल्पयत् ॥ ५ ॥
परिचारक चत्वारो द्वेद्वाष्टं नैत्यकर्मणि।
जलार्थं कुशगन्धाद्यैः दूर्वा लिङ्गं बान्यत ॥ ६॥
16 बाहुका विप्रमेकं तु परिवारादिबाह्यतः।
निवेद्यं तण्डुल क्षालय वचनं विप्रमेककम् ॥ ७॥
द्वे चत्वारे तु विप्राणां परिचारकसंख्यया॥ ८॥

इति परिचारकलक्षणम् ॥

द्वारबन्धा दीपरक्षा मालयं रक्षणार्थकम्।
धूपदीपाद्वर्तिक्षिप्तं पुष्पबिल्वदलानि च ॥ ९॥
एकसंख्याद्वयं नाम गणिकामन्त्रामष्टमम्

~~नैमि~~ नैमित्यषष्टौ तु संख्यानि नित्यकुर्यात्त्रयं गृहे ॥ १० ॥
छत्रं दत्वा द्वाररक्षा क्रियाच्छेषादि मेककम्।

इति गणिकापुत्रलक्षणम् ॥

प्रातिशश्चाप्यनित्यं तु चतुःषष्ट्यं तु नैत्तिके।
पुण्यस्त्रीन्द्वभयोः पार्श्वे प्रजनार्थ द्वयं स्त्रियः ॥ ११ ॥
ताम्बूल मृतवीचिंच दर्पणं संख्यसप्तकम्

इति चामरस्त्रीलक्षणम् ॥

शतरुद्राभिषेकार्थं विप्रा · एकादशं क्रमात् ॥ १२ ॥
~~नवपञ्चत्रिवेकावा~~ रुद्रमेकादशं कुर्यात् विप्राने एकादश क्रमात्।
नवपञ्चत्रिवेकावा ब्राह्मणानभिषेचयेत् । १३ ॥
पावमानं ~~च~~ श्रीसूक्तं भूसूक्तं विप्रमेककम्।
2a वेदसारसहस्राणां नमोऽभ्युतदेवताः ॥ १४ ॥
विप्रयेकं दिने नित्यमुत्तमं देवतालये।
अनेन कुर्या वत्स आगमोक्तं रहस्यकम् ॥ १५ ।
प्रातः सायाह्नरात्रौ च नित्योत्सवं बलिकारयेत्।
प्रातश्च सूर्योदयनाडिपूर्वे नन्द्यागावण्टा द्वारि घोषणं च ॥
द्वित्रिं शिलाक्षालन रुद्रजातं भेरी च शङ्ख ध्वनिमौरि मण्डिरम् ॥ १६ ॥
छत्र?
जातं च पुत्रा द्वणिकां च पात्रं विसृज्य दीपान्शुभ योन्च शौऽच्य।
पात्रादिकुम्भं बहुक्षिप्त शूद्रं घषं च भस्मं जलगोमयाद्यैः ॥ १७ ॥
कांस्यादिपात्रांश्च पिठं तु आव्यं नक्षत्रमाल्याभरणेषु देवाः।
बाह्येषु क्षिप्तं जल धौतनाद्यैः संशोध्य तीर्थं जलगोमयानि ॥ १८ ॥
बाले ध्वजप्राकृण रुद्रकुर्यात् अन्य गृहे विप्रगणेषु गत्या।
नाड्यद्वयं विप्रशुचिं जलद्वा स्नानादिकुर्यात्परिचारगत्वा ॥ १९ ॥
प्रासादगत्वा हृदयास्त्रमन्त्रं जप्त्वा एमूलं शनगैर्मा विशेत्।

२८ विसृज्य निर्माल्यजलं च पूर्वं मूर्त्यभिषेकं परिचार्यं कुर्यात् ॥२०॥
नाञ्जलिपञ्चाङ्गिक मार्गी गत्वा प्रातश्च नयात् शुचि स्नानमादौ।
स्नात्वा गृहे मध्यम स्नान मन्त्री ध्वजाग्र प्राच्यु[र्ध्य]तं क्षेत्रपालम् ॥२१॥
प्रणम्य बाह्ये पुरतः प्रसादं घण्टाग्रमादं वृषमग्रतिष्ठन्।
शान्तिं च द्वारं शिवपूजगम्यं तूष्णीं च गम्यं सुखमासनं विशेत् ॥२२॥
विप्रार्चने तु मालेन तु जलपात्रे कुशादिषु।
गन्धतोयं परिचारमन्त्यागेषु च निक्षिपेत् ॥२३॥
धूपदीपाग्रगणिकानाममादाय मन्त्रतः।
पञ्चगव्यं च पुण्याहं प्रोक्षणं गेहबीजतः ॥२४॥
षण्णाडिका बलिप्रातः सप्तनाडिककामिके।
महाजनादिसर्वेषामागतं देवमन्दिरम् ॥२५॥
प्रातर्बलिं विना स्थाने सप्तनाडिकमागतः।
पादप्रक्षालनं मन्त्री विप्राद्यैः सर्वमागतः ॥२६॥
द्वारपालगणेशं तु जपो यद्द्रुद्रसूक्तकम्।
आवाहयेन्मन्त्रिरुद्रं दिग्वाशी भवमध्यतः ॥२७॥
३० नैविद्यं मध्यतिष्ठन्तु मन्त्री स्याद्वामपार्श्वके।
सौम्येशानं तु माचार्यं दक्षिणे विष्णुमर्चयेत् ॥२८॥
आचार्याभिमुखं मन्त्री दक्षिणे कुम्भमर्चयेत्।
तदग्रे द्रव्यपञ्चकं तु क्षीरं दधि घृतं क्षिपेत् ॥२९॥
मधुशर्करद्रव्यादि सृष्टिदीर्घांस्थितिक्षयः।
प्रागुक्तमर्चयेत्स्कन्द प्राणायामपुरस्सरम् ॥३०॥
भूशुद्धिमासनादिं च दिग्बन्धप्रणवादिकम्।
देहशुद्धिं करन्यासं अङ्गमूर्त्यङ्गकल्पकम् ॥३१॥
मूर्त्याह्वानमन्त्राद्यैः प्रणवादीनि मुच्चरेत्।

गन्धपुष्पाक्षताद्याह्य शतरुद्रं तु जापयेत् ॥ ३२॥
पावमानं च श्रीसूक्तं स्नानात्पूर्वं तु कारयेत्।
न्यासाद्रुद्राङ्गविप्रेषु मेकैकं देवसन्निधौ ॥ ३३॥
एकविप्राद्विप्रमेकमभिषेकं निवेदयेत्।
दर्भकूर्चादि निक्षिप्य धूपदीपादधोमुखम् ॥ ३४॥
कुम्भे निक्षिप्य माचार्य मुखमूर्ध्वं [र्ध्वं] जलं कुशम्।
दत्वोदकं कषायाद्यैः कुम्भपूरणारम्भकम् ॥ ३५॥
चतुर्भवतिमावाह्य प्रागुक्तं शिववाहनम्।
3.6 समुद्रज्येष्ठमन्त्रेण इमम्मे वरुण मन्त्रानित् ॥ ३६॥
श्रीसूक्तं रुद्रसूक्तं पावमानादि जापयेत्।
दिक्पालमन्त्रमुच्चार्य श्रीरुद्रोच्चारणं गुह ॥ ३७॥
पल्लवानालिकेराद्यैः सवस्त्रप्रतिमान्वितैः।
तत्तद्दैवतमावाह्य मूलेनाष्टशतं जपेत् ॥ ३८॥
पूर्वादीन्क्षीरनिक्षिप्य स्थितिमार्गं विशिष्यते।
सृष्टित्पश्चिममध्ये तु संहारं प्रतिदीक्षयेत् ॥ ३९॥
प्रागुक्तविधिना स्कन्द निवेदान्तेषु कारयेत्।
त्रयोदशानाडिकाले पञ्चद्रव्याभिषेचनम् ॥ ४०॥
तत्र नाड्याः कुम्भसेव्यं पूजां कुर्यात्र देवताः।
गन्धपुष्पाक्षतैः पूर्वं वरणं तु चतुर्दशः ॥ ४१॥
अन्यनाड्ये धूपदीपं मूललिङ्गेषु कारयेत्।
नाड्यपञ्चादशौ पूर्वं महानैवेद्यनाडिकम् ॥ ४२॥
प्रदिचारकविप्राणां कारयेत्पूर्वमुक्तवत्।
दशपञ्चान्त्यकाले तु प्रधानपरिवारकम् ॥ ४३॥
५a धूपं वन्तु कुर्यात्तु नाडिकाभ्यान कारयेत्।

निवेद्यं कारयेद्वत्स प्रधानपरिवारके ॥ ४४॥
मूलगेहे मन्त्रवित्तु तद्बाह्य परिवारके ।
निवेद्यं पूर्वकुर्यात्तु प्रधानं तु न कारयेत् ॥ ४५।
न कुर्यान्निष्फलं मूले नाडिका षोडशाधिकम् ।
मङ्गलार्तिं च कुर्यात्तु भूतमध्यापयेद्गुणाः ॥ ४६॥
प्राग्वत्तगन्धपुष्पाद्यैः विसृज्यं प्रतिमादिषु ।
बाहुमालंकृतं मन्त्री धारयेत्प्रतिमाबलिम् ॥ ४७॥
चण्डेचात्पत्र सादीनि प्रार्थयेद्द्वारपालकौ ।
पूर्वोक्तमर्पयेच्छक्तिं बल्यान्तं जल आकमात् ॥ ४८।
छेरनाउणिकापुत्रं शूलपाणिबलिर्विना ।
दक्षिणेन बलिर्वत्स प्रागुक्तं निर्जयं बलिम् ॥ ४९।
इन्द्राद्यैर्ध्वजबाह्यान्तं बलिं दद्यात्क्रयं गुह ।
त्रिः प्रदक्षिणमावर्त्य बलिदानं विना गुह ॥ ५०॥
षट्प्रदक्षिणमेकं तु मन्त्रः प्रासादकारयेत् ।
पादप्रक्षालनं कुर्यान्मूलगेहे सुखासनम् ॥ ५१॥
5-6 प्रागुक्तविधिना स्कन्द प्राणायाम पुरस्सरम् ॥ ५१॥
नाडिकाष्टौ दशान्तिकम् ॥ ५२॥ ?
स्तुत्वा प्रसन्नपूजान्तु ब्रह्मार्पणमतः परम् ॥ ५२॥
नीराजनं मन्त्रपुष्पं परियाहेच कृतं गुह ।
नमस्ते जगदाधार नमस्ते दुःखसागरात् । ५३॥
नमस्ते त्राहि मां विश्व देवदेव नमोऽस्तु ते ।
इति संप्रार्थयेन्मन्त्री द्वारपालाग्रसन्निधौ ॥ ५४॥
स्वामिना मूलगेहे तु रक्षणे द्वारबाहुनम् ।
गृहं गच्छेन्मम सन्तु प्रासादा ध्वजदेवताः ॥ ५५॥

भूतप्रेतपिशाचैश्च यक्षोगन्धर्वकिंनरैः।
देवैः सर्वगणैर्युक्तैः तत्तत्स्थाने निवेशय॥ ५६॥
गणिकापुत्रकन्यार्थं द्वारबन्धादिकर्मणि।
दशार्धौ नाडिका वत्स प्रातर्मध्याह्नमुत्तमम्।
5a कालातिक्रमणो वत्स मूलमन्त्राञ्जपयेत्॥ ५७॥

इति वातुले प्रातर्मध्याह्नपूजालक्षणविधिः॥

— x — x — x —

श्रीः॥ अर्धबिम्बगते सूर्ये महाभेरींश्च ताडयेत्॥
तोयेन क्षालनार्थं स्त्रीः कवाटं तु विसर्जयेत्॥ ५८॥
रागधौता दुर्गन्धं शुद्धं नेत्रशुचिर्भवेत्।
सूर्यास्ते नाडिपूर्वं वा दृष्टा गत मन्दिरम्॥ ५९॥
निर्माल्यं कुर्वीत पश्चात् वर्धनीपूरणं जलम्।
गन्धादिवस्त्रसंयुक्तं देवाग्रे निक्षिपेद्गुरुः॥ ६०॥
परिचारकविप्राणां तण्डुलक्षालनं च पक्वम्।?
आचार्यश्शयनाङ्कान्ते देवमन्दिरमागतः॥ ६१॥
स्नात्वा जपात्पूर्वनिश्चयं ध्वजाग्रे क्षेत्रसन्निधौ।
इन्द्राद्या मातरः यक्ष गन्धर्वाप्सरकिन्नरैः॥ ६२॥
देवैः सर्वगणा स्थित्वा तत्तत्स्थाने निवेशय।
पूजाबल्युत्सवार्थं च सममागत मन्दिरम्॥ ६३॥
ध्वजेशं प्रार्थयेन्मन्त्री महाघण्टां च ताडयेत्।
पादप्रक्षालनं मन्त्री प्रविशेदर्भगेहतः॥ ६४॥
भूशुद्धिकासनशुद्धिभूतमात्मादिबिम्बप्रणवां स्वरूपम्।
5-b कुम्भार्चनं वर्धनीपीठशङ्खं स्नात्वाथ देवं विधिना गुह्योत्तमम्॥ ६५॥
श्रीरुद्रसूक्तं पुरुषादिमित्रं स्नात्वाथ लिङ्गं विधिना गुह्योत्तमम्।

गन्धादिपुष्पाक्षत माल्य भूष धूपादि पूर्वोक्त बलिं च कुर्यात् ॥ ६६ ॥
वीथ्यादि मुत्सं बलिदानमित्थं मार्गोत्थ पक्षं तिथिवासर साम्ये।
पूर्वोक्तकुर्याद्विधिना गृहोक्तं द्वारादिनित्यं क्रियमाममैत्यः ॥ ६७ ॥
द्वारध्वजं नित्यच नैमित्तिकोत्सवे छेदे च नाशं च नतं च भग्नम्।
द्वारादिनित्यं कुरुतेत्र वत्स द्वारादिसूर्योदयनस्तमेव ॥ ६८ ॥
द्वारादिबन्धं पुनरं विसृज्य द्वारध्वजं नित्यच नैत्तिकत्वात्।
आचार्यकुर्याद्बलिदानमुत्सं पूजार्चनं स्नानशुभादि कर्म ॥ ६९ ॥
धूपादिदीपं फलपुष्पमर्घ्यं निवेद्य नीराजनमस्त्रपुष्पम्।
द्वारान्विसृज्यं च कवाटबन्धनं विकीर्य घोटं रक्षाक्ष तोयम् ॥ ७० ॥
6a नक्षत्रमाल्याभरणं च शोध्य वार्तिं च मार्तिं धृताक्षिप्रचयम्।
बाह्य स्पृश्यत्वक निवेद्य मत्वा माचार्यवाक्यं क्रियनाम कुर्यात् ॥ ७१ ॥
*गृहीत छत्रं बलिदानकाले पूर्वोक्तकुर्याद्गणिका च पुत्रम्।
विसृज्य निर्माल्य कुशार्घ्यगन्धं जलादिवस्त्राद्बलिमूर्तिरक्षम् ॥ ७२ ॥
पीठादिपर्याप्ति विष्णुपीठे भवत्यपरिचारक देववाह्यम्।
पूर्वोक्तकुर्यात्परिवारमूर्ति द्वारादिसूर्यास्तमरात्रिकञ्च ॥ ७३ ॥
चत्वारनाड्यं महमङ्गलानि षण्णाडिकादानबलिं च दद्यात्।
नाड्यष्टमौ देवतमंण्टपस्थिते चतुराधिक्ते नाड्य कवाटबन्धनम् ॥ ७४ ॥
उमाकान्त नमस्तेस्तु तव पूजा यथा विभो।
द्वारबन्धं करिष्यामि सुखनिद्रां कुरु प्रभो ॥ ७५ ॥

इति श्री परमेश्वरसंहितायां भैरवरहस्ये
श्री परिचारकपूजालक्षण क्रियानाडिक-
मिति त्रिंशत्तमः पटलः ॥ श्रीः।

→×

आगमस्मम वक्त्रेभ्यो शब्दार्थं सम्यक्तमुच्यते।
विरुद्धागमशब्दार्थं शब्दवादी न कारयेत् ॥

आगमाभिज्ञे दार्थं पौराणज्ञं न कारयेत्।
इति परमेश्वरे।
शब्दब्रह्मागमं त्यक्त्वा लिङ्गस्पर्शं न कारयेत्॥ २॥
गोमयालिप्य देवाहं हविक्ष्वान्न पूरणम्।
मध्ये क्षिप्तहविर्देवि दक्षिणे घृतसूपकम्॥ ३॥
निक्षिप्य ह्यामभक्ष्याद्यैः शाखामृत्यग्नि क्षिपेत्।
नवधं सप्तधामह्य पेयचोष्यादि स्वादयेत्॥ ४॥
प्रोक्षयेदस्त्रमन्त्रेण शोषणं प्लावनं दहेत्।
अभ्युक्षणत्रिधा कुर्यान् परिषेकपरिस्तृतिः॥ ५॥ ६॥ ?
तोयपुष्पाञ्जलिं कृत्वा देवमुख्याग्रनिक्षिपेत्।
धेनुमुद्रां प्रदर्श्याथ दद्याच्चमनार्घ्यकम्॥ ६॥ ७॥
आपोशनं ततो दत्वा प्राणादीन्पञ्चमुद्रया।
ग्रासमुद्रां वामहस्ते दक्षिणेन स्तु गण्यते॥ ८।
मूलाष्टशतं जप्त्वा पुनराचमनीयकम्।
7a देवस्य त्वेतिमुख्यार्घ्यं साङ्गामुख्यसबाहूनम्॥
परिवारसमुद्दिष्टं मालामन्त्रं च देशिकः।
तत्पार्श्वे देवतादिष्टं पुनरापोशनं प्रिये॥ १०।
उद्धृत्य चण्डानाथाय निवेद्यं च विसर्जयेत्॥ ११॥ ?

[इति] महानैवेद्यविधिः॥

फलपक्वादितांबूलं नालिकेरफलानि च।
चणकं पृथुकालाजपिष्टाद्यैरर्च्यते प्रिया॥ १२॥
प्रोक्षयेदस्त्रमन्त्रेण परिषेकन्तु कारयेत्।
समर्पणं सपरस्यन्ते परिस्तीर्यं न कारयेत्॥ १३॥
ग्रासमुद्रां विनाध्येनं प्राणमुद्रां न कारयेत्।

आपोशनं विना पूर्वमपरं तु न दीयते ॥ १४ ॥
देवस्य तु विना मन्त्रात् चण्डभागेन दीयते ।
फलपक्वादि पृथुकपिष्टादीन् भक्ष्यमेव च ॥ १५ ॥
प्रोक्षयेदस्त्रमन्त्रेण त्रिवारर्घ्यं च दापयेत् ।
फलपुष्पाञ्जलिर्हस्ते तन्मूलस्थाने कारयेत् ॥ १६ ॥
जपान्ते नाममुच्चार्य पुनरर्घ्यं त्रिवारकम् ।
76 तत्तद्गायत्रिमन्त्रेण पुष्पाञ्जलिसमर्पणम् ॥ १७ ॥
समर्पणफलं पक्वा आगतं मूलगेहतः ।
एवं यः कारयेद्देवि कुर्यां देशिकसत्तमः ॥ १८ ॥

इति वातुले नैवेद्यविधिः ॥

अतः परं प्रवक्ष्यामि आगमं च प्रशस्यते ।
सर्वतन्त्रानुसारेण नित्यनैमित्तिकं बलिम् ॥ १९ ॥
तस्य लक्षणं वक्ष्यामि बलिकालस्य लक्षणम् ।
अथ नन्दी महाकाल अन्तर्द्वारस्य सन्निधौ ॥ २० ॥
पत्रं कूर्चपात्रस्था प्रादाय करं तिष्ठतु ।
आचार्यं च बलिं दद्यात् पुष्पमन्त्रं तु भृत्यकम् ॥ २१ ॥
परिचारकमानुष करप्रक्षालनं कुरु ।
आचार्यमीशमादाय भृत्याङ्करनिष्ठतु ॥ २२ ॥
आचार्यं च बलिं दद्यात् द्वारपालबलिं हरेत् ।
द्वौ पार्श्वौ संपुटीकृत्य आचार्यं तु बलिं हरेत् ॥ २३ ॥
नन्दीशं च महाकालं पश्चिमाभिमुखो बलिम् ।
80 बलिपीठे जलं दद्यात् पञ्चमापबलिं क्षिपेत् ॥ २४ ॥
विकीर्यं त्रिफलं पुष्पं चूर्णं जलमथाक्षिपेत् ।
धूपदीपं च संयुक्तं नित्यवच्च यथाक्रमम् ॥ २५ ॥

अन्नं तु पिप्पलं दद्यात् पुनः धूपं पुनर्जलम्।
गन्धं कनिष्ठाङ्गुलिना पुष्पमङ्गुष्ठसंयुतम्॥ २६॥
तर्जनी धूपसंयुक्तं मध्यमं दीपमेव च।
अनामिकं तु नैवेद्यं बलिमुद्राः प्रकीर्तिताः॥ २७॥
एताः पञ्चविधा मुद्राः पञ्चाङ्गुलिन संयुताः।
तत्पीठे तु बलिं दद्यात् मुद्राङ्गुल्येन दर्शयेत्॥ २८॥
मुद्राहीनं तु यत्कीर्यं तत्क्रिया निष्फलं भवेत्।
गणेशं च बलिं दद्यात् उत्तराभिमुखं हरेत्॥ २९॥
दक्षिणेशबलिपीठदुत्तराभिमुखं ततः।
एका गण बलिं दद्यौ शूलः परशुपाणये॥ ३०॥
पश्चिमाभिमुखं दद्यात्क्षालनं गोमयोदकम्।
पटाहवाद्यघोषं तु पञ्चवाद्यं तु कारयेत्॥ ३१॥
४८ इन्द्रपीठबलिं दद्यात्तस्य लक्षणमुच्यते।
आचार्यं तु मुखं पूर्वं शक्रस्य बलिदानके॥ ३२॥
देवस्यापि बहिर्गत्वा शनैर्गच्छन्नथाचरेत्।
अग्निपीठबलिं दद्यात्तस्या लक्षणसंयुतम्॥ ३३॥
दक्षिणाभिमुखमाचार्य विहितोत्र बलिं हरेत्।
यमपीठबलिं दद्यात् तस्य लक्षणसंयुतम्॥ ३४॥
उत्तराभिमुखं दद्यात् निर्ऋतिं पीठलक्षणम्॥ २४॥
आचार्यं पश्चिमस्थित्वा मुखमीशानतत्क्रमात्।
निर्ऋतिं पीठपीठस्य वरुणं पीठसन्निधौ॥ ३५॥
वरुणपीठे बलिं दद्या द्वायव्यां बलिदानके।
तस्य लक्षणं वक्ष्यामि आचार्यं चोत्तरामुखम्॥ ३६॥
वायव्यं बलिपूर्वं तु सौम्यपीठस्य सन्निधौ।

तस्य लक्षणं वक्ष्यामि आचार्यं दक्षिणामुखम् ।
सोमपीठबलिं दद्याद्दीर्घपीठस्य सन्निधौ ॥ ३७ ।
पूर्वाभिमुखमाचार्य बलिदानं क्रमेण तु ।
9b पश्चिमाभिमुखं दद्याद्बहिः प्रासादमेव च ॥ ४६ ॥ ? (1)
पूर्वामुखं बलिं दद्यात् महाकालस्य सन्निधौ ।
पश्चिमाभिमुखं मन्त्री महाकालबलिं हरेत् ॥ ४७ ॥
भूतनाथबलिं दद्यात् तस्य लक्षणमेव च ।
ईशानमुखमाचार्यः भूतनाथबलिं हरेत् ॥ ४८ ॥
महीधरं पूर्वमुखं उत्तरं पर्वतेश्वरे ।
गुहेश्वरबलिं दद्यात् तस्य लक्षणमुच्यते ॥ ४९ ॥
दक्षिणाभिमुखं दद्यात् कालपाशकमागकम् ।
कपर्दिने तथा चाक्षणं शंकरं पीठसन्निधौ ॥ ५० ॥
मूलस्य बलिदानस्यादुत्तराभिमुखं क्रमात् ।
स्कन्दानन्तरपरियन्तं उत्तराभिमुखं बलिम् ॥ ५१ ॥
पिङ्गलादुरसेनान्तं उत्तराभिमुखं क्रमात् ।
एतेषां लक्षणं देवि बलिदानं क्रमेण तु ॥ ५२ ॥
नित्योत्सवं प्रकारेण उत्सवं त्रिगुणं तथा ।
एता प्रधानदेवत्ये तस्य लक्षणमुच्यते ॥ ५३ ॥
बलिदानं दिने तत्र द्वे द्वे देव बलिं हरेत् ।
रथोत्सवस्य काले तु द्विगुणं चोच्यते क्रियाम् ॥ ५४ ॥
9a ब्रह्मपीठबलिं दद्यादनन्तं पीठसन्निधौ ।
वृषपीठबलिं दद्या तस्य लक्षणमुच्यते ॥ ३८ ॥
दक्षिणाभिमुखो दद्या मातृपीठस्य सन्निधौ ॥ ३९ ॥ ?
दक्षिणाभिमुखो दद्या द्वारवीरगणाधिपौ ।

~~(1) The matter continues. But sloka no. is wrong, it seems.~~

(1) 9a & 9b are interchanged. i.e in reverse order. The sloka no. are given correct.

पूर्वे गणबलिं चैव मातॄणां पूर्वपश्चिमे।
भूचरा खेचराश्चैव तथा पाताळवासिनः॥
ये भूता बलिमिच्छन्ति तेभ्यो वै बलिमाहरेत्॥ ४१॥
नित्यं विना तु तत्रैव उत्सवे च बलिं हरेत्।
मूर्तिपीठबलिं दद्यात् शास्तारं पीठसन्निधौ॥ ४२।
शास्तापीठबलिं दद्यात् आशाभिमुखं क्रमात्।
आचार्योऽपि बलिं दद्यात् उक्तमार्गेण वै क्रमात्॥ ४३।
पीठं तु स्थित्वा तु तस्य लक्षणमुच्यते।
दक्षिणाभिमुखं दद्यो चण्डेशं च बलिं हरेत्॥
पूर्वं मुखं तु माचार्य चण्डेशो पूर्वमेव च।
तीक्ष्णदंष्ट्र भृंगं चैव गोपुरं द्वारपालकौ॥ ४५॥
प्राक्पश्चमे स्थित्वात्र तीक्ष्णदंष्ट्रबलिं हरेत्। Here read 9a.
10a चतुर्वेदबलिं दद्यात्त्रिगुणं तु बलिं हरेत्।
उत्सवे तत्र कुर्वीत त्रिगुणं बलिमाहरेत्॥ ४६॥ ?
इति ललितागमे चतुःषष्टितमः पटलः॥
बलिलक्षणं सम्पूर्णम् श्रीः।

शिवाय नमः। अथ बल्यन्नभक्षणनिषेधमाह भैरवरहस्ये -
ब्राह्मण क्षत्रविट्शूद्राः स्त्रीबालप्रौढवार्धिकाः।
देवालये बलिभुजः पतितास्ते भवन्ति हि॥ १॥
वातुले — शिवालये च बल्यन्नं जानतोऽजानतो नराः।
क्षुधार्दिता भक्षितात्र पतितास्ते न संशयः॥ २
बल्यन्नं तांबूलं पुष्पं वा महापीठे समर्पितम्।
यदि तत्स्वीकृतं मर्त्यैः शूद्रवत्तान् त्यजेन्नृपः॥ ३॥

अनन्यश्चण्डपीठेतु निक्षिप्तां बलिमाहरेत्।
चाण्डालादधमः प्रोक्तो प्रायश्चित्तं न तस्य हि॥
स्त्रियो वा पुरुषाश्चापि स्वजातिं त्यक्तुमिच्छया।
महापीठे चण्डपीठे स्थित्वा वाच्यमुदीरयेत्॥ ५॥
स्वधर्मस्तु परित्यक्तः बल्यन्नं भक्षितं मया।
इत्युक्तमात्रो पतितः जातिभ्रंशमवाप्नुयात्॥ ६॥
वेदबाह्या भवन्तीह पतितत्वं भजन्ति ते।
10-6 सांप्रदायक्रमेणैव तेषां कर्माणि कारयेत्॥ ७॥

इति वातुले बल्यन्ननिषेधः।

*

देवानां नियमर्चनेषु सकलेष्वेवं समस्तार्चने
श्रेष्ठं पूर्वेति शङ्खं प्रणिगदित कलाः सर्वतन्त्रेषु भूयः।
सृष्टिस्थित्यन्तदीक्षे प्रतिदिनमुदये रुद्रकल्पे शताख्ये
साहस्रे कुम्भकर्मण्यखिलमपि विधौ पूजयेन्मान्त्रिवर्यः॥ १॥
शतरुद्रे महारुद्रे अतिरुद्रे च कर्मणि।
पञ्चामृतादिसर्वेषु पाञ्चजन्यं समर्चयेत्॥ २॥
शङ्खे कषायोदकपूरिते च निक्षिप्य सम्यग्विधिना हिरण्यम्।
कलाः समावाह्य विनिक्षिपेत्तत् कषायोदकैः पूर्णमुखे च कुम्भे॥ ३॥
सौरोददौग्ध्यञ्च महेशतन्त्रे स्नानोक्तमार्गः क्रममेतदित्थम्।
श्रीरुद्रपूर्वाणि तदीयसूक्तैः स्नाप्याथ शङ्खोदकमिश्रकुम्भे॥ ४॥
शङ्खे संपूर्णतोयैः प्रणिगदितकलाः पूर्णकुम्भेषु योज्यं
11-2 श्रीरुद्रं रुद्रसूक्तं वरयतु गुरुणा पाणिना दक्षिणेन।
शक्ते रुद्रश्च सौरे स्नपनविधिरयं सूक्तसंबन्धतो वा
कुर्यात्पूजोक्तसर्वं परिकरणसहं साधयेन्नित्यकत्वात्॥ ५॥

गौरीरुद्रं रुद्ररूपं हिमगिरिसुतया दत्तरं शङ्करस्थं नमः?
भास्ये स्नानं विधौ क्रमेण कलशैः प्राङ्मुखः कलाः पूजयेत्
पञ्चात्रिंशतिपञ्चपञ्चसहितैः प्रासादसर्वैर्युतं
सद्योजातादिमूर्तौ गुरुरलधियाज्ञां कृत्वीना धार्चयेत्
आत्मयागत्रये चैव तथैव स्थिरकर्मणि।
चलकर्मणि सर्वत्र नः प्रशस्तं च षण्मुख॥ ७॥
शौचादिकर्माणि समाप्य पूर्वं
कृत्वाथ पश्चाद्द्विजतोऽकृतिघ्नम्।
प्रासादतः पार्श्वचरागतमुख्या
देवाः समस्ताः प्रथनाम कृत्वा॥ ८॥
॥८ भूतप्रेतपिशाचैश्च यक्षगन्धर्वकिन्नरैः।
देवैः सर्वगणैर्युक्तैः तत्तत्स्थाने निवेशयेत्॥ ९।
इति संप्रार्थयेन्मन्त्री शास्त्रज्ञः सकलैर्गुणैः।
द्वारमन्त्रेण संप्रोक्ष्य पूर्वद्वारं प्रवेशयेत्॥ १०॥
नन्दिं गङ्गे महाकाल यमुने द्वारशाखयोः।
विमलं च सुबाहुं च पूजयेत्कवाटयोः। ११॥
शङ्खं च मणिपं भारतीं यजेत्।
देहल्यां वस्तु गोहमाप्रवेशयेत्॥ १२॥
ज्ञानशक्तिः क्रियाशक्तिः शान्तद्वारे प्रपूजयेत्।
ततस्तु देवं संपूज्य देवस्यान्तिकमाविशेत्॥ १३॥
वामशाखाश्रयो भूत्वा देहलीं न स्पृशेद्बुधः।
गच्छेद्दक्षिणपादाग्रे ओं नमस्त्व मलेभ्यः॥ १४॥
देवानामागमार्थं तु रक्षसां निर्गमाय च।
घण्टानादं प्रकुर्वीत सर्वपापापनुत्तये॥ १५॥

12a भूशुद्धिमादीन्सकर्माणि कृत्वा यथास्थानं बल्यनुर्यकं चरेत्।
पश्चात्तु निर्माल्य विसर्जयित्वा स्नानादिकं कर्मणि चाचरेद्बुधः ॥ १६ ॥
पुण्याहं वाचयेत्पूर्वं गन्धोक्तं कलशं ततः।
पश्चात्स्नपनकर्माणि आचारविधिनाचरेत् ॥ १७ ॥
पावमानं च श्रीसूक्तं गोसूक्तमभयंकरम्।
रुद्रसूक्तादिमुख्यांश्च स्नापयेत्प्रातरेव तु ॥ १८ ॥
अङ्गाश्चावरणानां च अष्टोत्तरशतादिकम्।
वेदसारसहस्राणां अर्चयेदेवमीश्वरम् ॥ १९ ॥
पूजयेदुपचाराणि नैवेद्यं च ततः परम्।
नीराजनादिकं कृत्वा बलिदानं तु कारयेत् ॥ २० ॥
भूसूक्तं विष्णुसूक्तं च शान्तिसूक्तं त्रियम्बकम्।
जाबालोपनिषत्सूक्तं स्नापयेद्विधिनामुना ॥ २२ ॥ ?
कलादि सकलान्मन्त्री घटे वाथ दरीदरे।
स्नापयेद्देवमूर्तिं च महापूजां समाचरेत् ॥ २३ ॥
12b उत्तमोत्तमपूजासु कालो यामद्वितीयकम्।
मध्यमे दशनाडी स्यादधमे यमकं भवेत् ॥ २४ ॥
घटिकाद्वे भवेत्स्नानं घटिमैकार्चनं भवेत्।
.. त्वं अग्निहोत्रं तथौ .
घटिकं स्यान्मलापुष्पं तदर्धकम्।
देवस्यार्चनकर्माणि उत्सवेषु द्विगाडिकम् ॥ २५ ॥
पादादिकं मध्यमे च पूर्णमध्याह्नकालिके।
शङ्खप्रतिष्ठानयथात्मपूजगुरुक्तमार्गेण गुरुं नमस्करेत्।
ध्यात्वाथ देवं विधिना समर्च्यात्साङ्गायुधः सावरणं च कुर्यात् ॥ २६ ॥
धूपदीपं च नैवेद्यं पुनर्धूपं च दीपकम्।

नागार्तिं चैव कुम्भार्तिं पञ्चदीपसमन्वितम् ॥ २८ ॥
पीठादि शिर आरभ्य चक्राकारं निवेशयेत् ।
एकवारं त्रिवारं वा पञ्चवारमथापि वा ॥ ३० ॥
सप्तवारं नववारं वा भ्रामयेद्देवसन्निधौ ।
13a उद्धृत्य दीपभाजानं समुद्धार्य क्षणं स्थितम् ॥
इमाम: कुक्षिण: पुंस: पुनरापाद मस्तके ॥ ३२ ॥
एवं दीपं समभ्यर्च्य प्रसन्नो भगवाञ्छिवः ।
मन्त्रपुष्पं ततः कृत्वा नमस्कारं प्रदक्षिणम् । ३४ ॥ ?
द्वादशं द्वादशं चैव चतुर्विंशतिमेव वा ।
प्रणवं पञ्चविंशत्या देवानाहूयतः क्रमः ॥ ३५ ॥
आह्वापयेद्भूतगणान् पूर्वं वाद्यैश्च पञ्चभिः ।
वाद्यरावस्यावसाने ध्वनिमात्रं सुखं वसेत् ॥ ३६ ॥
रवावसाने पूर्वं वै बलिदानं प्रकल्पयेत् ।
यद्द्वारे वासुविघ्नं तु देवदेवप्रियायकः ॥ ३७ ॥
तद्भूतान्येवि हिंसन्ति वाद्यस्यापि प्रभेदतः ।
तस्मात्तु वेदघोषेण द्वारपालान्बलिं हरेत् ॥ ३८ ॥
वाद्यन्न प्रहरेत्पूर्वं मन्त्रस्य बलिदानके ।
वाद्यं स्वनावसाने तु बलिं गुरुविधानतः ॥ ३९ ॥
बलिदाने न वाद्यं स्यात् ध्वनिं सर्वेषु शस्यते
13b तेषामागमनार्थं तु तद्वाद्यं तु वादयेत् ॥
आगतानां हि तेषां तु वेदघोषैर्बलिं हरेत् ॥ ४० ॥
बलिभेरीसमायुक्तं पञ्चध्वनिसमन्वितम् ।
जयघण्टारवोपेतं बलिं दद्यात् पृथक्पृथक् ॥ ४१ ॥
पूर्वोत्तरमुखो भूत्वा धृतवस्त्रोत्तरीयकः ।

द्वारादि हरसेनान्तं बलिं दद्यात्पृथक्पृथक् ॥ ४२ ।
इन्द्रपीठाद्यग्निपीठं पर्यन्तं तु समासतः ।
वादयेद्देवता नाम नमो नम इतीरयन् । ४३ ।
अग्निस्थानं समासाद्य तन्त्रकं वाद्यमेव तत् ।
प्राङ्मुखोदङ्मुखो वापि तस्मिन्वाद्यं तु वादयेत् ॥ ४३ । ?
आग्नेयपीठाद्यम्यन्तु लिङ्गनामे तु वादयेत् ।
याम्यपीठं समासाद्य वादयेत्युत्तरामुखः ॥ ४४ ।
वाद्यस्तनावसाने तु सर्वेषां वाद्यवादकैः ।
रान्तः क्रमेणैव बलिदानं समाचरेत् ॥ ४५ ॥
राक्षपीठं समासाद्य शम्भुवाद्यं तु वादयेत् ।
राक्षसावरुणान्तं तु शिवताळं तु वादयेत् ॥ ४६ ।
निर्ऋता वरुणौ चैव वादयेदनिदङ्मुखः ।
तत्तालमभिवाद्याथ अंशे ते पश्चिमामुखः ॥ ४७ ।
१५२ दुर्गायात्युत्तरमुखो वादयेद्वाद्यविक्रमः ।
वरुणचार्यपिमान्तं वा वादयेत्तु सदाशिवम् ॥ ४८ ॥
वायुपीठस्य पर्यन्तं शंकरं तु प्रवादयेत् ।
सौम्यादीशानपर्यन्तं पश्चिमाभिमुखं सुधीः ॥ ४९ ॥
एवं कृत्वा ततो वाद्यं दिग्दिक्षु प्रवादयेत् ।
पिङ्गलो हरसेनश्च बलिपीठे बलिं हरेत् ॥ ५० ॥
भूचराः खेचराश्चैव तथा पातालवासिनः ।
ये भूता बलिमिच्छन्ति तेभ्यो वै बलिमाहरेत् । ५१ ।
बलिपीठे जलं दद्यात् पुष्पं दद्यात्पुनर्जलम् ।
धूपदीपं च नैवेद्यं पुनः पुष्पं पुनर्जलम् । ५२ ॥
गन्धं कनिष्ठाङ्गुलिना पुष्पमङ्गुष्ठमर्पयेत् ।

मध्यमं धूपसंयुक्तं तर्जन्या दीपमेव च।
अनामिकं तु नैवेद्यं बलिमुद्राः प्रकीर्तिताः॥ ५३॥
दत्त्वोदकं पुनर्गन्धं पुष्पं धूपं च दीपकम्।
दद्यादविच्छिपानीयं विस्तृतं बलिकर्मणि॥ ५४॥
14b कुक्कुटाण्डप्रमाणेन तदर्धाङ्गं तदर्धकम्।
नृत्तगीतसमायुक्तं बलिदानं प्रकीर्तितम्॥ ५५॥
प्राकारान्तःकरे कूटे तद्बहिर्मूर्ध्नि विन्यसेत्।
अङ्के वा शिबिकायां तु रथमारोप्य देशिकः॥ ५६॥
तत्तत्स्थानबलिं दद्यात् नृत्तगेयं समन्वितम्।
किङ्किणीतालवाद्यं तु प्रथमं तु प्रदक्षिणम्॥ ५७॥
ततोऽष्टपरिवाराणां द्वितीयं तु प्रदक्षिणम्।
वृषस्य वृषतालं तु सोमस्याय च किङ्किणी॥ ५८॥
मातॄणां चन्द्रसाम्यं तु विघ्नेशस्य च ढक्करी।
षण्मुखे सोत्करं चैव ज्येष्ठे पञ्चमतालकम्॥ ५९॥
तटप्रहारं दुर्गायां विषमं छिन्नखं नम्।
शाङ्करी बलितालं तु प्रविश्याभ्यन्तरं ततः॥ ६०॥
इन्द्रस्य समतालं तु अग्नेर्मद्राभणं ततः।
यमस्य भृङ्गितालं तु वायव्यामालितालकम्॥ ६१॥
सौम्ये तद्घट्टतालं तु ईशान्यां सढक्करी।
15a परिवारसमायुक्ते द्वितीयं तु प्रदक्षिणम्॥ ६२॥
ततः पुरस्थितः पीठः त्रिकृत्वा तु प्रदक्षिणम्।
शाङ्खरीतालसंयुक्तं प्रविश्याभ्यन्तरं ततः॥ ६३॥
गोपुरे वाद्यनिःशब्दं पञ्चध्वनिसमन्वितम्।
वाहनानां तु सर्वेषां पादप्रक्षालयेद्बुधः॥ ६४॥

प्रदक्षिणद्वितीयं स्यात् अष्टाङ्गसमन्वितम्।
ततः प्रदक्षिणं नाके रेतैस्सुमुगु दीक्षितः ॥ ६५ ॥
ततः प्रदक्षिणं कुर्यात् प्रासादेन्द्रादिदेवतम् ॥ ६६ ॥ ?
प्रविश्य गर्भगेहन्तु तन्निर्माल्यं पुरैव तु।
हृदयेनास्त्रराजानां ततो मन्त्रं विसर्जयेत् ॥ ६७ ॥
ततोपहारदेवाय चण्डमन्त्रेण दापयेत्।
त्रिकाले तु पदं नित्यं स्नाने धूपे तथार्चने ॥ ६८ ॥
निशि कालेषु सर्वेषु ततो हृ परिवेष्टयेत्।
अर्चनादिक्रियाकाले पच्छिन्नपदमुत्तमम्। ६९।
पापी रोगमती भ्रष्टा नास्तिकैः श्रुतभूषणैः कैः।
अङ्गहीनं तथा चैव केशहीनं तथैव च ॥ ७० ॥
15b प्रासादाद्दर्शनं कुर्यात् तत्पूजा निष्फलं भवेत्।
अर्चकस्य तदायोग पूजायास्तु निषेधतः ॥ ७१ ॥
अभिरूपस्य सान्निध्य त्रिभिः सान्निध्य तद्भवेत्
ताम्बूलं व्यजना शैय्या तथा पाद्यादिसेवनम् ॥ ७२ ॥
आसनारोहणं निद्रा न कुर्याद्देवतालये।
स्त्रीसंगभोजनं तत्र गृहवार्त्ताविवादनम् ॥ ७३ ॥
नखरोमतृणच्छिन्न न कुर्याद्देवतालये।
द्वौ विप्रौ द्विजमग्नौ च दम्पत्योर्गुरुशिष्ययोः ॥ ७४ ॥
नन्दिशंकरयोर्मध्ये न गच्छेद्वृषपीठयोः।
सभायां यज्ञशालायां देवतायतनेष्वपि ॥
प्रत्येकं तु नमस्कार हन्ति पुण्यं पुराकृतम्।
अभिमन्तमर्चकं दृष्ट्वा स्मरतो याति शंकरः ॥ ७५ ॥
यथा सिंहं गजो दृष्ट्वा तथावद्भीतिकम्पनम्।

शजनध्युपवर्णाणि सर्वनञ्जीतिकम्पनम् ।
गुरुवञ्जक्तिमेवोक्तं पूर्वागवत्क्रमेहमाचरेत् ॥ ७८॥
प्राणप्रतिष्ठा च तथा ध्वजबन्धे बलिप्रदानेच बहिर्गते च ।
16a नैवेद्यकालेऽपि तथा क्रमेण द्वारं च कुर्याच्च कवाटबन्धनम् ॥ ७९॥
गर्भगेहं शिरः प्रोक्तं मुखमाद्यं शुकं तथा ।
मण्टपं कुक्षिमित्याहुः पार्श्वपाणिद्वयं भवेत् ॥ ८०॥
गोपुरं पादमित्युक्तं एवं देवालयं भवेत् ।
अर्धनिम्नगते सूर्ये प्रथमं घटिकार्धकम् ॥ ८१॥
भेरीं च जयघण्टां च निश्शङ्खोऽथ च निस्वनः ।
कवाटनिर्गवं पश्चान्मूलबिम्बं निरीक्षणम् ॥ ८२॥
कवाटनिष्टिलं पश्चान्मूलबिम्बं निरीक्षणम् ।
अघोरकरुणासिन्धो मालिने सर्वमालिने ॥
योगनिद्रां विहायैव प्रत्यक्षपरमेश्वरम् ॥ ८३॥
एवं ध्यात्वा महादेवं निर्माल्यं पूर्वविक्षिपेत् ।
प्राणायामं च संकल्प्य कलावाहनपूर्वतः ॥ ८४॥
कलशं पूजयित्वाथ वर्धनीकलशोदकैः ।
संयोज्य शङ्खतोयेन द्रव्याणि शुचिर्भवेत् ॥ ८५॥
16b गन्धं च पञ्चमप्रोक्तं अक्षतं त्रिफलं कुर्चैः ।
षट्त्रिंसंख्यायुतं पुष्पं सहस्राणि जलानि च ॥ ८६॥
धूपं च द्विचलं प्रोक्तं पूजाद्रव्याणि चोच्यते ।
पूर्वाह्णे विंशति द्रोण मध्याह्ने विंशतिद्वयम् ॥ ८७॥
सायाह्ने शतसंख्याकैः स्पर्शनां च तत्समः ।
स्नापयेत्पञ्चसूक्तेन प्रणवैर्मूलमन्त्रतः ॥ ८८॥
रात्रिसूक्तं च शङ्खोद्धं आयुष्यं विष्णुसूक्तकम् ।

प्रायश्चित्तं च सूक्तं च स्नापयेन्निशि मुक्तिषु ॥ ८९॥
त्रिंशन्तवोपचर्याणि तेभ्योपक्रमणं तथा।
स्नानकाले पुराणैस्तु पठ्यते विधिपूर्वकैः ॥ ९०॥
शुद्धवस्त्रेण संमृज्य पूर्वोक्तं विधिमर्चयेत्।
सप्तमावरणैः पूज्य मुपचाराणि षोडश ॥ ९१॥
आराध्याधारशक्त्याद्य मरचरणभक् मध्यतो मध्यभागे
179 धर्माद्यं दीन्वह्निरक्षः पवनदिशि[ग]तान् दिक्षु धर्मादिकाद्य।
मध्ये शेषादि बिम्ब त्रिगुणगणा · त्माबुज्ज केसराग्रा।
मध्ये मध्ये च शक्तिर्नव समभियजेत्पीठ मन्त्रेण भूयः ॥ ९२॥
पञ्चभिः सप्तभिश्चैव प्रातःकाले समर्चयेत्।
षोडशावरणेनैव मध्याह्ने तु समर्चयेत् ॥ ९३॥
एकादशैस्तु नवभिः सायाह्ने पूजयेद्गुरुः।
कालत्रये समाचर्य अङ्गाद्यावरणः क्रमात् ॥ ९४॥
शङ्खचक्रत्रिशूलादि मूलमुद्रां प्रदर्श्य च।
नैवेद्यमर्प्य(पि) येत्तत्र मूलमन्त्रजपं स्मरन् ॥ ९५॥
उद्वास्य चण्डनाथाय शेषं कर्म समाचरेत्।
178 बलिदानं तु मन्त्रेण दत्वा तेभ्यो यथाक्रमम् ॥ ९६॥
क्षीरान्नं पादयोत्पश्चात् दण्डवत्प्रयसे भुवि।
कवाटबन्धनं कृत्वा तन्तेन्मन्त्रेण देशिकः ॥ ९७॥
उमाकान्त नमस्तेस्तु नव पूजान्तरे विभो।
द्वारबन्धं करिष्यामि सुखनिद्रां कुरु प्रभो ॥ ९८॥
एवं दिने समभ्यर्च्य नित्यसिद्धमभि स्तुभिः।
इति शैवागमे सूक्ष्मतन्त्रे नित्यार्चनविधिः । [illegible]ः पटलः
अक्षरं च परिभ्रष्टं मात्राहीनं तु यद्भवेत्।

क्षन्तुमर्हसि विद्वांस: पिता पुत्रायराधवत्॥
(ति written above)

श्रीमहालिङ्गेश्वराय नमः॥ Here ends the main work.

—×— The next fol contains fol-no. in separate series

Fol. 1१ श्रीरस्तु। नित्यार्चने बरिवदक्के शुभमस्तु। सूराल्क महालिङ्गेश्वर-
देवर नित्य- [stops].

जातः कंसवधार्थाय भूभारोत्तारणाय च।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च॥
कौरवाणां विनाशाय दैत्यानां निधनाय च।
गृहाणार्घ्यं मया दत्तं देवक्या सहितो हरे॥
देवकीसहिताय श्रीकृष्णाय इदमर्घ्यम्॥ १॥
शशिने चन्द्रदेवाय सोमदेवाय चेन्दवे।
क्षीरदीधिति बिम्बाय तारानाथाय ते नमः॥ श्रीकृष्णाय इदमर्घ्यम्?
क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितो हरे [शशिन्]
रोहिणीसहिताय श्रीकृष्णाय [चन्द्रमसे] इदमर्घ्यम्।

This is the कृष्णाद्यर्घ्यमन्त्र for Mādhvas, perhaps from सर्वमूल [जयन्तीनिर्णय to be verified] of Sri Madhva.

—×—

The next four fol. contain the summary of
महमनको नित्यार्चनविधि from पावमानं च श्रीसूक्तं
(fol 15 line 5 in this transcript) to the end fol, 21 line
last but one).

Fol. १. पावमानं च श्रीसूक्तं गोसूक्तमभयंकरम्।
रुद्रसूक्तादि मुच्चार्य स्नापयेत्प्रातदेव तु॥ १॥

भूसूक्तं विष्णुसूक्तं च अग्निसूक्तं त्रियम्बकम्।
जाबालोपनिषत्सूक्तं स्नापयेद्विधिनामुना॥ २॥
कलादिसकलात्मकौ घटावाप्य दशोदशे।
स्नापयेद्देवमूर्तिञ्च महापूजां समाचरेत्॥ ३॥
रात्रिसूक्तं च रक्षोघ्नं आयुष्यं विष्णुसूक्तकम्।
प्रायश्चित्तं च सूक्तं च स्नापयेन्निशि मूर्तिषु॥ ४॥
15 अङ्गावरणानां च अष्टोत्तरशतादिकम्
वेदसारसहस्राणां अर्चयेद्देवमीश्वरम्॥ ५॥
गन्धं च पञ्चमं प्रोक्तं अक्षतं त्रिकलं कुर्यात्।
षट्त्रिंशत्संख्याकयुतं पुष्पं सहस्राणि जलानि च॥ ६॥
धूपं च द्विपलं प्रोक्तं पूजाद्रव्याणि चोच्यते।
पूर्वाह्ने विंशतिद्रोणं मध्याह्ने विंशतिद्वयम्॥ ७॥
सायाह्ने शतसंख्याकं रर्धरात्रं च तत्समम्।
पञ्चभिः सप्तभिश्चैव प्रातःकाले समर्चयेत्॥ ८॥
षोडशावरणैर्नैव मध्याह्ने तु समर्चयेत्।
20 रक्षादशैस्तु नवतिः सायाह्ने पूजयेद्गुरुः॥ ९॥
कालत्रयं समाचरेद्य अङ्गाद्यावरणः क्रमात्।
धूपदीपं च नैवेद्यं पुनर्धूपं च दीपकम्॥ १०॥
नागार्तिं चैव कुम्भार्तिं पञ्चदीपसमन्वितम्।
पीठादिशिर आरभ्य चक्राकारं त्रिवेष्टयेत्॥ ११॥ ?
एकवारं त्रिवारं वा पञ्चवारमथापि वा।
सप्तवारं नवारं वा भ्रामयेद्देवसन्निधौ॥ १२॥
उद्धृत्य दीपराजानं समुद्धार्य क्षणं स्थितम्।
25 दुर्मायः कुत्सितः सुप्तं पुंसः पुनरापादमस्तके॥

26 एवं दीपं समभ्यर्च्य धू[प] सम्भो भगवान् शिवः ॥ १४ ।
मन्त्रपुष्पं ततः कृत्वा नमस्कारं प्रदक्षिणम् ।
द्वादशं द्वादशं चैव चतुर्विंशतिमेव वा ॥ १५ ।
प्रणवं पञ्चविंशत्या देवानाहूय तः क्रमः ॥
आह्वापयेद्भूतगणान् पूर्वं वाद्यैश्च पञ्चभिः ॥ १६ ॥
वाद्यरावस्यावसाने प्रतिमाश्वं सुखं भवेत् ।
स्नानसाने पूर्वं वै बलिदानं प्रकल्पयेत् ॥ १७ ॥
यद्वारे वास्तुविघ्नं तु देवदेवप्रियायकः ।
30 तद्भूताश्चो विहिंसन्ति वाद्यस्यापि प्रभेदनः ॥ १८ ॥
तस्मात्तु वेदयो - - - - लान्बलिं हरेत् ॥ १८ ॥
वाद्यं न प्रहरेत्पूर्वं मन्त्रस्य बलि - - -
· · नावसाने तु बलिं गुरुविधानतः ॥ १९ ॥
बलिभेरीसमायुक्तं पञ्च - - - -
दद्यात्
जयघण्टारवां चैरि बलिं यद्वाक् पृथक्पृथक् ॥
पूर्वोत्त - - - - - - हृतवस्त्रोत्तरीयकः ।
द्वारादिहरसंमानं बलिं दद्यात्पृथक् - - ॥
बलिपीठे जलं दद्यात् पुष्पं दद्या - - ।
36 धूपदीपं च नैवेद्यं पुनः पुष्पं पुनर्जलम् ॥
गन्धं कनिष्ठाङ्गुलिना - - - - मर्चयेत् ।
मध्यमं धूपसंयुक्तं तर्जन्या दीपमेव च ॥
अन्ने - - - - - द्यं बलिमुद्राः प्रकीर्तिताः ।
दत्तोदकं पुनर्गन्धं पुष्पं धूपं - - - - ॥
- - - लद्वे निव्य पानीयं सहितं बलिकर्मणि ।
कुक्कुटाण्डप्रमाणा - - - गं तदर्धकम् ।

नृत्तगीतसमायुक्तं बलिदानं प्रकीर्तितम् ।

6a . . . र्चनादिक्रिया कार्यं प्रदक्षिणपदमुत्तमम् ॥

पापरोगमतिभ्रष्टा नास्तिकैः श्रुतिदूषकैः । २८ ॥

अङ्गहीनं तथाचैव केशहीनं तथैव च ।

प्रमादाद्दर्शनं कुर्यात्तत्पूजा निष्फलं भवेत् ॥

ताम्बूलं व्यजना शौया (शय्या) तथा पादादिसेवनम् ।

(वाहना) आसनारोहणं निद्रा न कुर्याद्देवतालये ॥

स्त्रीसङ्गं भोजनं तत्र गृहव्याप्तिविवादनम् ॥ ३० ॥ ?

नखरोमतृणच्छिन्नं न कुर्याद्देवतालये ।

द्वौ विप्रौ द्विजमग्नौ च दम्पत्योर्गुरुशिष्ययोः ॥

नन्दिशंकरयोर्मध्ये न गच्छेद्बलिपीठयोः ।

सभायां यज्ञशालायां देवतायतनेष्वपि ॥

प्रत्येकं तु नमस्कारं हन्ति पुण्यं पुराकृतम् ।

प्राणप्रतिष्ठा च तथाष्टबन्धे बलिप्रदाने च बहिर्गते च ।

नैवेद्यकाले च तथा क्रमेण द्वारं च कुर्याद्धि कवाटबन्धनम् ॥

गर्भगेहं शिरः प्रोक्तं मुखनाद्यं दृढं तथा ।

मध्यं कुक्षिमित्याहुः पार्श्वे पाणिद्वयं भवेत् ।

गोपुरं पादमित्युक्तं एवं देवालयं भवेत् ॥

इति संग्रहः ॥ [Summary of शैवागमे स्कन्दतन्त्रे नित्यार्चनविधिः Fol. Fol. 13 – 21 transcript]

+

The next 5 fol contain Indrakshi stotra and बलिचक्रलक्षण & दर्भलक्षण.

Copied from a Tulu ms. with R.E. No 43224 of IFI. 17, 1, 4.3 fol. Tulu Script. 26 x 4.8 cm. 6–8 lines. very old. injured.

x

T. No. 981 (d)

R.E. 45392

RE 43216 IFI

श्रीः

अश्वत्थप्रतिष्ठा, उपनयन (शौनकीयकारिका)
विवाहः (प्रयोगः आश्वलायनः)

श्रीः

1a स्वस्ति। शौनकोवाच –

अश्वत्थस्य प्रतिष्ठाया विधिस्तस्य प्रशस्यते।
तस्मोत्तरायणे शुक्ले पक्षे पुण्यदिनान्विते॥
पञ्चम्यां च चतुर्दश्यां सप्तम्यां च त्रयोदशी।
मन्दवारेण संयुक्तः कुर्यादश्वत्थस्थापनम्॥
अदितिं पुष्यहस्तौ च अनुराधाश्वि रेवती।
स्थिरवारेण संयुक्तं अश्वत्थस्योपनायनम्॥
चन्द्रताराबलैर्युक्तं रोहिणीशतसंगमे।
त्यक्ताभ्यङ्गः ततः स्नानं दन्तधावनपूर्वकम्॥
शुक्लाम्बरधरो भूत्वा शुक्लमाल्यानुलेपनम्।
पुण्याहं वाचयित्वा तु यजमानो द्विजैः सह॥
आचार्यवरणं कृत्वा चत्वारो ऋत्विजस्ततः।
नान्दीश्राद्धं ततः कृत्वा मातृपूजनपूर्वकम्॥
अश्वत्थस्सन्निधिं कृत्वा पूर्वेद्युः सप्त नव वा।
1b परितो मण्टपं कृत्वा गोमयेनोपलिप्य च॥
चतुरश्रं चतुर्दिक्षु पृथग्वा[द्वा]रसमन्वितम्।
इक्षुतोरणरम्भाद्यैः दिग्विदिक्षु ध्वजान्वितैः॥
निधाय कलशं तत्र सुवर्णोदकसंभृतम्।
सूत्रवस्त्रावृतं कुर्यात् चतुःकुम्भार्चनं पृथक्॥
चतुर्भिर्वारुणैर्मन्त्रैरुपचार्यं तथान्तरम्।
प्रतिमां पूजयेद्विष्णोः तद्विष्णोरिति मन्त्रतः॥

लोकपालार्चनं कृत्वा वास्तुपूजां तथैव च ।
अश्वत्थस्योत्तरे भागे होमं कुर्याद्द्विजोत्तमः ॥
उल्लेखनाद्यै संस्थाप्य वह्निं वेदादिना द्विजम् ।
स्वगृह्योक्तप्रकारेण स्थालीपाकं निर्वाप्य च ॥
2a हुत्वाग्निमुखपर्यन्तं तद्विष्णोरिति मन्त्रतः ।
हुनेदश्वत्थसमिधं शतमष्टोत्तरं शतम् ॥
आज्यं विष्णोर्नुकमिति तद्विष्णोरिति पायसम् ।
शेषं स्विष्टकृतं हुत्वा प्रायश्चित्ताहुतिं हुनेत् ॥
आचार्यश्चतुरान्कुम्भान् समादाय भिषेचनम् ।
कुर्यादश्वत्थवृक्षस्य विष्णुसूक्तमनुस्मरन् ।
वस्त्रयुग्मं समावेष्ट्य गन्धमाल्यैः समर्चयेत् ।
कृत्वा प्रदक्षिणं तत्र प्रणम्य प्रार्थयेत्ततः ।
अश्वत्थ इति मन्त्रेण जपित्वाथ जपादिकम् ।
स्थापयित्वा ततो मूले सौवर्णस्य शलाकया ॥
अश्वत्थस्थापनं कृत्वा प्रतिमां तत्र निक्षिपेत् ।
आचार्यं पूजयेद्वस्त्रं गन्धमाल्यैरलंकृतम् ।
सदक्षिणां सवत्सां च गां दद्याच्च पयस्विनीम् ।
ततस्तु प्रतिमां दद्यात् चतुर्णां च पृथक्पृथक् ॥
2b निवेद्य प्रतिमां विष्णोराचार्याय सवस्त्रकान् ।
इतरेभ्यो यथाशक्ति दद्यात्तत्र गृहं व्रजेत् ।
प्रतिमां कुरुते यस्तु अश्वत्थस्य वरो भुवि ।
कुलं तारयते तस्य सुपुत्रां चैकविंशत् ॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ।
आयुःकामो लभेदायुः कन्यार्थी कन्यकां लभेत् ।

शत्रुक्षयं लभेत् तस्य मित्रवृद्धिं प्रजायते।
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात्।
इह लोकेषु सुखदं परं मोक्षमवाप्स्यसि।
इति शौनकीये [अश्वत्थ] प्रतिष्ठाविधिः।

×

शौनकोक्तं प्रवक्ष्यामि अश्वत्थस्योपनायनम्।
स्थापनाद्यष्टमे वर्षे द्वादशैकादशे तथवा॥
उक्तकालत्रयै तस्मात्कुर्यान्नान्तरायणम्।
3१ श्रेष्ठे तिथिषु चन्द्रार्कौ गुरौ शुक्रे प्रकाशिते॥
माघफाल्गुनयोश्चैत्रे ज्येष्ठे वैशाखमाघयोः।
मलमासादिमासे तु वर्जयेन्मौञ्जिबन्धनम्॥
न कुर्याच्छ [च्छे] दितेश्वत्थे विद्युद्दाहाग्निनाश्रिते।
उपानयनं कुर्वीत स्तद्रु [ठज] पर्णाङ्कुरान्विते॥
शुक्लपक्षे शुभर्क्षे च सुवारतिथिलग्नके।
चन्द्रानुकूले कर्तुश्च द्विजा कुर्यात्प्रयत्नतः॥
दन्तानां धावनं कृत्वा कर्ता स्नात्वा सचैलकम्।
कृत्वैव नित्यकर्माणि पूजयेदिष्टदेवताम्॥
नान्दीश्राद्धं प्रकुर्वीत गृहे पुण्याहपूर्वकम्।
तस्मिन्नेव दिने कर्ता अश्वं हेमफलादिभिः॥
कृत्वाशीर्वचनं गृह्य ततो गच्छेत्समाहितः।
कुर्याद्घोषैः सविविधैः पुण्यस्त्रीभिः समाहितः। (प?)
ब्राह्मणैर्वेदघोषैश्च गीतवाद्यादिभिः स्वनैः।
वस्त्रायज्ञोपवीतादि मौञ्जीबन्धाजिनादिकम्॥

पूजाद्रव्याणि होमं च संगृह्याश्वत्थसन्निधौ।
चम्योपवि
कर्ता प्रक्षालिताङ्घ्रिस्तु ह्याचामपेविशेच्छुचि ॥
३८ त्रिपञ्चदशहस्तेच गोमयेनोपलिप्य च।
धातुपिष्टेन संपूज्य रङ्गवल्लिकया तथा॥
अश्वत्थाग्ने [श्वत्थेशान) दिग्भागे कृत्वा पुण्याहवाचनम्।
आचार्यं वरयेत्पश्चाद्ब्राह्मणं वेदपारगम्।
आचारवन्तद्धर्मज्ञं कुलीनं च कुटुम्बिनम्।
सर्वावयवसंपूर्णं रोगदोषविवर्जितम्॥
शान्तं कुटुम्बिनं दान्तं सर्वप्राणिहिते रतम्।
वस्त्रोपवीतगन्धाद्यै रङ्गुलीयककुण्डलैः॥
कर्ता संपूजयेद्भक्त्या वित्तशाठ्यं न कारयेत्।
तेनैव कारयेद्विद्वान् अश्वत्थस्योपनायनम्।
कुर्यात्पञ्चामृतस्नानं तत्तन्मन्त्रैः पृथक्पृथक्।
अश्वत्थपूर्वदिग्भागे होमं कुर्यात्स्वशाखया॥
उल्लेखनादिमन्त्रांश्च चरुमन्तं प्रकल्प्य च।
वस्त्रयुग्मं ततो दद्याद्युवं वस्त्राणि मन्त्रतः।
यज्ञोपवीतं दत्वा तु धारयेद्युवजीनकम्।
यज्ञोपवीतमन्त्रं ?
मेखलां च त्रिधा वेष्ट्य प्रावेपामेति मन्त्रतः।
५९ तूष्णीं कृष्णाजिनं दण्डं प्रदद्याच्च यथाविधि।
गन्धपुष्पाक्षतैः शुक्लैः अश्वत्थस्य च पश्चिमे।
अश्वत्थे वो निषदनम्।
अथर्वणाभिक ऋषिः ओषधी त्रिष्टुब्देवता। अनुष्टुप्।
अनेन पूजयेत् [या ओषधीर्या फलिनीः अश्वैव इतिस्तथा।

वनस्पते शतवल्शो द्वा सुपर्णा इति क्रमात्।
यत्रा सुपर्ण इति च पञ्चर्चं च तथैव च ॥ वर्गम्।
समिद्भिश्चरुणा चैव पालाशीयैः पृथक्पृथक्।
हुत्वा नु दशभिः सम्यगेकाहुत्य समाहितः॥
अश्वत्थपश्चिमे देशे प्राङ्मुखश्चोपविश्य च।
दक्षिणेनैव हस्तेन स्पृष्ट्वा हस्त द्विजोत्तमः।
ओं भूर्भुवः स्वाहा पूर्वां च गायत्रीं त्रिजपेत्ततः।
निरीक्षेत ततोऽश्वत्थं देवस्य त्वेति मन्त्रतः।
आत्वेति ध्रुवसूक्तेन व्याहृति त्रितयेन च।
अश्वत्थनाममुच्चार्य द्वितीयायां च विभक्तितः॥
शलाकं च सुवर्णेन स्थापयामि पदं वदेत्।
4b हुत्वा स्विष्टकृतं पश्चात् होमशेषं समापयेत्॥
गन्धाक्षतैर्वेणु पुष्पैः धूपदीपोपहारकैः।
भक्षाद्यैः फलताम्बूलैः ततोऽश्वत्थं प्रपूजयेत्।
धेनुं पयस्विनीं दद्या आ[चा]र्याय सवत्सकाम्।
अश्वत्थाच्छादितं वस्त्रं आचार्याय प्रदापयेत्॥
अन्येषामपि विप्राणां स्वशक्त्या पूजयेत्ततः।
ब्राह्मणान्भोजयेत्पश्चात् भुञ्जीयाद्बन्धुभिः सह॥
एवं यः कुरुते तस्य वर्धते कमलायुधि।
कुलकोटिसमुद्धृत्य विष्णुसायुज्यमाप्नुयात्॥

इति शौनकीयोऽश्वत्थोपनयनविधिः॥

—x—

5a शौनकः —

अथातो अश्वत्थविवाहविधिं व्याख्यास्यामः।

स्थापिता अश्वत्थसमीपे निम्बवृक्षं तदलाभे पुन
रश्वत्थं प्रतिष्ठाप्य शाखोपशाखया पल्लवान् दृष्ट्वा अश्वत्थविवाहं
कुर्यात्। मार्गशीर्षमाघवैशाखज्येष्ठमासे गुरुभार्गवप्रकाशि-
ते कर्तुरश्वत्थस्य निम्बवृक्षस्य चन्द्रताराद्यनुकूले दिने कु-
र्यात्। कर्ता गृहे मङ्गलं कृत्वा मङ्गलस्नानं कृत्वा धौतव-
स्त्रं परिधाय गन्धमाल्यैरलंकृत्य पुण्यद्रव्याण्यादाय
अश्वत्थनिम्बसमीपं गत्वा कण्टकादिरहितं समस्थले
सतोरणे च मण्टपैरलंकृत्य गोमयेनोपलिप्य रङ्गव-
ल्लिकया स्वस्तिकं शङ्खचक्रपद्मादिकं लिखित्वा कर्ता प्रा-
ङ्मुख उपविश्य पुण्याहं वाचयित्वा नान्दीमुखं कृत्वा ग्रह-
शान्तिं कुर्यात्॥

प्राणानायम्य देशकालौ संकीर्त्य मम पुत्रपौ-
56 त्राभिवृद्ध्यर्थं पुत्रादीनां सपत्नीकानां प्राप्त्यर्थं? अश्व-
त्थविवाहं करिष्ये। पुण्यकरावोहिरिति तिसृभिः हिरण्य-
वर्णा इति चतसृभिः पुरुषसूक्तेन पवमानानुवाकेन
देवीं वाचमजनयन्त यद्वाग्वदन्ति द्वाभ्यां प्रणो दे-
व्यामो इति द्वाभ्यां देवबर्हिः सरस्वती इत्यनुवाकेन अ-
श्वत्थनिम्बवृक्षौ स्नापयित्वा हारिद्रमनुलिप्य गन्ध-
माल्यैरलंकृत्य तदुत्तरभागे स्वगृह्योक्तप्रकारेण अ-
ग्निं प्रतिष्ठाप्य तस्येशानभागे सुवर्णकलशं स्थाप्य
तत्र वरुणमावाह्य यथोक्तमधुपर्कं कृत्वा कन्यां वृ-
णीयुः॥

प्राणानायम्य कन्यावरणं कुर्यात्। शिवस्य
प्रपौत्राय नारायणस्य पौत्राय ब्रह्मणः पुत्राय अश्वत्थ-

६७ शर्मणे वराय इमां निम्बकन्यां वृणीमहे। वृणीध्वमि-
ति प्रतिवचनम्। कश्यपस्य प्रपौत्रीं विविक्तेः पौत्रीं
ब्राह्मणः पुत्रीं निम्बकन्यानाम्नीं धर्मप्रजासंपत्त्यर्थं-
मिमां कन्यां वृणीध्वम्। इत्येकवारं त्रिवारं च उच्चार्य
सुमुहूर्ते सहिरण्योदकं दद्यात्। तन्मन्त्रम्:-
निम्बप्रदापनं पुण्यं निम्बं पुण्यविवर्धनम्।
निम्बाश्वत्थविवाहे त्वां दास्यामि परया मुदा।
इमं मन्त्रं समुच्चार्य सहिरण्योदकं सिक्त्वा निम्ब वृक्ष-
शाखा अश्वत्थशाखया स्पर्शयित्वा दद्यात्। कार्पाससूत्रं
दशावनिभ्य मन्त्रेण ऋक्चश इति मन्त्रेण पुनः पञ्च-
पञ्चावृतं प्रदक्षिणं कृत्वा तत्राग्निसमीपं गत्वा यथो-
६८ क्तप्रकारेणान्वाधानं कृत्वा- मम पुत्रादीनां सपत्न-
रहितप्रसिद्ध्यर्थं यथास्थापिताश्वत्थस्य विवाहाख्य-
होमं करिष्ये। तत्रेध्मस्य प्रजापतिं प्रजापतिमाघार-
देवते आज्येन अग्नीषोमौ चक्षुषी आज्येन त्रिरग्निं प-
वमानं त्वमर्यमा प्रजापतिं प्रधानदेवता आज्येन अर्य-
मणं वरुणं पूषणं लाजद्रव्येण गृह्योक्तमन्त्रेणेत्यादि अ-
न्वाधाय स्वगृह्योक्तमार्गेण आज्यभागान्तं कृत्वा तुभ्यमिति
तिसृभिः कर्ता निम्बाश्वत्थौ प्रदक्षिणीकृत्वा। प्रदक्षिणं नि-
म्बाश्वत्थौ स्पृष्ट्वा प्रधानहोमं कुर्यात्। सोमः प्रथमो विविदे।
सोमो ददद्गन्धर्वाय। इहैव स्तं मावि। आ नः प्रजां जनयतु पे-
तो मुञ्चातु नामुतः। इमां त्वमिन्द्र मीढ्वः। अग्निरैतु प्रथमः। इ-
मामग्निस्त्रायताम्। मा ते गृहे। द्यौस्ते पृष्ठम्। अपशस्तां पौ-
त्रमृत्युम्। इममेव वरुण। तत्त्वायामि। त्वं नो अग्ने। स त्वं

7a नो अग्ने। त्वमग्ने अयासि। इति षोडशाज्याहुतीर्हुत्वा।
अग्न आयूंषीति त्वमर्यमा इति प्रजापतिरिति पञ्चाहु-
तीः। अनन्तरं स्वाञ्जलौ लाजहोमस्तापः। सोमः प्रथम इ-
ति पश्चात्। ततः स्विष्टकृतं हुत्वा प्रायश्चित्तादिहोमं स-
मापयेत्। अग्निमर्चयित्वा। कलार्पणमुद्वास्य। अश्वत्थस-
मीपं गत्वा। दक्षिणहस्तेनाश्वत्थमुपस्पृश्य ~~होमं~~ सोमः
प्रथम इति जपमन्त्राञ्जपित्वा। दक्षिणादि फलदानादिभि-
स्तोषयित्वा। ब्राह्मणान्भोजयित्वा। इत्याह भगवान्बादरा-
यणः॥ इत्यश्वत्थविवाहप्रयोगः। श्रीः॥

7b श्रीमहालिङ्गेश्वराय नमः। निर्विघ्नमस्तु। श्री-
गुरुभ्यो नमः। हरिः ओम्। अथातः पञ्चाङ्गरुद्राणां
न्यासपूर्वकजपहोमार्चनाभिषेकविधिं व्याख्यास्यामः॥
या ते रुद्रेति शिखायाम्। शिखाय नमः। अस्मिन्महत्य-
र्णव इति शिरसि। शिरसे नमः। सहस्राणीति ललाटे। हँ-
सः शुचिषदिति भ्रुवोर्मध्ये। त्रियम्बकं यजामह इति ने-
त्रयोः। नमस्स्रुत्याय इति कर्णयोः। मानस्तोके इति नासि-
कायाम्। अवतत्येति मुखे। नीलग्रीवौ द्वौ कण्ठे। नम-
स्ते अस्त्वायुधायेति बाह्वोः। या ते हेतिरिति च बाह्वोः। या
तीर्थानीति हस्तयोः। सद्योजातमिति पञ्चानुवाकानां पञ्च
स्वङ्गुलीषु। नमो वः किरिकेभ्यः इति हृदये। नमो गणेभ्य
इति पृष्ठे। नमो हिरण्यबाहव इति पार्श्वयोः। विज्यं धनु-
रिति जठरे। हिरण्यगर्भ नाभौ। मीढुष्टम इति कट्याम्।
8a ये भूतानामधिपतय गुह्ये। ये अन्नेषु विविध्यंसयोः। स-

सशिरा जातवेदा इत्यपाने। मानो महान्तमित्यूर्वोः। येप
ते रुद्रभाग इति जान्वोः। स्रग् मृष्टदिति जङ्घयोः। विश्वंभू-
तमिति गुल्फयोः। ये पथामिति पादयोः। अध्यवोचदिति
कवचम्। नमो बिल्मिने सुपकवचम्। नमो अस्तु नी-
लग्रीवायेति तृतीयं नेत्रम्। प्रमुञ्च धन्वन इत्यस्त्रम्।
य एतावन्तश्चेति दिग्बन्धः। ओं नमो भगवते रुद्रा-
येति नमस्कारं न्यसेत्॥

ओंकारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः।
मोकारं तु ललाटे वै भकारं मुखमध्यतः॥
~~भकारं कण्ठदेशे तु यकारं पादयोर्न्यसेत्।~~
(~~सव्यं च पादयोर्न्यस्य वामं न्यस्योरुमध्यतः॥~~)
गकारं कण्ठदेशे तु वकारं हृदि विन्यसेत्।
तेकारं दक्षिणे हस्ते रुकारं वामतो न्यसेत्॥
द्राकारं नाभिदेशे तु यकारं पादयोर्न्यसेत्।
सव्यं च पादयोर्न्यस्य वामं न्यस्योरुमध्यतः॥
अघोरं हृदि विन्यस्य मुखे तत्पुरुषं न्यसेत्।
८६ ईशानं मूर्ध्नि विन्यस्य हंसो नाम सदाशिवः॥
हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः।
एवं न्यासविधिं कृत्वा ततः संपुटमारभेत्।

हंसमन्त्रः। आत्मऋषिः। बृहतीच्छन्दः। हंसः स-
दाशिवः परमात्मा देवता। हंसां हृदयाय नमः। हंसीं शि-
रसे(स्वाहा) हंसूं शिखायै। हंसैं कवचाय हुम्। हंसौं ने-
त्रत्रयायै। हंसः अस्त्राय फट्। इति षडङ्गम्।

गमागमस्थं गमने च शून्यं

छित्वा दीपशीपं तिमिरान्धकारम्।
पश्यामि ते सर्वजनं हृदिस्थं
नमामि हंसं परमात्मरूपम्॥
हंस हंसाय विद्महे परमहंसाय धीमहि।
तन्नो हंसः प्रचोदयात्॥
हंस हंसा परमहंसा हंसः सोऽहं सोऽहं हंसः। इति मूलमन्त्रः।
हंस हंसेति यो ब्रूयात् हंसो नाम सदाशिवः।
एवं न्यासविधिं कृत्वा ततः संपुटमारभेत्॥
आदौ प्रणवमुच्चार्य व्याहृतिस्तदनन्तरम्।
बीजं मन्त्रं समुच्चार्य मन्त्रान्ते बीजमारभेत्।
१२ ललाटे नेत्रकर्णौ च मुखे बाहौ च नासिके।
हृदयं नाभिमूर्ध्नि स्यात् पादयोर्दश देहिकः॥
त्रातारमिन्द्रं त्वन्नो अग्ने स्तुगणः पन्थामसुन्वन्त तत्त्वायामि
स्योनो निर्युक्तिर्वयँसोमव्रतमीशानो मस्मे रुद्राश्मो स्या पृथि-
वीत्येतत्संपुटमिन्द्राद्दीं दिक्षु विन्यस्य। अस्मे रुद्रा त्रा-
तारमिन्द्रं। स्योना पृथिवी। इत्यादि संपुटीकृत्य। ओँ भूर्भु-
वःस्वः स्सुवः। ओं त्रातारमिन्द्रमवितारमिन्द्रगुं हवे हवे
सुहवँ शूरमिन्द्रम्। हुवे न शक्रं पुरुहूतमिन्द्रँ
स्वस्तिनो मघवा धात्विन्द्रः। ओं ललाटस्थाने प्राच्यां
दिशि इन्द्राय लोकपालाय नमः। ललाटस्थाने इन्द्राय
नमः। ओं भूर्भुवस्सुवः। त्वं नो अग्ने वरुणस्य विद्वान्
देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः। शोशुचानो
विश्वा द्वेषाँसि प्रमुमुग्ध्यस्मत्। नं आग्नेय्यां दिशि अग्न-
१६ ये लोकपालाय नमः। नेत्रस्थाने अग्नये नमः।

ओं भूर्भुवः सुवः। मों सुगं नः पन्थामभयं कृणोतु।
यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिञ्चन्त
देवाः। तदस्य चित्रꣳ हविषा यजाम। मों दक्षिणस्यां दिशि
यमाय लोकपालाय नमः। कर्णस्थाने यमाय नमः।

ओं भूर्भुवस्सुवः। भं। असुन्वन्तमयजमानमि-
च्छस्तेनस्येत्यान्तस्करस्यान्वेषि। अन्यमस्मदिच्छ सा त इत्या न-
मो देवि निर्ऋते तुभ्यमस्तु। भम्। नैर्ऋत्यां दिशि निर्ऋतये
लोकपालाय नमः। मुखस्थाने निर्ऋतये नमः॥

ओं भूर्भुवस्सुवः। गम्। तत्त्वायामि ब्रह्मणा व-
न्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह
बोध्युरुशꣳस मान आयुः प्रमोषीः। गम्। प्रतीच्यां दिशि
वरुणाय लोकपालाय नमः। बाहुस्थाने वरुणाय नमः।

10a ओं भूर्भुवस्सुवः। वम्। आनो नियुद्भिः शति-
नीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम्। वायो अस्मिन्
हविषि मादयस्व यूयं पात स्वस्तिभिः सदा नः। वं। वायव्यां
दिशि वायवे लोकपालाय नमः। नासिकास्थाने वायवे नमः।

ओं भूर्भुवः सुवः। तं। वयꣳ सोम व्रते तव मन-
स्तनूषु बिभ्रतः। प्रजावन्तो अशीमहि। तं। उत्तरस्यां दिशि
कुबेराय लोकपालाय नमः। हृदयस्थाने कुबेराय नमः॥

ओं भूर्भुवस्सुवः। रुं। तमीशानं जगतस्तस्थुषस्पतिं
धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद्वृधे
रक्षिता पायुरदब्धः स्वस्तये। रुं। ईशान्यां दिशि ईशानाय लो-
कपालाय नमः। नासिकास्थाने ईशानाय नमः॥

ओं भूर्भुवस्सुवः। ह्रौं। अस्मे रुद्रा मेहना पर्वता-

सो वृत्रहत्ये भरहूतौ सजोषाः। यशं सतेस्तुवनेधायि
पज्र इन्द्रज्येष्ठ अयं अक्तु देवाः। ह्रां। ऊर्ध्वायां दिशि ब्र-
10b ह्मणे लोकपालाय नमः। मूर्ध्नि स्थाने ब्रह्मणे नमः॥
ओं भूर्भुवस्सुवः। यं। स्योना पृथिवी भवानृक्षरा
निवेशनि। यच्छानः शर्म सप्रथाः। यं। पृथिव्यां दिशि
विष्णवे लोकपालाय नमः। पादस्थाने विष्णवे नमः॥१०॥
ललाटे नेत्रकर्णौ च मुखे बाहू च नासिके।
हृदये नाभि मूर्ध्नि स्यात् पादयोर्दश दैहिकम्॥
आदौ प्रणवमुच्चार्य व्याहृतिस्तदनन्तरम्।
बीजं मन्त्र समुच्चार्य मन्त्रान्ते बीजमाचरेत्॥
शिरसि शिरसि मूर्ध्नि च ललाटे भ्रूमुखेषु च।
कण्ठे च भुजयोश्चैव हृदये जठरे तथा।
नाभौ कट्यां च ऊरुभ्यां जानुजङ्घे च पादयोः।
विष्णु षोडशभिर्मन्त्रैः स्वरैश्च प्रणवान्वितैः।
श्रोत्रं च त्वक् च? चक्षुषी जिह्वा नासिका चैव पञ्चमी।
वाग्रूपस्तौ हस्तपादौ आपो भूमिस्तु षोडश॥
रौद्री कर्णन्यासेषु यथाक्रममुपस्पृशेत्॥ श्रीः।
11a विभुरसि प्रवाहणो वह्निरसि हव्यवाहनः।
श्वात्रोसि प्रचेतास्तुथोसि विश्ववेद उशिगसि
कविरङ्घारिरसि बम्भारिरवस्यु रसि दुवस्वाँ शुन्ध्युरसि
मार्जालीयः सम्राडसि कृशानुः परिषद्योसि पवमानः
प्रतक्वासि नभस्वान संमृष्टोसि हव्यसूद ऋतधामासि
सुवर्ज्योतिर्ब्रह्मज्योतिरसि सुवर्धामाजोस्य एकपादहिरसि बु-
ध्नियो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हि सीः॥
...

ओं अं त्रिभुरसि कुक्षियो रौद्रेण पाहि माग्ने पिपृहि मा
मा हिंसीः । ओं अं शिखास्थाने (~~ब्रह्मतत्वात्मने नमः। ओं इं~~
~~हव्यवाहनमसि कुक्षो रौद्रेण। ओं इं मूर्ध्निस्थाने च-~~
~~क्षुतत्वात्मने नमः। ओं ईं~~) श्रोत्रतत्वात्मने नमः। ओं आं
प्रवाहणो वह्निरसि कुक्षियो रौद्रेणाहिकेन। ओं आं शिरि
[रसि] स्थाने त्वक्तत्वात्मने नमः। ओं इं हव्यवाहनमसा-
त्रोऽसि कुक्षो रौद्रेण। ओं इं ~~कु~~ मूर्ध्निस्थाने चक्षुतत्वात्मने
नमः। ओं ईं प्रचेतास्तुथोऽसि कुक्षियो रौद्रेण। ओं ईं
ललाटस्थाने जिह्वातत्वात्मने नमः। ओं उं विश्ववेद उशि-
11b गसि कुक्षियो रौद्रेण। ओं उं भ्रूमध्येस्थाने नासिकत्वा-
त्मने नमः। ओं ऊं कविरक्रादिरसि कुक्षियो रौद्रेण॥ ~~ओमः~~
ओं ऊं मुखस्थाने वायवेनमः॥ ओं ऋं बम्भारि रवटस्य-
रसि कुक्षियो रौद्रेण। ओं ऋं कण्ठस्थाने उपस्थाय नमः।
ओं ॠं द्वस्थां धुंधूरसि कुक्षियो रौद्रेण। ओं ॠं भुजस्थाने ह-
स्ततत्वात्मने नमः। ओं (ऌं) ऌं मार्जालीयः सम्राडसि कुक्षि-
यो रौद्रेण। ओं (ऌं) ऌं हृदि स्थाने पादाय नमः। ओं (ॡं) कृशा-
नुः परिषद्योऽसि कुक्षियो रौद्रेण। ओं (ॡं) ॡं जठरस्थाने
अपानतत्वात्मने नमः। ओं (एं) एं पवमानः पूतक्रसि कुक्षि-
यो रौद्रेण। ओं (एं) एं नाभिस्थाने भूमिने नमः। ओं ऐं
नभस्थाने संमृष्टोऽसि। कुक्षियो रौद्रेण। ओं ऐं कटिस्थाने
तेजस्तत्वात्मने नमः। ओं ओं हव्यसूदकृतधामासि कु-
क्षियो रौद्रेण। ओं ओं ऊरुस्थाने वायुतत्वात्मने नमः। ओं
ओं स्वर्ज्योतिर्ब्रह्मज्योतिरसि कुक्षियो रौद्रेण। ओं औं जा-
12a नुस्थाने आकाश[तत्वात्म]ने नमः। ओं अं सुवर्णामजोऽसि

बुध्निया रौद्रेण । ओं अं चक्षुःस्थाने अहंकाराय नमः ।
ओं अः एकपादहिरसि बुध्निया रौद्रेणाहिकेन पाहि माग्ने
पिपृहि मामा मा हिंसीः। ओं अः पादस्थाने अव्यक्ततत्त्वा-
त्मने नमः॥ १६॥

एवमेवात्मनि विष्णुरसीति रौद्रीकरणं कृत्वा
त्वगस्थिगतैः सर्वपापैः प्रमुच्यते। सर्वभूतेष्वपराजितो भव-
ति। ततो भूतप्रेतपिशाच ब्रह्मराक्षस यक्ष यमदूत शाकिनी-
डाकिनी सर्प श्वापदा। तस्कराद्युपद्रवा ह्युपघाताः। सर्वे ज्वल-
न्तं पश्यन्तु। मामो ज्योतिः जुषत। माज्यं विच्छिन्नं यज्ञं
समिमं दधातु। या इष्टा उषासा निम्रुचश्च ताः संदधामि ह-
विषा घृतेन। अबोध्यग्निः समिधा जनानां प्रतिधेनुमिवाय-
तीमुषासम्। यह्वा इव प्रवयामुज्जिहानाः प्रभानवः सिस्रते-
12-6 नाकमच्छ। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपां रेतांसि जिन्वति॥ मूर्धानं दिवो अरतिं पृथिव्या वै-
श्वानरमृताय जातमग्निम्। कविं सम्राजमतिथिं जनाना-
मासन्ना पात्रं जनयन्त देवाः॥ मर्माणि ते वर्मभिश्छादय-
ामि सोमस्त्वा राजामृतेनाभिवस्ताम्। उरोर्वरीयो वरि-
वस्ते अस्तु जयन्तं त्वामनुमदन्तु देवाः। जातवेदाय यदि
वा पावकोसि वैश्वानरो यदि वा वैद्युतोसि। शं प्रजाभ्यो य-
जमानाय लोकमूर्जं पुष्टिं ददद्भ्यावबृहस्व। आत्म-
रक्षा कर्तव्या। ब्रह्माणं च दसृजत। तदकामयत। समात्म-
ना पद्येयेति। आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै दशमं
हूतः प्रत्यश्रृणोत्। दशहूतोभवत्। दशहूतो भवैना-
मेवः। तं वा एतं दशहूतं सन्तम्। दशहोतेत्याचक्षते।

परोक्षेण परोक्षप्रिया इव हि देवाः। आत्मन्च तस्मै स-
13a प्तमं हूतः प्रत्यशृणोत्। स सप्तभूतोभवत्। सप्तभूतो
भवैनामैषः। तमेतं सप्तभूतं सन्तम्। सप्तहोतेत्याचक्ष-
ते। परोक्षेणपरोक्षप्रिया इव हि देवाः। आत्मन् तस्मै
षष्ठं भूतः प्रत्यशृणोत्। स षड्भूतोभवत्। षड्भूतो भवै-
नामैषः। तं वा एतं षड्भूतं सन्तं षड्ढोतेत्याचक्षतेपरोक्षेणप-
रोक्षप्रिया इव हि देवाः। आत्मन् तस्मै पञ्चमं भूतः प्र-
त्यशृणोत्। स पञ्चभूतोभवत्। पञ्चभूतो भवैनामैषः।
तं वा एतं पञ्चभूतं सन्तम्। पञ्चहोतेत्याचक्षते परोक्षा-
परोक्षप्रिया इव हि देवाः। आत्मन् तस्मै चतुर्थं भूतः प्रत्य-
शृणोत्। स चतुर् (र्थ) भूतोभवत्। चतुरभूतो भवैनामैषः
तं वा एतं चतुरभूतं सन्तम्। चतुरहोतेत्याचक्षते। अ-
13b परोक्षेणापरोक्षप्रिया इव हि देवाः। तमब्रवीत्। त्वं वै मे
नेदिष्ठं हूतः प्रत्यश्रौषीः। त्वयैनानाख्यातार इति।
तस्मान्नु हैनांश्चतुर्होतार इत्याचक्षते। तस्माच्छुश्रूषुः
पुत्राणां हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति।
य एवं वेद। शिवसंकल्पं हृदयम्॥

येनेदं येन कर्माणि येन कर्माण्ययसो
यत्प्रज्ञानं सुषारथिर्यस्मिन्नृचो यदत्र बहु यज्जाग्रतो
येनेदं येन धैर्यमनो हृदयमचिन्त्यामकाम्ये पञ्चपञ्चा
वेदा इमेतं यस्येदन्धिराः परात्परतरं चैव परात्परतरं
ब्रह्म वेदादिषु गायत्री यो वै देवं प्रयतः प्रणवो योऽसौ
गोभिर्जुष्टं त्रियम्बकं कैलासशिखरे विश्वानुचक्षुः ~~[illegible]~~
चतुरो वेद यो नो महान्तं मानस्तोकं ऋतं सत्यं कद्रुद्राय

क्षत्रजाने यः प्राणतो य आत्मदा गन्धद्वारो य इदं शिव
संकल्पं षट्त्रिंशत्॥

15a येनेदं भूतं भुवनं भविष्यत्परिगृहीतम-
मृतेन सर्वं येन यज्ञस्तायते ~~वाचा मनसा चारु यन्ति य-~~
~~त्संमितमनुसंयन्ति प्राणिनस्तन्मे मनः शिवसंकल्पमस्तु~~
सप्तहोता तन्मे मनः शिवसंकल्पमस्तु॥ १॥ येन कर्माणि
प्रचरन्ति धीरा यतो वाचा मनसा चारु यन्ति यत्संमितम-
नुसंयन्ति प्राणिनः तन्मे मनः शिवसंकल्पमस्तु॥ २॥ येन
कर्माण्यपसो मनीषिणो यज्ञे कृ(ण्व)न्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः — ॥ ३॥ यत्प्रज्ञा-
नमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु। यस्मान्न
ऋते किञ्चन कर्म क्रियते तन्मे मनः — ॥ ४॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजि-
नीव। हृत्प्रतिष्ठं यदजिरं यविष्ठं तन्मे मनः — ॥ ५॥
यस्मिन्नृचः साम ~~यजूँषि य~~ यजूंषि यस्मिन्प्रतिष्ठा रथना
भाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे — ॥ ६॥
15b यदत्र षट्त्रिंशतं शरीरे यक्षस्य गुह्यं नवनाभमार्यम्।
दशपञ्चत्रिंशतं यत्परं च तन्मे मनः — ॥ ७॥
यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवेति। दूरङ्गमं
ज्योतिषां ज्योतिरेकं तन्मे मनः — ॥ ८॥
येनेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः।
तदसाग्नि [तदेवाग्निः] स्तमसो ज्योतिरेकं तन्मे मनः — ॥ ९॥
येनद्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च
तेनेदं जगद्व्याप्तं प्रजानां तन्मे मनः — ॥ १०॥

ये मनो हृदयं येच देवा ये दिव्या आपो ये सूर्यर-
श्मिः । ते श्रोत्रे चक्षुषी संचरन्तं तन्मे मनः — ॥ ११॥
अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तपरं तपत्।
सूक्ष्मात्सूक्ष्मतरं ज्ञेयं तन्मे मनः — ॥ १२॥
एकादशशतं च सहस्रं चायुतं च। नियुतं च प्रयुतं
चार्बुदं न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परा-
र्धश्च तन्मे मनः — ॥ १३॥
15a ये पञ्चपञ्चादश शतं सहस्रमयुतन्यर्बुदं च ते
अग्निचितेष्टकास्तं शरीरं तन्मे मनः — १४॥
वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः परस्तात्।
तस्य योनिं परिपश्यन्ति धीराः तन्मे मनः — ॥ १५॥
यस्येदं धीराः पुनन्ति कवयो ब्रह्माणमेतन्त्वा वृणत मिन्दुम्।
स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः ॥ १६॥
परात्परतरं चैव यत्पराच्चैव यत्परम्। तत्परात्परतोधीशं
तन्मे मनः — ॥ १७॥
परात्परतरं ब्रह्म यत्परात्परतो हरिः। तत्परात्परतो
ज्ञानं तन्मे मनः — ॥ १८॥
या वेदादिषु गायत्री सर्वव्यापि महेश्वरी।
ऋग्यजुः सामाथर्वैश्च तन्मे मनः — ॥ १९॥
यो वै देवं महादेवं प्रणवं पुरुषोत्तमम्।
यः सर्वे सर्ववेदश्च तन्मे मनः — ॥ २०॥
प्रयतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम्।
ओङ्कारं परमात्मानं तन्मे मनः — ॥ २१॥
योसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः।

15८ अकायो निर्गुणो ह्यात्मा तन्मे मनः— ॥ २२ ॥
गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च।
प्रजया पशुभिः पुष्कराक्षं तन्मे मनः— ॥ २३ ॥
त्रियम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ तन्मे मनः ॥ २४ ॥
कैलासशिखरे रम्ये शंकरस्य शिवालये।
देवतास्तत्र मोदन्ति तन्मे मनः— ॥ २५ ॥
विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात्।
सं बाहुभ्यां धमति संपतत्रै र्द्यावा पृथिवी जनयन्देव एकः। तन्मे— २६
चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः।
इतिहासपुराणानां तन्मे मनः— ॥ २७ ॥
मानो महान्तमुत मानो अर्भकं मान उक्षन्तमुत मान उक्षितम्।
मानो वधीः पितरं मोत मातरं प्रिया मानस्तनुवो रुद्ररीरिषः। तन्मे— २८
मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः।
16८ वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ॥ तन्मे— २९ ॥
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ तन्मे मनः— ३० ॥
कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। [मनः ॥ ३१ ॥
वोचेम शन्तमं हृदे। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु। तन्मे—
ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। [३२ ॥
स बुध्निया उपमा अस्य विष्ठास्सतश्च यो निमसतश्च विवः। तन्मे मनः—
यः प्राणतो निमिषतो महित्वैक इन्द्राजा जगतो बभूव ~~ईशे~~ [३३ ॥
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम। तन्मे— ॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।

यस्य छायामृतं यस्य मृत्युः तस्मै देवाय हविषा विधेम। तन्मे ॥ ३४॥
168 गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥ तन्मे मनः ॥ ३५॥
य इदं शिवसंकल्पं सदा ध्यायन्ति ब्राह्मणाः।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसंकल्पमस्तु॥ ३६॥
हृदयाय नमः। पुरुषसूक्तं शिरः।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्।
पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानः यदन्नेनातिरोहति॥
एतावानस्य महिमा अतो ज्यायांश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ्व्यक्रामत् साशनानशने अभि॥
तस्माद्विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥
179 यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥
सप्तास्यासन्परिधयः त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये।
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।
पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये।

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मा अजायत॥
तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू काबूरू पादावुच्येते॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
17b ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत।
चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायतः।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायतः॥
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्॥
वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे।
सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन्यदास्ते॥
धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः।
येवं विद्वानमृत इह भवति नान्यः पन्था विद्यते॥
यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः॥
शिरसे नमः॥ उत्तरनारायणं त्रिरग॥
अद्भ्यः संभूतपृथिव्यै रसाच्च विश्वकर्मणः समवर्तताधि।
18a तस्य त्वष्टा विदधद्रू॰ तत्पुरुषस्य विश्वमाजानमग्रे॥
वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः परस्तात्।
तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेयनाय॥
प्रजापतिश्चरति चरति चरति गर्भे अन्तः

अजायमानो बहुधा विजायते।
तस्य धीराः परिजानन्ति योनिं
मरीचीनां पदमिच्छन्ति वेधसः॥
यो देवेभ्य आतपति यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातः नमो रुचाय ब्राह्मये।
रुचं ब्राह्मं जनयन्तः देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात् तस्य देवा असन्वशे॥
ह्रीश्च ते लक्ष्मीश्च ते पत्न्यौ अहोरात्रे पार्श्वे।
नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनीषाण।
सर्वं मनीषाणा त्रिस्तायै वषट्॥ अप्रतिरथं कवचम्।
आशुः शिशानो वृषभो न युध्मो (भीमो) घनाघनः क्षोभणश्चर्षणीनाम्।
18b संक्रन्दनो निमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा॥
स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन।
संसृष्टजित्सोमपा बाहुश प्रभञ्जन्त्सेनाः प्रमृणो युधाजयन्न(न्न)
स्माकमेध्यविता रथानाम्।
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा
इमं सजाता अनुवीरयध्वमिन्द्रं सखायो अनुसंरभध्वम्।
बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्॥
19a अभि गोत्राणि सहसा गाहमानो दायो वीरः शतमन्युरिन्द्रः।
दुश्च्यवनः पृतनाषाट् समुद्ध्यो (-ध्यो) ऽस्माकं सेना अवतु प्रयुत्सु।
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः॥

देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे।
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम्।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु।
अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु।
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां महाꣳसि।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः।
उपप्रेत जयता नरः स्थिरा वः सन्तु बाहवः।
इन्द्रो वः शर्म यच्छत्वनाधृष्या यथासथ।
अवसृष्टा परापत शरव्ये ब्रह्मसꣳशिते।
गच्छामित्रान्प्रविश मैषां कञ्चनोच्छिषः।
मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजामृतेनाभिवस्ताम्।
19-6 उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः।
यत्र बाणाः संपतन्ति कुमारा विशिखा इव।
इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु॥ कवचाय हुम्।
प्रतिपूरुषं नेत्रम्। प्रतिपूरुषमेककपालान्निर्वपत्येकमतिरिक्तं
यावन्तो गृह्याः स्युस्तेभ्यः कमकरं पशूनाꣳ शर्मासि शर्म
यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थे।
आखुस्ते रुद्र पशुस्तं जुषस्व। एष ते रुद्र भागः सह स्वस्रा
ऽम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अ-
स्मभ्यं भेषजꣳ सुभेषजं यथासति। सुगं मेषाय मेषाय मेष्या
अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम्। यथा नः श्रेयसः करत्
यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसा-
ययात्॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वा-

ऊरुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्।
एष ते रुद्र भागस्तं जुषस्व। तेनावसेन परो मूजवतो-
२०५ ऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः।
प्रतिपूरुषमेककपालान्निर्वपति। जाता एव प्रजा रुद्रा-
न्निरवदयते। एकमतिरिक्तम्। जनिष्यमाणा एव प्रजा
रुद्रान्निरवदयते। एककपाला भवन्ति। एकधैव रुद्रं
निरवदयते। नाभिघारयति। यदभिघारयेत्। अन्त-
रवचारिणꣳ रुद्रं कुर्यात्। एकोल्मुकेन यन्ति। तद्धि
रुद्रस्य भागधेयम्। इमां दिशं यन्ति। एषा वै रुद्रस्य
दिक्। स्वायामेव दिशि रुद्रं निरवदयते।
रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशु-
रिति निर्दिशेद्यं द्विष्यात्। यमेव द्वेष्टि तमस्मै पशुं नि-
र्दिशति। यदि न द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्।
न ग्राम्यान्पशून्हिनस्ति। नारण्यान्। चतुष्पथे जुहोति।
एष वा अग्नीनां पड्बीशो नाम। अग्निवत्येव जुहोति। म-
ध्यमेन पर्णेन जुहोति। स्रुग्घ्येषा। अथो खलु। अन्तमेनै-
२०६ व होतव्यम्। अन्ततः[कः] एव रुद्रं निरवदयते। एष-
ते रुद्र भागः सह स्वस्राम्बिकयेत्याह। शरद्वा अस्याम्बिका
स्वसा। तया वा एष हिनस्ति। यꣳ हिनस्ति। तयैवैनꣳ सह
शमयति। भेषजं गव इत्याह। पूर्वै एव ग्राम्याः पशवः।
तेभ्यो भेषजं करोति। अवाम्ब रुद्रमदिमहीत्याह।
आशिषमेवैतामाशास्ते। त्र्यम्बकं यजामह इत्याह।
मृत्योर्मुक्षीय माऽमृतादिति वा एतदाह। उत्किरन्ति।
भगस्य लीप्सन्ते। मूते कृत्वा सजन्ति। यथा जनं य-

तेव संकरोति। तादृगेव तत्। एषते रुद्रभाग इत्याह निरवत्यै अप्रतीक्षमायन्ति। अपः परिषिञ्चन्ति। रुद्रस्या' न्तर्हित्यै। प्र वा एतेऽस्माल्लोकाच्च्यवन्ते। ये त्र्यम्बकैश्चरन्ति। आदित्यं चरुं पुनरेत्यं निर्वपति। इयं वा अदितिः। अस्यामेव प्रतितिष्ठति। नेत्रत्रयायै वषट्।

शतरुद्रियमित्यस्माम्। त्वमग्ने रुद्रो असुरो
२१९ महो दिवस्पृग्र् शर्धो वा रुतं पृक्ष ईशिषे। त्वं वातै ररुणै-
र्यासि शङ्गयस्त्वम्। पूषा विधतः पासिनुत्मना। आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः। अग्निं पुरातन इत्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम्। अग्निहोता निषसादा यजीयानुपस्थे मातुः सुरभा उ(सु) लोके। युवा कविः पुरुनिष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः। साध्वीमकर्देववीतिं नो अस्य यज्ञस्य जिह्वामविदाम गुह्याम्। आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य। अक्रन्ददग्निस्तनयन्निव द्यौः। क्षामारेरिहद्वीरुधः समञ्जन् सद्यो जज्ञानो वि हीमिद्धो अख्यादा रोदसी भानुना भात्यन्तः। त्वे वसूनि पुर्वणीक होता दोषा वस्तोरेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके। तुभ्यन्ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् अग्ने कामाय
21.6 येमिरे। अश्याम तं काममग्ने तवोत्यश्याम रयिं रयिवः सुवीर्यम्। अश्याम वाजमभि वाजयन्तो अश्याम द्युम्नमजराजरन्ते। श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमाभर। वसो पुरुस्पृहं रयिम्। स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः। यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनु-

यातिभर्वन्। आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते
प्राण आयति परायक्ष्मं सुवामि ते। आयुर्दा अग्ने हविषो जु-
षाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु
गव्यं पितेव पुत्रमभि रक्षतादिमम्। तस्मै ते प्रति हर्यते
जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम्। दिवस्परि प्रथमं
जज्ञे अग्निरस्य द्वितीयं परिजातवेदाः। तृतीयमप्सु नृमणा [मणा?]
अजस्रमिन्धान एनं जरते स्वाधीः। शुचिः पावक वन्द्योऽग्ने बृह-
द्विरोचसे। त्वं घृतेभिराहुतः। दृशानो रुक्म उर्विया व्यद्यौद् दु-
र्मर्षमायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिर्य-
22a देनं द्यौरजनयत्सुरेताः। आ यन्ति ये नृपतिं तेज आनशुः
चिरेतो निमिषन्तो चोरभीके। अग्निः शर्धमनवद्यं युवानं
स्वाध्यं जनयत्सूदयच्च। स तेजीयसा ... सा वोत उत
शिक्षस्व पत्यस्य शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ
भूयाम ते सुष्टुतयश्च वस्वः। अग्ने सहन्तमाभर [मे] द्युम्न-
स्य प्रासहा रयिम्। विश्वा यश्चर्षणीरभ्यासा वाजेषु सास-
हत्। तमग्ने पृतनासहं रयिं सहस्व आभर। त्वं
हि सत्यो अद्भुतो दाता वाजस्य गोमतः। उक्षान्नाय [आ?] वशान्न-
पृष्ठाय वेधसे। स्तोमैर्विधेमाग्नये। स [वा?] ह्या हि सूनो अस्य-
द्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम्। स त्वं न ऊर्जसह [न] ऊर्जं
धा राजेव जेरवृके क्षेष्यन्तः। अग्न आयूंषि पवस आ-
सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्। अग्ने पव-
स्व स्वपा अस्मे वर्चः सुवीर्यम्। दधत्पोषं रयिं मयि।
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान् य-
क्षि यक्षि चासनः। पावक दीदिवोऽग्ने देवां इहावह।

उपयज्ञं हविष्मन्तः। अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः
कविः। शुची रोचत आहुतः। उदग्ने शुचयस्तव शुक्रा भ्राजन्त
ईरते। तव ज्योतींष्यर्चयः। त्वमग्ने असुरो महो दिवः। त्वं
शर्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि शङ्गयः। त्वं
पूषा विधतः पासि नु त्मना। देवा देवेष्वाश्रयध्वम्। प्रथमा द्विती-
येषु श्रयध्वम्। द्वितीयास्तृतीयेषु। तृतीयाश्चतुर्थेषु। चतुर्थाः
पञ्चमेषु। पञ्चमाः षष्ठेषु। षष्ठाः सप्तमेषु। सप्तमा अष्टमेषु।
अष्टमा नवमेषु। नवमा दशमेषु। दशमा एकादशेषु।
एकादशा द्वादशेषु। द्वादशास्त्रयोदशेषु। त्रयोदशाश्चतु-
र्दशेषु। चतुर्दशाः पञ्चदशेषु। पञ्चदशाः षोडशेषु। षोडशाः
सप्तदशेषु। सप्तदशा अष्टादशेषु। अष्टादशा एकान्नविं-
23a शेषु। एकान्नविंशा विंशेषु। विंशा एकविंशेषु। एक-
विंशा द्वाविंशेषु। द्वाविंशास्त्रयोविंशेषु। त्रयोविंशाश्च-
तुर्विंशेषु। चतुर्विंशाः पञ्चविंशेषु। पञ्चविंशाः षड्-
विंशेषु। षड्विंशाः सप्तविंशेषु। सप्तविंशा अष्टाविंशेषु।
अष्टाविंशा एकान्नत्रिंशेषु। एकान्नत्रिंशा त्रिंशेषु।
एकत्रिंशा द्वात्रिंशेषु। द्वात्रिंशास्त्रयस्त्रिंशेषु, श्रयध्वम्।
देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिंशाः। उत्तरे भवत। उत्तर-
वर्त्मान उत्तरसत्वानः। यत्काम इदं जुहोमि। तन्मे सम-
ृध्यताम्। वयं स्याम पतयो रयीणाम्। भूर्भुवस्स्व-
स्स्वाहा। अस्त्राय फट्॥ शिवः॥

एवं पञ्चाङ्गं न्यसेत्। सकृज्जपेदष्टाङ्ग-
प्रणामम्। हिरण्यगर्भो यः प्राणते। क्रतुस्थानं महीयो-
रुपन्नासि याग्ने नयः। अग्न इमं प्रस्तरमित्यष्टाङ्गम्।

प्रणम्य। हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पति-
23b रेक आसीत्। स दाधार पृथिवीं द्यामुतेमां तस्मै देवाय ह-
विषा विधेम। यः प्राणतो निमिषतो महित्वैक इन्द्राजा ज-
गतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः तस्मै देवाय
हविषा विधेम॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो
वेन आवः। स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसत-
श्च वीवः। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पि-
पृतान्नो भरीमभिः। उपश्वासय पृथिवीमुत द्यां पुरुत्राते
नु?
मह्तां विष्ठितं जगत्। स दुन्दुभे सजूरिन्द्रेण देवैर्दूर-
देवीयो अपसेध शत्रून्॥ अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम॥ या ते अग्ने रुद्रिया तनू-
25a स्तया नः पाहि तस्यास्ते स्वाहा॥ इमं यम प्रस्तरमाहि सी-
दाङ्गिरोभिः पितृभिः संविदानः। आत्वा मन्त्राः कविशस्ता
वहन्त्वेना राजन् हविषा मादयस्व। इत्यष्टाङ्गं प्रणम्य।
उरसा शिरसा दृष्ट्या मनसा वचसापि वा।
(जानुभ्यां)
पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते।

अथात्मानं शिवात्मानं रुद्ररूपं ध्यायेत्।
शुद्धस्फटिकसंकाशं त्रिणेत्रं पञ्चवक्त्रकम्।

दशभुजं सर्वाभरणभूषितं नीलग्रीवं शशाङ्कचिह्नं
नागयज्ञोपवीतिनं नागाभरणभूषितं व्याघ्रचर्मोत्तरीयं क-
मण्डल्वक्षसूत्रधरमभयवरप्रदं शूलहस्तं ज्वलन्तं कपि-
लजटिलं शिरामुद्योतधारिणं वृषभस्कन्धसमारूढं ~~कृ-~~
~~वृषभस्कन्धस्थं~~ उमादेहार्धधारिणं अमृतेनाप्लुतं

हृष्टं दिव्यभोगसमन्वितम्। दिग्देवतासमायुक्तम्। सुरासुरनमस्कृतम्।

नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्।
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम्।
एवं रूपिणमेवं ध्यात्वा द्विजः सम्यक्ततो यजनमारभेत्।

अग्निः काण्डऋषिः अघोरघोरान्ध्येति बीजशक्तिः। पकारान्धे-
24b ति कीलकम्। श्रीरुद्रो देवता। रुद्रप्रीत्यर्थे रुद्राभिषेके वि-
नियोगः॥

अथातो रुद्रस्नानार्चनविधिं व्याख्यास्यामः। आदिदे-
वतीर्थे स्नात्वा। दैत्यशुचिः प्रयतो ब्रह्मचारी शुक्लवासाः त-
स्य दक्षिण प्रत्यगोंऽतन्मुखं स्थित्वा आदिदेवता समर्पयेत्।
प्रजनने ब्रह्मा तिष्ठतु। पादयोर्विष्णुस्तिष्ठतु। हस्तयोर्हरस्ति-
ष्ठतु। बाह्वोरिन्द्रस्तिष्ठतु। जठरे अग्निस्तिष्ठतु। हृदये शिवस्ति-
ष्ठतु। कण्ठे वसवास्तिष्ठतु। वक्त्रे सरस्वती तिष्ठतु। नासिकयोर्वा-
युस्तिष्ठतु। नयनयोश्चन्द्रादित्यौ तिष्ठेताम्। नयनयोश्चन्द्रादि-
त्यौ तिष्ठेताम् ?। कर्णयोरश्विनौ तिष्ठताम्। ललाटे रुद्रास्तिष्ठ-
न्तु। मूर्ध्न्यादित्यादित्यास्तिष्ठन्तु। पार्श्वयोः शिवाशंकरौ ति-
ष्ठेताम्। सर्वतो वायुस्तिष्ठतु। ततो बहिः सर्वतोऽग्निज्वालामा-
लापरिवृतास्तिष्ठन्तु। सर्वेष्वङ्गेषु सर्वदेवता यथास्थानं ति-
25a ष्ठन्तु। मां रक्षन्तु। अग्निर्मे वाचि श्रित इति यथालिङ्गमङ्गा-
नि संमृज्य। अग्निर्वायुः सूर्यश्चन्द्रमा दिशस्तथा पृथिवीऽ-
न्तरिक्षं नक्षत्रः इन्द्रः पर्जन्य ईशान आत्मा पुनर्मे। अग्निर्मे
वाचि श्रितः। वाग्घृदये। हृदयं मयि। अहममृते। अमृतं ब्र-
ह्मणि। वायुर्मे प्राणे श्रितः। प्राणो हृदये। सूर्यो मे चक्षुः श्रितः

चक्षुर्हृदये। चन्द्रमा मे मनसि श्रिताः। मनो हृदये। दिशो मे श्रोत्रे श्रितः। श्रोत्रꣳ हृदये। आपो मे रेतसि श्रिताः। रेतो हृदये। पृथिवी मे शरीरे श्रिता। शरीरꣳ हृदये। ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये। इन्द्रो मे बले श्रितः। बलꣳ हृदये। पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। आत्मा म आत्मनि श्रित। आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्। वै-

256 श्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः। अथैनं गन्धाक्षतपत्रपुष्पधूपदीपनैवेद्यताम्बूलैरभ्यर्च्यात्मानं प्रत्याराधयेत्।

आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः।
आराधयामि भक्त्या त्वां मां गृहाण महेश्वर।

आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिः वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम्। ईशानमावाहयामीत्यावाह्य। स .. मितेनावाहनम्। उत्तरतः चण्डेश्वराय नमः। भूर्भुवः स्वरोमिति निर्माल्यं विसृज्य

स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्संप्रीतिभावेन लिङ्गेऽस्मिन्सन्निधिं कुरु।

सद्योजातं प्रपद्यामीत्यासनं समर्पयामि। सद्योजाताय वै नमो नमः इति पाद्यम्। भवे भवे नातिभवे भवस्व मामित्यर्घ्यम्। भवोद्भवाय नम इत्याचमनम्। वामदेवाय नम इति स्नानम्। ज्येष्ठाय नम इति वस्त्रम्। श्रेष्ठाय नम इत्युपवीतम्। रुद्राय नम इत्याभरणम्। कालाय नम इति

नुवाकैर्वा अग्नाविष्णू सजोषस इत्येतमनुवाकं जपान्ते
जपान्ते पुनराराधनमुत्तराराधनं च कुर्यात्। एतद्रुद्रविधा-
नम्। तदेकरुद्रविधानम्। समस्तपापक्षयार्थी व्याधिवि-
मोचनार्थी श्रीकामः शान्तिकामः पुष्टिकामस्तुष्टिकामः
आयुष्यकामः आरोग्यकामः प्रजाकामः पशुकामो वा जी-
27a वितार्थी चिन्तितार्थी मोक्षार्थी च कुर्यादेवं कुर्वन्नृद्धिमवा-
प्नोतीत्याचार्याय दक्षिणां दश गास्सवत्साः स्वर्णरजतविभू-
षित वृषभैकादशान्तलाभ एकां गां दद्यात्। एकादश ब्राह्मणान्भो-
जयेदश्वमेध शतसहस्र फलं मवाप्नोतीत्याह भगवान्बोधायनः॥
श्री महालिङ्गेश्वराय नमः॥ ओम्॥ श्रीः॥

Copied from a ms. with RE 43216 F1F1.
Fol. 1-27, 25 x 5.3 cm. 8 lines per page. Tulu script, slightly damaged. The other work here in are शैवागमपटलाः.

6b कुलघोष्यै नमः। सुघोष्यै नमः। वज्रवेष्ट्यै नमः। सुराङ्गि-
ण्यै नमः। सुमुख्यै नमः। सुभुजायै नमः। प्रमोदिन्यै नमः।
इति पीठोपरि। क्षौं हौं नमः। इति बलिं दत्वा। तत्रैव अष्ट-
दलस्थाने महाकालाद्याः पूजयेत्। पुनर्मूलेन बलिं दत्वा
मूलान्ते दुर्गापार्षदेभ्यः सर्वेभ्यो भूतेभ्यो नमो नमः स्वाहा।
इति जलाप्लुतबलिस्संवप्य बलिमुद्रां बन्धयेत्।

अथ सुब्रह्मण्ये। बलिपीठस्य पूर्वाद्यष्टदिक्षु। शूर-
सेनाय नमः। उग्रसेनाय। शिखिवाहनाय। जगत्सेनाय। महासे-
नाय। चण्डसेनाय। क्रुद्धसेनाय। क्रूरसेनाय नमः। इत्यधोभागे
जयत्सेनाय नमः। उपरि स्कन्दसेनाय नमः इति वा। अथवा
भूतिदाय स्वाहा इत्यादिपिङ्गलान्तान्। उपरि स्कन्दसेनाय नमः
इति बलिं दत्वा

जिनः
ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजनाः।
तृप्यन्तु ते मुदं यान्तु सन्तोऽसन्तो नमो नमः। स्वाहा।
इति जलाप्लुतबलिः। पुनः पुष्पमाराध्य बलिमुद्रां प्रदर्श-
येत्॥ पुनर्विघ्नेशे। बलिपीठस्य पूर्वाद्यष्टदिक्षु गजव-
क्त्राय नमः। गणेशाय। विनायकाय। चण्डविक्रमाय। विघ्नक-
राय। सर्पमेखलाय। शूर्पकर्णाय। नागदन्तिने नमः। इति अ-
7a धोभागे संकल्प्य कुमुदाननरुद्रावक्त्राय नमः। उपरि विघ्ने-
शाय नमः। इति पुनः मूलेन बलिं दत्वा। विघ्नपार्षदेभ्यः
सर्वेभ्यो भूतेभ्यो नमो नमः स्वाहा। पुनः सकृज्जलं दत्वा बलि-
मुद्रां प्रदर्शयेत्॥

पुनः शास्तरि। बलिपीठस्याग्रे स्थित्वा बलिपीठं च
प्रोक्ष्य पुष्पमाराध्य संकल्प्य पुनस्तत्र पूर्वाद्यष्टदिक्षु। वीर-

बाहवे नमः। इत्यादि अष्टदिक्षु पुनः अधोभागे संकल्प्य कुमुदके भूतेशाय नमः। उपरि शास्तृसेनाय नमः इति पुनर्मूलेन बलिं दत्वा। मूलान्ते शास्तृपार्षदेभ्यः सर्वेभ्यो भूतेभ्यो नमो नमः स्वाहेति जलाप्लुतबलिः। पुनर्जलं दत्वा बलिमुद्रां प्रदर्शयेत्। इति सप्तदेवेषु महाबलिपीठे बलिप्रकारः।

पुनस्तद्बहिः वास्तुबल्यन्तान् देवग्रहादीन् द्वारवशात् पितृगणादीन्वा संपूज्य बलिं दद्यात्। तत्र देवग्रहादि बलिस्थाने। ओं नमो नारायणाय विष्णुपार्षदेभ्यः सर्वेभ्यो भूतेभ्यो नमो नमः स्वाहा इति विष्णौ॥ शिवादिषु। तत्तन्मूलान्ते तत्तत्पार्षदेभ्यः सर्वेभ्यो भूतेभ्यो नमो नमः स्वाहा इति जलगन्धपुष्प हविष्कन्तद्दिग्बलिं कुर्यात्। एवमष्टदिक्षु बलिं दत्वा दिग्बलिमन्त्रेण शीघ्रं प्रदक्षिणबलिं कुर्यात्। पुनः ईशकोणे। ओं क्षं क्षेत्रपालाय नमः इति संपूज्य बलिं दत्वा स्वस्वमूलेन च संपूज्य बलिं दत्वा शेषं हविस्तस्मै निवेद्य तद्विसर्ज्य गण्डूषादि दत्वा किञ्चित्संपूज्य ब्रह्मार्पणादि सर्वं
76 कुर्यात्। अथवा द्वितीयावरणान्ते देवग्रहादिषु कं क्षेत्रपालबलिं जलाप्लुतं बलिं च कृत्वा महाबलिपीठे समापयेत्। उभयपक्षे पुनः अन्तर्गत्वा प्रदक्षिणीकृत्य मान इत्यादिना नमस्कृत्य देवं संपूज्य प्रासादं लभेत्॥ इति श्रीभूतबलिप्रकारः॥ शुभमस्तु। श्रीः। ओम्॥

* * *

उत्सवबलि उपस्थानं शिवे लिखामि। तत्र नन्दिमहाकालयोः।

नमस्ते सर्वभूतेश नन्दिने तु शिवात्मने।

॥

नमस्तेऽस्तु महाकाल शिवाय परमात्मने॥
नमस्ते शूलिमुक्ताय शूलहस्ताय धीमते।
(दृ) द्विष्यां निहत दैत्याय शंकराय नमो नमः॥
नमस्ते शूलिमुक्ताय परशुव्यग्रपाणये।
द्विष्यां निहत दैत्याय शंकराय नमो नमः॥
दैत्य दर्पविनाशाय सहस्राक्षाय धीमते।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो॥
मुखं यः सर्वदेवानां येन हव्यं च नीयते।
येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे॥
येन संह्रियते सर्वं येन धर्मश्च रक्ष्यते।
यस्माद्बिभेति लोकोऽयं प्रेतराज नमोऽस्तु ते॥
राक्षसा यातुधानाश्च पिशाचा यान्त्ययन्ति यम्।
तस्मै निर्ऋतिरूपाय रक्षसां पतये नमः।
येन संरक्ष्यते सर्वं यस्मिंस्तस्मिन् प्रतिष्ठितम्।
(अ) नमोऽपपाशहस्ताय तस्मै पांपतये नमः॥
पूर्वान्ते च क्रियान्ते च येन प्राणादयः क्रमात्।
भूतानां पतये नित्यं नमस्तस्मै मरुत्पते॥
(श्यामृततां) ये प्राग्यामृतता यान्ति देवा यज्ञ(ज्ञै) शरीरिणः। प्राप्यामरतां
४१ सोमाय गदिने तस्मै ज्योतिषां पतये नमः॥
यत्प्रसादाज्जगत्सर्वं धनेन परिपूर्यते।
यक्षगुह्यकनाथाय धननाथ नमोऽस्तु ते॥
येन कालाग्निना लोको युगान्ते ऽपदह्यते।
तस्मै ते ब्राह्मणः पुत्र विरूपाक्ष नमोऽस्तु ते॥
येन सृष्टं जगत्सर्वं सर्गादौ निजशासनात्।

पितामह नमस्तुभ्यं सर्वलोकेश पद्मज।
पन्नगाधिपति देव अनन्तो नाम नामतः।
पातालवासिने नित्यं नागराज नमोऽस्तु ते॥
वाहनाय महाशंभोः शैलार्णव धनस्वन।
वृषभाय नमस्तुभ्यं सर्वदुःखप्रशान्तये।
वीरभद्र नमस्तेऽस्तु नमो विघ्नेश्वराय च।
ब्राह्म्यादिभ्यश्च मातृभ्यः सर्वेभ्यो वै नमो नमः॥
श्रीधराय नमस्तेऽस्तु नमस्तेऽश्वमुखाय च।
वागीश्वर्यादिमातृभ्यः सर्वेभ्यो वै नमो नमः।
चण्डेश्वर नमस्तेऽस्तु देवनिर्माल्यधारिणे।
ओं स्फुरन्स्फोटय हुंफट् स्वाहा। इति नन्दिमन्त्रः।
ओं भों कपालिने ओं नमः इति महाकालमन्त्रः।
ओं नमो भूतेभ्य इति बलिं दत्त्वा दशदिक्षु तत्र तत्रैव
४८ पूर्वस्यामित्यादिबलिं दद्यात्। पूर्वादिचतुर्दिक्षु उपरि-
भागं संकल्प्य ईशानेनं च तत्कल्प्यनन्तरं ये भूताः
सुरसंघ इत्यादिना बलिं दद्यात्। पूर्वस्यां दिशि शिवस्य
भगवतो ये गणाः वज्रपाणयः श्वेताः श्वेताक्षाः श्वेत-
लोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनश्च तेभ्यो
वै नमो नमः स्वाहा। इति पूर्वदिङ्मन्त्रः॥

पुनस्तत्रान्यदिक्षु दिक्पदे वज्रायस्त्रपदे श्वे-
तादिवर्णपदे च तत्पदं योजयेत्।। आग्नेय्यां दिशि शि-
वस्य। शक्तिपाणयः रक्ता रक्ताक्षाः इत्यादि। याम्यां दिशि
दण्डपाणयः कृष्णाः कृष्णाक्षाः इत्यादि। नैरृत्यां दिशि
खड्गपाणयः श्यामाः श्यामाक्षाः इत्यादि। वरुणां दिशि

पाशपाणयः शबलाः शबलास्तत इत्यादि। वायव्यां दिशि
अङ्कुशपाणयः धूम्राः पीताः धूम्रास्तत इत्यादि। सौम्यां दिशि
गदापाणयः कृष्णाः सिताः सितास्तत इत्यादि। ईशान्यां दिशि शूल-
पाणयः कपिलाः कपिलास्तत इत्यादि। ऊर्ध्वायां दिशि पद्म-
पाणयः सूक्ष्माः सूक्ष्मास्ता इत्यादि। ~~ईशान्यां दिशि शूलपाणयः~~
~~कपिलाः कपिलास्तत इत्यादि। ऊर्ध्वायां दिशि~~ अधस्तान्दि-
१a शि विषपाणयः धूम्राः धूम्रास्ता इत्यादि। लोकपालतद्व-
मन्त्रमन्त्रानन्तरं अगमण्टपे। वृषभाय नमः। महाबलाय न-
मः। सौरभेयाय नमः हरवाहनाय नमः। इति वृषभमन्त्रः।
सौरभेयाय विद्महे महाबलाय धीमहि। तन्नो वृषः प्रचोद-
यात्। इति गायत्री। सामान्यमातरः। वीरभद्रेति प्रार्थ्य
पूर्वपश्चिमपार्श्वयोः वीरभद्रं गणपतिं च संपूज्य बलिं
दत्वा स्वस्वगायत्र्या तत्पार्षदेभ्यो नमः। इति पृथक्संपूज्य
बलिं दद्यात्। पुनस्तयोर्मध्ये पूर्वादिपश्चिमान्तं। ब्रों
ब्राह्म्यै नमः। मं माहेश्वर्यै नमः। कौं कौमार्यै नमः। वैं वैष्ण-
व्यै नमः। वं वाराह्यै नमः। इं इन्द्राण्यै नमः। चं चामुण्डायै
नमः। इति वीरभद्राय विद्महे महाकायाय धीमहि। तन्नः
शान्तः प्रचोदयात्। एकदंष्ट्राय विद्महे गजाननाय धीमहि।
तन्नो दन्तिः प्रचोदयात्। ब्रह्मभूतायै विद्महे कुशहस्तायै
धीमहि। तन्नो ब्राह्मी प्रचोदयात्। महेश्वरभूतायै विद्महे
शूलहस्तायै धीमहि। तन्नो माहेश्वरी प्रचोदयात्। स्कन्दभू-
तायै विद्महे शक्तिहस्तायै धीमहि। तन्नो कौमारी प्रचोदयात्।
प्रजापतिभूतायै विद्महे गदाहस्तायै धीमहि। [तन्नो] वैष्ण-
१b वी प्रचोदयात्। ब्रह्मभूतायै विद्महे गदाहस्तायै धीमहि

९८ तन्नो वाराही प्रचोदयात्॥ इन्द्रभूतायै विद्महे वज्रहस्ता-
यै धीमहि तन्नो इन्द्राणी प्रचोदयात्॥ रुद्रभूतायै विद्म-
हे खड्गहस्तायै धीमहि। तन्नश्चामुण्डी प्रचोदयात्॥ स-
र्वत्र पार्षदमातृभ्यो नमः। लोकमातृभ्यो नमः। सर्वमातृभ्यो
नमः। सर्वमातृगणेभ्यो नमः। सर्वमातृपार्षदा। इति पूर्वादि-
दिक्षु। नानारूपा मातरः प्रतिदिशं व्यवस्थिताः। दिव्यान्तरि-
क्षभौमाः। पातालनिवासिन्यश्च इहागत्य वहन्तु। शिवाज्ञ-
या मामनुगृह्णन्तु। प्रतिगृह्णन्तु पूजां मम। सौम्यपदादिव्य-
स्ताभ्यो देवेभ्यश्च भ्यो नमो नमः स्वाहा। इति साधारणम-
न्त्रा मन्त्राः। तत्पार्षदा विकल्पः। पुनः सर्वेषु आकाशमातृ-
भ्यो न[मो] नमः। आकाशमातृगणेभ्यो नमः। इति ऊर्ध्वबलिं
दद्यात्। पुनः अधः मूलेन बलिं ~~दद्यात्~~ दत्वा। अतः श्रीभू-
तबल्युक्तमन्त्रेण जलाप्लुतबलिं दद्यात्। पुनः पुष्पमाराध्य बलि-
मुद्रां प्रदर्श्य संवय शास्त्रबलिं कुर्यात्। मूलेन शास्त्रे। भूता-
धिपतये रुद्रपार्षदाय नमः इत्यादि। शास्ते नमः शम्भरकु-
मा[रा]य नमः। नीलाय नमः। कालाय नमः॥ श्रीः॥ इत्युत्सव-
बलिप्रकारः॥ मात्रानन्तरं श्रीभूतप्रकारः ?

—x—

१०९ रङ्गपूजाविधिरुच्यते। नान्दीपुण्याहस्नपनन्यास-
पञ्चामृत रुद्राभिषेक ब्राह्मणभोजनादि कृत्वा। रात्रौ नित्य-
पूजानन्तरं महानिशीथकाले रङ्गपूजां कुर्यात्॥

तत्र मन्त्री स्नात्वा सहस्रसंख्याकं पञ्चाक्षरी-
मन्त्रं जप्त्वा गुरुं गणपतिं क्षेत्रपालं ध्वजेशं ध्यात्वा
धम्माचारं कृत्वा तूष्णीं ततः दक्षिणपादपुरस्सरं प्रविश्य

आसनप्राणायामं कृत्वा देशकालौ संकीर्त्य राशिनक्षत्रमुक्त्वा श्रीमहालिङ्गेश्वरप्रीत्यर्थं परिवारैः साकं महारुद्रपूजाविधिना ध्यानावाहनादि षोडशोपचारपूजां करिष्ये। कलशाराधनमभ्यर्च्य द्वारपूजादि षोडशनामान्तं कृत्वा अथ परिवारानामावाहयेत्।

उमा विनायकं स्कन्दं नन्दी भृङ्गी च मातरः।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥
वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः।
चण्डेश वीरभद्रेश तीक्ष्णशक्तिशाकरौन॥
धरो ध्रुवश्च सोमश्च आपवत्सानलानलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः॥
10 b धातार्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा।
इन्द्रो विवस्वान्पूषा च पर्जन्यस्त्वष्टृ विष्णवः॥
मृगव्याधश्च शर्वश्च निर्ऋतिश्चाज एकपात्।
अहिर्बुध्न्यः पिनाकी च भवनाथो महीश्वरः॥
स्थाणुर्भवश्च पापारिः एते रुद्राः प्रकीर्तिताः।
दक्षिणाग्निः गार्हपत्यः आहवनानि संपूज्य। इन्द्रादि दशदिक्पतीन्संपूज्य।

वसवो द्वादशादित्य रुद्रा एकादशान्तान्।
प्रत्येकं पूर्णपात्रेषु पूजयेद्दशदिक्पतीन्॥

उमामावाहयामि। दुर्गान्नवशक्त्या द्वादशनामान्तं कृत्वा॥१॥?
विनायकमावाहयामि। विघ्नेश्वरनवशक्त्या द्वादशनामान्तं कृत्वा॥२॥ स्कन्दमावाहयामि। गणपतीन्सम्पूज्य॥३॥ नन्दिमावाहयामि॥४॥ भृङ्गिमावाहयामि॥५॥ ब्राह्मीमावाहयामि॥६॥

माहेश्वरी ॥८॥ कौमारी ॥८॥ वैष्णवी ॥९॥ वाराही ॥१०॥ इन्द्रा-
णी ॥११॥ चामुण्डा ॥१२॥ काल्यादि सप्तगणां दुर्गां नवशक्त्या-
संपूज्य। चण्डेश्वरमावाहयामि ॥१३॥ वीरभद्रमावाहयामि। १४॥
तीक्ष्णेशमावाहयामि ॥ १५। शैवनवशक्त्या संपूज्य॥ अर्कमावा-
॥१ हयामि। सूर्यनवशक्त्या संपूज्य ॥१६॥ निशाकरमावाहयामि ॥१७॥
चन्द्रनवशक्त्या ॥ धरं ॥१८॥ ध्रुवं ॥१९॥ सोमं ॥२०॥ आपवत्सं॥
२१॥ अनिलं ॥ २२। अनलं ॥२३। प्रत्यूषं ॥ २४। प्रभासं ॥ २५। शै-
वनवशक्त्या संपूज्य॥ धातारं ॥ २६॥ अर्यमणं ॥२७॥ मित्रं ॥ २८॥
वरुणं ॥२९॥ अंशुं ॥ ३०॥ भगं ॥ ३१॥ इन्द्रं ॥ ३२। विवस्वन्तं॥
३३॥ पूषणं ॥ ३४। पर्जन्यं ॥ ३५। त्वष्टारं ॥ ३६। विष्णुं ॥ ३७।
विष्णुनवशक्त्या संपूज्य। मृगव्याधं ॥ ३८॥ शर्वं ॥ ३९॥ निर्ऋतिं॥
४०॥ अजैकपादं। ४१। अहिर्बुध्न्यं ४२॥ पिनाकिनं ॥ ४३॥
भवनाथं ॥ ४४॥ महेश्वरं ॥ ४५॥ स्थाणुं ॥ ४६॥ भवं ॥४७॥ पाया-
रिं ॥ ४८। शैवनवशक्त्या संपूज्य॥ दक्षिणाग्निं ॥ ४९॥ गार्हपत्यं॥
५०॥ आहवनीयं ॥ ५१॥ इन्द्रं ॥ ५२॥ अग्निं ॥ ५३॥ यमं ॥ ५४।
निर्ऋतिं ॥ ५५॥ वरुणं ॥ ५६॥ वायुं ॥ ५७॥ कुबेरं ॥ ५८॥ ईशानं॥
५९॥ ब्रह्माणं ॥ ६०॥ अनन्तमावाहयामि ॥ ६१॥ शैवनवशक्त्या
संपूज्य अभिषेकसूक्तैर्मार्जयेत्। अग्निमीळे। रुद्रसूक्तम्।
श्रीरुद्र। लक्ष्मीसूक्त। गणपतिसूक्त। विष्णुसूक्त। शान्तिसूक्त।
रक्षोघ्नसूक्त। श्रान्तसूक्त। (पुरु)षसूक्त। पुनः प्रधाननवश-
क्त्यादि सहस्रनामानि संपूज्य। धूपदीपं च कृत्वा। अस्त्रम-
॥८ न्त्रेण · · प्रार्थ्य (परिवे)षणमुक्त्वा तोयपुष्पाञ्जलिर्व
मूर्ध्नि निक्षिपेत्। धेनुमुद्रां प्रदर्श्य। आपोशनं दत्वा प्राणा-
दिपञ्चमुद्रां प्रदर्श्य गोमुद्राकमलचक्रबाणमुद्रां प्रदर्श्य।

पूर्वापवर्गमार्गेण उमादीनां पृथक्पृथक्पञ्चोपचारेण नि-
वेदयेत्। कनिष्ठाङ्गुलिना गन्धं अङ्गुष्ठेन पुष्पं। मध्यमेन
धूपं। तर्जन्या दीपं। अनामिकेन नैवेद्यं। उमायै नमः। सा-
ङ्गसायुध सवाहन सपरिवारायै उमायै हविर्भक्ष्यपायसान्न-
क्रमुकताम्बूलनारिकेर कदलीफलयुतं महानैवेद्यं समर्प-
यामि। इति तोयाक्षतपुष्पाणि निक्षिप्य। अमृतोपस्तरणम-
सीत्युक्त्वा। एवं विनायकादीनां पृथक् निवेद्य ततो होमं
कुर्यात्॥

देशकालौ संकीर्त्य श्रीमहालिङ्गेश्वरप्रीत्यर्थं म-
हारङ्गपूजाङ्ग गणहोमं करिष्ये। पृष्टो दिवि पृष्टो अग्निः पृथि-
व्याम्। एह्यग्न इत्यादि अग्निं प्रज्वलित प्रतिपर्यन्तं सम्पूज्य
12a प्रधानहोमे देवतापरिग्रहार्थं मन्वाधानं करिष्ये। अग्निं
वायुं सूर्यं प्रजापतिं चाज्येन प्रधानदेवतां महालिङ्गे-
श्वरं पूजामन्त्रैः सकृत्सकृद्वारमाज्येन गायत्र्या पञ्चमू-
लेन अष्टवारमाज्येन मूलेन अष्टोत्तरशतवारं चरु(क)
द्रव्येण उमाद्येकषष्टिदेवतानां दशांशसंख्यया अङ्गम-
न्त्रैराज्येन ब्रह्मार्पणमन्त्रेण अष्टवारमाज्येन व्याहृतिना-
ज्येन सद्यो यक्ष्ये॥

पर्युक्षणपरिस्तरणात्स्रुक्स्रुवं संमार्जनान्तं
कृत्वा विश्वानि न इत्यग्निमभ्यर्च्य। ओं भूः स्वाहा। एवं
व्याहृतिभिर्हुत्वा। आधारशक्त्यै स्वाहा। महालिङ्गेश्वराय इदम्।
एवं नवशक्त्यन्तं हुत्वा।

स्वात्मसंस्थमजं शुद्धं त्वामद्य परमेश्वर।
अरण्यामिव हव्याशं बहिरावाहयाम्यहम्।

स्वाहा। तत्पुरुषायेति चरुं जुहुयात्। मूलेन अष्टवार-
12b माज्यं जुहुयात्। अष्टोत्तरशतवारं चरुं जुहुयात्। उमादीनां
दशांश संख्यकं चरुं जुहुयात्। ओं हृदयाय स्वाहा। एवमङ्ग-
मन्त्रेण आज्याहुतिं हुत्वा। इतः परं प्राणबुद्धिर्देहधर्माधिकारतः।
जाग्रत्स्वप्नसुषुप्त्यवस्था हस्ताभ्यां पद्भ्यां मुदरेण शिश्ना य-
त्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। महालिङ्गेश्वराय इदम्।
एवमष्टवारं हुत्वा। ततो महाव्याहृतिभिर्जुहुयात्। अग्निं षो-
डशोपचारैः संपूज्य। समाप्य विसृज्य परिविशिष्टशेषं हुत-
शेषं नन्दिने निवेद्य। मूलमन्त्रमष्टोत्तरशतवारं जप्त्वा।
नमस्कृत्य घण्टानादं कृत्वोन्तः प्रविश्य। अमृतापिधान-
मसीति आपोशनं दत्वा चतुर्भागं विसृज्य नीराजयेत्।

ध्यानम्-

शारद्यादिध्वजान्ते विरचितकलशे शुद्धवस्त्रे सुपात्रे
शाल्यन्नं पूगपुष्पं कदलिगुडघृतैः नारिकेराज्यपूपैः।
द्वे पार्श्वे त्रिप्रधारा ज्वलितदीपावली शोभमाना
13a कुर्यात्पूजां(यां) यथोक्तं सकलसुखकरीं लभ्यते सर्वसौख्यम्॥१॥
ध्यायेन्नित्यमिति।

शान्तं पद्मासनस्थं शशिधरमुकुटं पञ्चवक्त्रं त्रिणेत्रं
शूलं वज्रं च खड्गं परशुमभयमप्येकभागे वहन्तम्।
नागं पाशं च घण्टा मथ वरदकरं साङ्कुशं वामभागे
नानालंकारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि॥ २॥

Kannada [एतद्ध्यानस्वरूपनाद महालिङ्गेश्वरनु मं(H)दयहादल्लि माडि-
तंथा रुद्राभिषेक ब्राह्मणसन्तर्पण निशिकालदल्लि माडिदंथा
यजमानरिगू नोडुवंथा भक्तरिगू दशदिक्किनल्लि बाहंयाचि-

विपत्तुगळन्ने परिहरिसि ऐश्वर्यगळन्ने अनुग्रहिसबेकु माडबेकु। सर्वेन्दु ध्यानावसानदल्लि पुष्पाक्षतेन नमस्कारा माडबेकु॥]

अन्तः प्रविश्य प्रागावाहितदेवान् विसर्जयेत्॥

यान्तु देवगणाः सर्वे पूजामादाय मत्कृताम्।
13·6 इष्टकाम्यार्थसिद्ध्यर्थं पुनरागमनाय च॥

नैवेद्यादीन्विसृज्य बलिं दद्यात्।

नन्दिं चैव महाकालं गणेशं वृषभेश्वरम्।
शूलपाणिं परशुपाणिं दिक्पालांश्च पितामहं॥
अनन्तं च महानन्दी वीरभद्रविनायकौ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्री [णि] चामुण्डाः सप्तमातरः।
मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य एव वा॥
सर्वमातृगणेभ्यश्च लक्ष्मीभूचरखेचरान्।
मातृशास्तारमार्यं च दुर्गां स्कन्दं च सोमशः॥
चण्डेश्वरबलिं दद्यात्। चतुर्दिक्षु बलिं दद्यात्।
पुनः शीघ्रं प्रदक्षिणं कुर्यात्। [अत गोपुरद्वारे नीदण्डं शङ्कुमृगाननौ। भृङ्गि चैव महाकालौ भूतनाथौ महीधरः।
पर्वतेशौ गुहेशश्च कालपाशः कपर्दिनौ।
इति अष्टदिक्षु। महापीठे।
भूतिशो दुर्निरीक्षश्च भीमरूपः सुलोचनः।
सुमुखश्च सुबाहुश्च त्रिशिरस्त्रिभुजः क्रमात्।
149 इति महापीठे पूर्वाद्यष्टदिक्षु क्रमः। अर्वाग्भागे पिङ्गल।

हरसेन । ऊर्ध्वभागे ।
पिङ्गलो हरसेनश्च क्रमाद्दिक्ष्वथ ऊर्ध्वसु ।
अष्टदिक्षु बलिं दद्यात् । कल्पमन्त्रशीर्षैः क्षेत्रपालं संपूज्य ।
क्षेत्रपाले बलिं दद्यादष्टौ देवाः प्रकीर्तिताः ।
केतुः प्रथमतः प्रोक्तं तथापि त्रिपुरान्तकः ॥
ततः करस्थभेताल अग्निजिह्वा ततः परम् ।
भूयः कालः समाख्यातः एकराक्षस्ततः परम् ।
पादे तु भीमरूपस्य दिग्विदिक्षु यथाक्रमम् ।
इति अष्टदिक्षु देवताः । मध्ये क्षेत्रपालदेवतां संपूज्य
नवशक्तिपूजां कुर्यात्[1] । त्रिवारार्घ्यं दत्वा । दूर्वासऋषिः
अनुष्टुप्छन्दः क्षेत्रपालो देवता । शमिरथा दिषडङ्गम् ।
[अनिलास्यै । अग्निकेशा । पिशाचिका । भीमाङ्गायै । भैरव्यै ।
विकृतिवदना । करालवक्त्रा । व्योमरूपा । क्षेत्रपालाय । इति
नवशक्तयः । व्योमरूपाय विद्महे अनिलास्याय धीमहि ।
तन्नो क्षेत्रपालः प्रचोदयात् । अर्घ्यम् । पङ्क्तिमध्ये प्र-
क्षिप्तोऽयं भागः यथास्थानं योजनीयः आगमज्ञैः] ध्यानम्-
नीलं जीमूतवर्णं सकलशिवमयं भार्गवं भानुतेयं
रौद्रं रौद्रावतारं ज्वलितशिखिशिखा ऊर्ध्वकेशं सुदंष्ट्रम् ।
व्योमाङ्गं भीमरूपं विकृतवदनं वक्त्रपादं त्रिणेत्रं
ज्वालामालान्धकारं मम दुरितहरं क्षेत्रपालं नमामि ॥
ओं क्षं क्षेत्रपालाय नमः । अष्टवारं जपेत् । द्वादशना-
मा[न]न्तरं नैवेद्यं कुर्यात् । श्रीराजयेत् अनन्तरमष्ट-
दिक्षु बलिं दद्यात् । मध्ये क्षेत्रपालमूलेन बलिं दद्यात् ।
14-6 मूलान्ते - एह्येहि विद्रुषि विद्रुपि मुरमुर भक्षय भक्षय

(1) The portion within square brackets, it seems, added here.

नर्तय नर्तय विघ्नय विघ्नय भैरव क्षेत्रपालाय बलिं गृह्ण गृह्ण स्वाहा। अनेन बलिं दद्यात्। पुनर्जलं दद्यात्। पुष्पमाद्यं बलिमुद्रां प्रदर्शयेत्। पुनर्ध्यानम्-

ए(?)कं खट्वाङ्ग हस्तं भुजग परिमितं पाशमेकं त्रिशूलं कपालं खड्गहस्तं (भुजगिरि शिखरं सपिंग परिमितं पाशमेकं त्रिशूलं कपालं) डमरुग सहितं सर्पयज्ञोपवीतम्।
काले ~~काले~~ कालान्धकारं मम दुरितहरं क्षेत्रपालं नमामि। ⊕

[This verse occurs else where and can be corrected with the help of the verse]

ब्रह्मार्पणं कुर्यात्। इति रुद्र पूजाविधि क्षेत्रपाल पूजा समाप्तः। श्रीः। शुभमस्तु॥

अक्षरं मत्परिभ्रष्टं मात्राहीनं तु यद्भवेत्।
क्षन्तुमर्हसि निःशेषः पिता पुत्रापराधवत्॥

आसनप्राणाय भूतशुद्धिमातृकान्यासं कृत्वा पश्चा-
15a त्साध्यमन्त्रं न्यासकरणानन्तरं जिह्वाङ्ग मूर्तिं मन्त्रैरात्म-
नि न्यसेत्।

मुखे शिरसि पार्श्वौ च जानुगुह्ये हृदि स्तथा।
कण्ठे चोरसि च स्कन्धौ पृष्ठे जठरपार्श्वयोः।

इति साध्यमन्त्रन्यासं कृत्वा ह्रीं(?) हिरण्यायै। क्ष्म्यूं गगनायै। क्ष्म्रैं रक्तायै। क्ष्म्रूं कृष्णायै। ल्म्यूं सुप्रभायै। य्रूं बहुरूपायै। य्रूं अतिरक्तायै। ओं रां सहस्रार्चिषे हृदयाय। रीं स्वस्तिपूर्णाय शिरसे। रूं उत्तिष्ठ पुरुषाय शिखायै। रैं धूमव्यापिने कवचाय। रौं सप्तजिह्वाय नेत्रत्रयाय। रः धनुर्धराय अस्त्राय। ओं अग्नये जातवेदसे। मूर्ध्नि। वामांसे। अग्नये

जातवेदसे सप्तजिह्वाय पार्श्वे। अग्नये हव्यवाहनाय कट्याम्। अग्नये अश्वोदराय मूलाधारे। अग्नये वैश्वानराय दक्षिण-कट्याम्। अग्नये कौमारतेजसे दक्षिणपार्श्वे। अग्नये विश्वमुखाय दक्षिणांसे। अग्नये देवमुखाय॥ अथ कुशशुद्धिं कुर्यात्।

यन्त्रमध्ये द्वादश दर्भकूर्चं निक्षिप्य तत्र दर्भमुष्टिं प्रसार्य तत्राग्निं पूजयेत्। आधारशक्त्यादि पञ्चोपचारान्तं कृत्वा तत्र पीठे शक्तिं भुवनेश्वरीमावाह्य तत्पार्श्वे शिवमभ्यावाह्य द्वारपूजादि पीठपूजान्तं कृत्वा।

नवशक्तिपूजा। ओं जयायै। विजयायै। अजितायै पराजितायै। नित्यायै। विलासिन्यै। दोग्ध्र्यै। अघोरायै। मङ्गलायै। आवाहनादि सहामुद्रां प्रदर्श्य। ओं ह्रीं भुवनेश्वर्यै। महेश्वरनसाय धीमहि। तन्नो दुर्गा प्रचोदयात्। ह्रामित्यादि। वराङ्कुशेति ध्यानम्। शक्तिऋषिः। गायत्री छन्दः। भुवनेश्वरी देवता। ओं ह्रीं नमः। जपं कृत्वा पञ्चोपचारान् कृत्वा। अङ्गैः प्रथमावरणम्। ओं ह्रीं हृल्लेखायै। गगनायै। रक्तायै। करालिकायै। इति महोच्छिष्मायै। इति। २।

169 गायत्र्यै। सावित्र्यै। सरस्वत्यै। ब्रह्मणे विष्णवे। रुद्राय॥ ३॥ ब्राह्म्यादि॥ ४॥ इन्द्रादि॥ ५॥ वज्रादि॥ ६॥ [आवरणानि]।

अथ महेश्वरपूजा। शैव्या शैव्यां कलशत्। धूपदीपताम्बूल पुष्पाञ्जलिं कुर्यात्। [ततोऽन्तरके तारम दमन नमः दमन
चितौ चिपता ङ्रागौ परिदाभित्ता ड्रौ।
आरूढयन्ती मदमुहुहन्ती स्मरे ... तौ गिरिजा गिरीशौ॥
(स्मिता)
प्रार्थ्य। अग्निमाहृत्य अग्न्युत्पत्तिं कुर्यात्। धेनुमुद्रया अस्त्रेण संप्रोक्ष्य मूलमन्त्रं जप्त्वा वैश्वानरमन्त्रेणाग्निं संस्थाप्य

चितिपिङ्गलमन्त्रेण अग्निं प्रज्वाल्य। तारेण इन्धनादि प्रोक्ष्य
अग्नौ निक्षिप्य। ओं ह्रीं हूं वह्निचैतन्याय स्वाहा। अग्नि
प्रज्वलितमिति. नमस्कृत्य दर्भद्वयं गृहीत्वा स्वदेहोक्त-
प्रकारेण जिह्वामूर्तिमन्त्रेण तत्तत्स्थानेषु विन्यस्य परिस-
मूहनादि स्रुक्स्रुवसंमार्जनान्तं कृत्वा अस्त्रेण आज्यस्यो-
त्प्लवनम्। आधारशक्त्यादिमन्त्रैः संपूज्य पञ्चोपचारान्तं
16८ कृत्वा अथ होमः —

प्रणवव्याहृतिपूर्वकं हुत्वा अं अग्नये स्वाहा सोमाय स्वा-
हेति जुहुयात्। वैश्वानरमन्त्रैः त्रिवारं हुत्वा अग्नये गर्भा-
धानाख्यं कर्म सम्पादय स्वाहा। इति समिधं हुत्वा। प्रणवेन
अष्टाहुतिं हुत्वा। ओं आं ईं ऊं व्योमव्यापिने भूर्भुव-
स्वरोमोम् इति पूर्णाहुतिं हुत्वा। अथ पुंसवनम्,... सी-
मन्तम्, विष्णुबलि, जातकर्म कृत्वा। अथ सूतकशुद्ध्य-
र्थं तारेण पञ्चगव्यं प्रोक्ष्य। नामकरणम्। उपनिष्क्रम-
णमन्नप्राशनम्। चवलम्। उपनयनम्। व्रतचतुष्टयम्।
समावर्तनं, विवाहः। इति समाप्य। महागणपतिमन्त्रैः द-
शधा विभक्तैः दशधाहुतिः। समस्तेन चरुराहुतिः। पुन-
र्व्याहृतिं हुत्वा साध्यमन्त्रैः पञ्चविंशतिवारं हुत्वा। प्रति-
लोमव्याहृतिं हुत्वा अग्निमूलमन्त्रेण समिति पञ्चविंश-
तिवारं हुत्वा शैवमन्त्रेण एकादशवारं हुत्वा साध्यमन्त्रेण
17९ अष्टोत्तरशतवारं हुत्वा महाव्याहृतिं हुत्वा ब्रह्मार्पणमन्त्रे-
ण अष्टवारं हुत्वा। पुनर्महाव्याहृतिभिर्हुत्वा ततो मूलेन
पूर्णाहुतिं हुत्वा —

जटाजूटादिं तच्छिखाधरधवलं पञ्चवक्त्रं त्रिनेत्रं

भूषाभिर्मणिगणफणाभि[र्भि]र्लसितम्।
वराभीतिं शक्तिं करकमलजैः स्वस्तिभिः
बिभ्राणं वह्निं स्मरतु तरुणादित्यकिरणम्॥
इति ध्यात्वा। परिस्तरणादिकं विसृज्य। इत्यग्निजननम्॥

श्वेतवर्णं सात्विकाङ्गं बालादित्यसमप्रभम्।
स्वध्याहुतिं प्रदास्यामि प्रसन्नो भव शंकर॥
सद्योजात नमस्तुभ्यं सद्योमृत्युविनाशन।
अपमृत्युविनाशाय सद्योजाताय वै नमः॥
पीतवर्णं बालदेहं व्यालयज्ञोपवीतिनम्॥
वराहुतिं प्रदास्यामि प्रसन्नो भव शंकर।
वामदेव नमस्तुभ्यं वायके शक्तिसंयुतम्।
17.6 व्यालमृत्युविनाशाय वामदेवाय तेनमः॥
कृष्णवर्णं महाकायं दशहस्तं त्रिलोचनम्।
तिलाहुतिं प्रदास्यामि प्र[सन्नो भव शंकर॥]
अघोराय नमस्तुभ्यं घोरघोरभयंकर।
घोरमृत्युविनाशाय अघोराय नमोनमः।
पाण्डुवर्णं दीर्घकायं पाशाढ्याराजसद्युतिम्।
दूर्वाहुतिं प्रदास्यामि प्र— ॥
तत्पुरुषाय नमस्तुभ्यं पुरुषार्थप्रदायिने।
क्षुद्रमृत्युविनाशाय तत्पुरुषाय नमोनमः॥
शङ्खवर्णं पञ्चवक्त्रं दशबाहुं त्रिलोचनम्।
पयाहुतिं प्रदास्यामि प्र— ॥
ईशानः सर्वविद्यानामीश्वरः सर्वदायिने।

दुष्टमृत्युविनाशाय ईशानाय नमो नमः।
रक्तवर्णं त्रिणेत्रं च रमानाथप्रपूजितम्।
घृताहुतिं प्रदास्यामि प्र—   ॥
त्रियम्बक नमस्तुभ्यं पुरत्रय विनाशिने।
कालमृत्युविनाशाय त्रियम्बक नमो नमः।
धूम्रवर्णं महाकायं शार्दूल नामसाङ्क्तिम्
185 परमान्नं प्रदास्यामि प्र—   ।
मृत्युञ्जय नमस्तेस्तु मृत्योर्मृत्युं नमाम्यहम्।
सर्वमृत्युविनाशाय मृत्युञ्जय नमोस्तु ते॥
आद्यौ तारं विलिख्य तु समाध्याह्वयं कर्णिकायां
दिक्पत्रेष्वं परमपरं चापि तत्कोणगेषु।
भूयो भूमं पुरमनुमृगालं तदग्रेषु ठान्तं
जध्वा बद्धं विपगदमय इवंलि यन्त्रं तदेतत्॥
मध्ये तु प्रणवं प्रोक्तं दक्षिणे वह्निबीजकम्।
उत्तरे शक्तिबीजं स्यात् पश्चिमे शंभुबीजकम्।
कर्णिकाष्टदलोपेतं त्रिशूलाष्टकसंयुतम्।
भूपुराष्टकसंयुक्तं यन्त्रं मृत्युञ्जयं हृदि स्मरेत्।
पारायणजपांश्चैव कुर्याद्दिक्षु विधानतः।
ऋग्वेदी पूर्वदिग्भागे यजुर्वेदी च दक्षिणे।
पश्चिमे सामवेदी च सोमे चाथर्वणस्तथा।
186 आग्नेयास्त्रं तथाग्नेय्यां नैर्ऋत्यां पाशुपतं स्मृतम्॥
वायव्यां रुद्रिकास्त्रं च ईशान्ये घोरमुच्यते।
मध्ये कुर्याद् दम्बरं मृत्युञ्जेनुः पूर्वे स्तोत्रं दक्षिणे चार्चनं च।
पश्चाज्जाप्यं उत्तरे तर्पणं च ईशे कुम्भार्दयेत् सर्वसिद्ध्यै।

ध्यानेन मुच्यते रोगात् पूजया चार्थसिद्धिकृत्।
दीर्घमायुर्जपात्प्रोक्तं तर्पणात्सर्वकामदम्॥
शान्तिकं कलशं प्रोक्तं होमात्सर्वार्थसिद्धिदम्।
चन्द्रार्काग्निमिति ध्यानम्।
तीव्रे ज्वरे घोरतराभिचारे सोन्मादके दुर्गते च मेहे।
ततो नु शान्तिं विकिरेणभूय: संजीवनं चाष्टशतं प्रमाणम्।
अमृतवटतिलदूर्वा: पयोघृतं पायसं क्रमेणेति।
अमृतारोग्यसिद्धिं स्यात् वटाद्रोगनिवारणम्।
तिलात्पापक्षयकरं दूर्वयायुष्यवर्धनम्॥
१७७ क्षीरेण बलवृद्धि: स्यात् आज्येनैश्वर्यवर्धनम्।
पायसेन तु पुत्राप्ति: क्रमेण फलमीरितम्॥
यस्तु वर्णो जुहोत्येव यात्सङ्ख्येन साधक:।
तावत्संख्यै: सुधाकुम्भै: अग्नि: प्रीणाति शंकरम्॥
आप्यायितोऽग्निना शर्व: साधकस्येप्सितान्वरान्।
प्रदद्यादायुरादींश्च दुरन्तापमृत्युादिकान्॥
पञ्चान्यो द्विपुन: पञ्च दाशार्णो नाश इत्यपि।
पञ्चदशद्वादशाञ्जाङ्गुल्यसमा: पञ्चदश स्मृता:॥
तत्राङ्गुलस्तत्वचञ्च सार्द्रा इध्मा इहोत्तमा:।
आग्नेययन्त्र- त्रिकोणं षट्कोणं वृत्तं अष्टदलं वृत्तं चतुरस्रं
चतुरस्रवीथिम्। त्रिकोणे- ॐ रं ह्रां ह्रीं। उपरि स्रूं। ईशा-
दिषट्कोणेषु ष्म्र्यूं श्म्र्यूं क्ष्म्र्यूं ल्म्र्यूं स्म्र्यूं वैश्वानर जातवेद।
१७८ लोहिताक्ष इह आवह सर्वकर्माणि साधय स्वाहा। उपरि सा-
धकमन्त्रा:। उपरि वह्नि: वामभागे ब्लूं [ह्रूं] दक्षिणकोणे ईं स्रीं
इति वृष्टिं। प्राणप्रतिष्ठां षडङ्गध्यानादि मन्त्राणि यथावकाशं लि-

खेत्। उपरि ईशभागे अं अं ईं। आग्नेये ऌं ॡं। नैर्ऋत्यां
नैर्ऋत्ये ऋं ॠं। एं ऐं। वायव्ये ओं औं अं अः। उपरि ई-
शादिकादि क्षान्तान् लिखेत्।

अथ संकल्पः। परमात्मानं प्रजापतिं प्रजाप-
तिं अघोरदेवते आज्येन अग्नीषोमौ चरुणा आज्येन
अग्निं वायुं सूर्यं प्रजापतिं आज्येन वैश्वानरमन्त्रेण त्रि-
वारं अग्निबीजेनाष्टवारं पुरस्तादुपरिष्टाच्च व्याहृतिभिः
मध्ये अष्टवा[रं] प्रणवेन दशाक्षरीमन्त्रेण पूर्णाहुतिमप्ये-
वमेकस्मिन्कर्मणि सप्तदशवारम् एवं षोडशकर्मसु आ-
ज्येन महागणपतिं दशधाविभक्तेन दशवारं समस्तैः च-
तुर्वारं साध्यमन्त्रेण पञ्चविंशतिवारं व्याहृतिभिः आज्येन
अग्निमन्त्रेण पञ्चविंशतिवारं ध्रौवमन्त्रेण एकादशवारं सा-
[20a] ध्यमन्त्रेण(1) ष्टवारं व्यस्तसमस्ताभिर्व्याहृतीभिराज्येन सद्यो यक्ष्ये
अष्टोत्तरशतवारं महाव्याहृतिभिश्चतुर्वारं स्थापनमन्त्रेण अ-
ष्टवारं व्यस्तसमस्तव्याहृतिभिराज्येन सद्यो यक्ष्ये। प्रजाप-
तिं चाघारादि वा तन्त्राज्येन अग्नीषोमौ चरुणा आज्येन प्रधान-
देवताः मृत्युञ्जयं पीठमन्त्रैः आज्येन गायत्र्या पङ्क्तिं मूलेना-
ष्टवारमाज्येन मूलेन अमृतवटतिल दूर्वापयः क्रमेण घृतपा-
यसक्रमेण द्रव्यैः पूर्वाज्य अपराज्यं सहितपृथक् पृथगष्टविंश-
तिसंख्याकैः मध्ये मध्ये व्याहृतिभिः आज्येन अङ्गावरणम-
न्त्रैः आज्येन व्याहृतिभिः कल्यार्थणमन्त्रैराज्येन महाव्याहृति-
स्सद्यो यक्ष्ये। [Breaks off. Incomplete] 20b is blank.

Copied from a ms with no. RE 43216 of IFI
Fol. 20, 26 x 5.5 cm. 8 lines per page. Tulu Script. Old,
slightly damaged. The other works here in are अश्वत्थ-
प्रतिष्ठा, उपनयन, विवाह, रुद्रविधि

(1) Here one line is cut off.

एवं नामानि गानानि नित्यकाल्युत्सवे विधौ।
नित्यमूर्तिं भ्रामयेत्तु यदा नैमित्तिकादिके॥
नैमित्तिकस्य सद्वैवानां बलिमूर्त्या गुरुस्तथा।
अस्त्रराजेन संयुक्ता महालिङ्गेन चाथवा॥

इति श्रीपारमेश्वरतन्त्रे बलिविधिमषत्रिंशत्पटलः॥

॥श्रीः॥

×

स्वस्ति॥ नित्योत्सवाय बेराणि कल्पितानि बहूनि चेत्।
तदर्थं कल्पयेत्तेषु यथेष्टं बेरमुत्तमम्॥
एककालं द्विकालं वा त्रिचतुः पञ्चकालकम्।
षट्सप्तवसुकालं वा सर्वथाचार्यच्छिवान्।
158 नित्ये त्वेवं समादिष्टा सर्वाभीष्टफलप्रदा॥ श्रीः श्रीः श्रीः॥
✓ प्रातःकाले तु मध्याह्ने सायाह्ने यदि पार्वति।
बलिकर्मणि हीने तु प्रायश्चित्तं समाचरेत्॥ १॥
पुण्याहं वाचयित्वा तु नान्दीकर्म विधाय च।
अघोरास्त्रजपं कुर्यात् साष्टोत्तरशतं तथा॥ २॥
पञ्चब्रह्मषडङ्गैश्च होमं कुर्याद्यथाविधि।
स्नापयेत्कलशैर्देवं पञ्चभिर्नवभिस्तथा॥ ३॥
देवं सावरणं पूज्य निवेद्यं मधुरं ददेत्।
देवताभ्यो बलिं दद्यात् ब्राह्मणान्भोजयेत्ततः॥ ४॥
एवं प्रातर्विधिः प्रोक्तो मध्याह्ने द्विगुणं भवेत्।
सायाह्ने तत्समं देवि प्रायश्चित्तविधिमान्॥ ५॥

इति चन्द्रज्ञाने प्रायश्चित्तविधिः॥

×

R. E. 45390 T. No. 984 b)

श्रीः

वातुल, वातुलोत्तर, पारमेश्वर, चन्द्रज्ञान-

पटलाः

26a गन्धम्। कलविकरणाय इत्यक्षतम्। बलविकरणाय नम इति पुष्पम्। बलाय नम इति धूपम्। बलप्रमथनाय नम इति दीपम्। सर्वभूतदमनाय इति काले नैवेद्यम्। मनोन्मनाय नम इति ताम्बूलम्। विश्वतश्चक्षुरिति मङ्गलनीराजनम्। अघोरेभ्य इति मन्त्रपुष्पनमस्कारम्। अथान्याभिर्मन्त्रैरष्टौ पुष्पाणि ददाति।

अर्कचम्पकपुन्नाग नन्द्यावर्तैश्च पाटलैः।
बृहतीकरवीराणि द्रोणपुष्पाणि-चार्चयेत्।

ओं भवाय देवाय नमः। शर्वाय देवाय। ईशानाय देवाय। पशुपतये देवाय रुद्राय देवाय। उग्राय देवाय। भीमाय देवाय। [म]हते देवाय नमः॥ भवं देवं तर्पयामि। इति तर्पयित्वा अथान्याघोरतन्वोपतिष्ठते। अघोरेभ्यः तत्पुरुषायेति रुद्रगायत्र्या लिङ्गं संस्पृश्य दशवारं जपेत्। दशकृत्वः शतकृत्वः सहस्रकृत्वो परिमितकृत्वो वा। अथैषामाशिषमाशास्ते। आयुराशास्ते। सुप्रजास्त्वमाशास्ते। सजातवनस्यामाशास्ते। उत्तरां देवयज्यामाशास्ते। भूयो हविष्करणमाशास्ते। दिव्यं
26b धामाशास्ते। यदनेन हविषाशास्ते तदश्यात्तदृध्यात्। तदस्मै देवा रासन्ताम्। तदग्निर्देवो देवेभ्यो वहते। वयमग्ने-र्मानुषाः। इष्टं च वीतं च उभे च नो द्यावापृथिवी। अंहसस्पातामि। इह गतिर्वामस्येदं च। नमो देवेभ्यः। अथैतस्य मूर्ध्नि हिरण्यकलशोदकेन सन्ततं धाराभिषिञ्चन् दध्ना मधुना सर्पिषा पयसा आम्ररसेन इक्षुरसेन नारिकेरसलिलेन वा गन्धोदकेन वा पुष्पोदकेन वा कुशोदकेन वा तदलाभे सुवर्णोदकेन वा नमस्ते रुद्रमन्यव इत्येकादश-